नं० ५२०-घ

पत्राणि १३८

काव्यप्रदीपस्य सप्तमाष्टमनवम
दशमोल्लासाः । (सम्पूर्णम्)

नं० ५२०

पत्राणि १३८

यं स्वस्ति प्रजाभ्यः ॥ एवं धर्मिणि काव्ये सप्रभेदे निरूपिते प्रासङ्गावस
रतया दोषाभावादीनि लक्षणस्थानानि विशेषणानि विवेच-
नीयानि तेषु च दोषाभावः प्रधानम् सति दोषे गुणादेरप्यकिं-
चित्करत्वात् यथाह स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भग-
मिति सति च दोषाभावे गुणालङ्कारं विनापि किञ्चिदाह्लाद-
संभवात् अपदोषतैव विगुणस्य गुणाहृतिन्यायात् अतः
प्रथमं तस्मिन् निरूपणीये ऽभावस्य स्वरूपतो निरूपणानर्हत-
या प्रतियोगिनिरूपणाधीननिरूपणीयत्वाद्दोषापरिचये त-
ज्ज्ञानासंभवाद्दोषा निरूपणीयाः न च सामान्ये विज्ञाते वि-
शेषे जिज्ञासेति तत्सामान्यलक्षणमाह ॥ ॐ मुख्यार्थहति-
र्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः उभयोपयोगिनः स्युः शब्दा-
द्यास्तेन तेष्वपि सः ॥ १ ॥ मुख्यार्थस्य हतिर्यस्मादिति व्यधि-
करणत्वेऽपि गमकत्वाद्बहुव्रीहिः करणसाधनो हतिशब्दस्ये

का॰प्र॰
१

के मुख्यत्वमर्थस्य तन्मात्रकत्वलक्षणं पेनार्थसंगतिः स्यात् किं
त्वन्यदित्याह रसस्वमुख्य इति रस्यत इति व्युत्पत्त्या रसशब्देन
भावादिरप्युपसंगृह्यते नन्वेवं नीरसे तु न कश्चिद्दोषः स्यात्
विघातताभावात् इत्यत आह तदाश्रयाच्च इति आश्रय
णमाश्रयः तथा च तेन रसेनाश्रयणादुपकारित्वेनापेक्षणा
दाच्योपि मुख्य इत्यर्थः नचैवं मुख्यपदस्य नानात्वेनाननुग।
मः काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात् तदेवं र
सवति सर्वएव दोषा नीरसं त्वविलंबितचमत्कारिवाक्यार्थप्रतीति
विघातका एव हेया इति संक्षेपम् नन्वेवं तयोरेव दोषाभावत्वमुचि
तं न तु शाहानामित्यत आह उभयोपयोगिन इति अत्र शाहपदं
प्रतिपादनात्मकव्याहनाव्यापारवतोः पदवाक्ययोर्वर्तते तेना
यपदाद्वर्णरचने संगृहीते इति प्रकाशांशरसः नचात्र बीजाभा
वः अन्यथावर्णस्यापि पदस्याहे नैव प्राप्तेः शाह्यायाइति वक्तवचा।

१

नासंगतेः स्यादिति न हृतिर्विनाशः नचदोषेणरसोनाश्यते न
स्याद्वलक्षणमेतत् नैवम् हृतिशब्दस्यापकर्षवाचित्वात्
नन्वेवंरसानुत्पत्तिप्रयोजकेषव्याप्तिः अप्यानुत्पत्तिरेवहृतिश
ब्दार्थः नहियत्ररसउत्पद्यतएवपरंत्वपकृष्यतेतत्राव्याप्तिः ।
नचैतल्लक्षणमतिदविरुद्धव्याप्तेः हृशब्दार्थनिशावगुण्ठनीयत्व
सनमिवैकेनापकृष्यमाणमपरंपरिहरति किंचार्थरूपस्य
मुख्यार्थस्यानुत्पत्तिरपकर्षोवानदोषाधीनइति अतउक्तम्
उद्देश्यप्रतीतिविघातलक्षणोपकर्षोहृतिशब्दार्थः उद्देश्यप्र
चप्रतीतिः रसवत्त्वविलंबितान्नपकृष्टरसविषयाच नीरसे
तत्रविलंबिताचमत्कारिणीचार्थविषया तथाचतादृशप्र
तीतिविघातकत्वंसर्वेषामविशिष्टम् यतोदोषेषुकेचिद्रसस्य
प्रतीतिरेव केचित्प्रतीयमानस्याप्यपकर्षं केचित्तुविलंबं ए
वंनीरसेकेचिदर्थस्यमुख्यस्यप्रतीतिरेव केचिद्विलंबेनप्र
तीतिः केचिदचमत्कारितेनप्रत्युभवसिद्धमित्युद्देश्यप्रतीतिविघा

का॰प्र॰
२

तोत्कर्षएव नहि दोषात्मकत्वं च कस्यचित्साक्षात् यथा रसदोषाणा
म् कस्यचित्पारंपर्या यथाश्रुह्यादिदोषाणाम् तेष्वपि कस्यचिद
र्थोपस्थित्यभावात् यथासमर्थत्वादेः कस्यचित्तद्विलंबात् यथा
निहतार्थत्वादेः कस्यचिद्वाच्यार्थबोधाभावात् यथाच्युतसं
स्कारत्वादेः कस्यचित्तत्रविलंबात् यथाक्लिष्टत्वादेः कस्यचित्स
हृदयवैमुख्यजननायापादनेन यथाव्याहतत्वादेः कस्यचित्स्व
रूपसत्त्वएव यथानिरर्थकत्वादेः कस्यचिद्विरोध्युपस्थापनेन वि
परीतोपस्थापनेनवा यथाविरसविकटमतिकृत्त्वादेरित्याद्यूह
नीयम् विधानकत्वं च कस्यचिद्विज्ञातस्य यथाव्याहतस्य कस्यचित्
स्वरूपसत्त्वएव यथानिरर्थत्वादेः सचायं हि विधो नित्यश्चानित्य
श्च तत्रानुकरणादन्येन प्रकारेण समाधानुमशक्यो नित्यः य
थाच्युतसंस्कारत्वादिः अन्यादृशस्त्वनित्यः यथाप्रयुक्तादिः अ
यविशेषबलत्वात्तानि वक्ष्यन्ते तत्रहि विधोप्ययं त्रिविधः शब्द
दोषोर्थदोषो रसदोषश्चेति तत्रप्राधान्याद्रसानां यथापूर्वमुपस्थि

२

तिः प्राथमिकी तित्क्रमेणैव दोषा निरूपणीया इत्यतः तत्र दो
षेषाद्यावित्यत्र वाक्यलक्षणोपि शब्दस्याङ्गिः दैशाख्यशब्दे दो
षाणां प्राथम्यम् शब्दस्त्रिधा पदं तदेकदेशो वाक्यं च एवं च
तदाश्रितः शब्ददोषस्त्रिविधः तत्र पदानां वाक्यघटकत्वेन प्रा
थम्यात्प्रथमं तद्दोषनिरूपणमिति परमार्थः अत्रेदं शक्यते एवं
पदैकदेशस्य पदापेक्षयापि प्राथम्यात्तद्दोषनिरूपणस्यैव प्राथ- पं
म्यमर्हतीति अत्र माभाषकः सत्यमुच्यते परं तु पददोषेष्वेव यथा
संभवं केचित्पदैकदेशदोषा इति समादध्ये तत्रातिमनोरमम् अस्त्वे
वं तथापि पदैकदेशदोषत्वेन प्रथमाभिधानापादने किमुत्तर-
मिति वयं त्वालोचयामः उपदेशेनातिदेशाच्च प्राथम्यादिविचारणा
अतिदेशस्तूपदेशानंतरमेव न च पदैकदेशदोषोपदेशः अ-
तिदेशेनैव तल्लाभे लाघवात् न च पदैकदेश एवास्तूपदेशः प-
देत्वतिदेश इति वाच्यम् पदैकदेशापेक्षिनीनामपि केषांचित्पद-
हनित्वेन तत्पर्यपदेश उपदेशस्यावश्यकत्वादिति पददोषविशे

षलक्षणमाह १ ॥ दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थं म॰
म् निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम् २ ५०
का॰प्र॰ संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टम् अविमृष्टवि
३ धेयांशं विरुद्धमतिकृत्समासगतमेव ३ ॥ ५१ ॥ दुष्टं पदमि
3 ति सर्वैकमभिसंबध्यते ननु श्रुतिकटुप्रभृतिशब्दानां लक्षणा
परत्वे विभागाभावाल्लक्ष्यानुपस्थितौ कथं लक्षणवाक्यत्वनिर्वा
ह इति उच्यते रूढियोगाभ्यामुभयार्थोपस्थितौ लक्ष्यलक्षणा
योरुभयोरपि प्रत्ययः यथा घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रि
याणि भूतेभ्य इतीन्द्रियलक्षणसूत्रे गौतमीये अस्यैतेषां लक्षण
वाक्यत्वे त्रिधाश्लीलमित्यत्र त्रिधेति निरर्थकम् तस्य विभागमा
त्रार्थत्वेन लक्षणेऽनुपयोगादिति चेन्न अश्लीलशब्दस्य व्रीडादि
व्यंजकत्रितयसाधारणैकावयवघटितविरहेणानानार्थतया
लक्षणत्रयपार्थक्यमित्यस्य तद्दर्थत्वात् अत्र श्रुतिकटुत्वं यद्य
पि श्रोतुरुद्वेजकत्वं तच्च वर्णभेदेनानियतम् तथापि तज्जनक ३

तावच्छेदकरूपवत्त्वं विवक्षितम् न व्यञ्जकवर्णत्वं न सहृदयानाञ्चय
त्वं वा उदाहरणानि अनङ्ग॰मङ्ग॰लगृहापाङ्ग॰भङ्गि॰तरङ्गि॰तैः
आलिङ्गि॰तः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥ अत्र कार्ता-
र्थ्यमिति पदं परुषवर्णप्रायम् किं पुनरस्य दूषकताबीजम्
उद्वेगजनकत्वमिति चेन्न रौद्रादावपि दोषत्वप्रसङ्गात् मा-
धुर्यव्यञ्जकरचनामध्यपतितमेव तदुद्वेजयतीति चेत् ता-
र्हिं नाट्यशास्त्रेन ज्ञातं न तथात्वं उत स्वरूपसदेव नाद्यः रसविशेष-
व्यञ्जकानामपि प्राथमिकतादृशपदश्रवणेनोद्वेगाभावप्रस-
ङ्गात् न चेष्टापत्तिरनुभवविरोधात् अन्त्ये तु सत्यादयः प्रमा-
णाम् न ह्यवच्छित्तविशेषानपि तत्रैव तदुद्वेजयतीति नात्मत्रेति प्र-
माणमस्ति किंचैवं वैयाकरणादेः कारिकिं निवध्नतो दोषाभा-
वः स्यात् अत्रोच्यते स्वायत्तेष्टा हृत्प्रयोगे कर्णोपतापकश्रुतिप्र-
योगेणाश्रोतुरुद्वेगो रसापकर्षायेति तद्बीजम् अत एव प्रतिकूल

का.प्र.
४

वर्णादस्यभेदः तस्यकर्णोपघातापादकत्वात् अतएवानुकरणेवै
याकरणादौवक्तरिश्रोतरिवारौद्रादौरसेऽपनीरसेचकाव्ये।
दोषत्वाभावः आद्येतस्यैवानुकरणीयतयास्वादायत्नभावात् ।
द्वितीयेचतत्स्वभावावगमेनोद्वेगाभावात् तृतीयेचश्रोतुस्ते।
नानुद्वेगात् चतुर्थेतदनुगुणत्वेनानुद्वेगाहेतुत्वात् पंचमेमु
ख्यार्थस्फूर्तेरभावात् एवमर्थौचित्यप्रकरणादिवशेनाप्यनुद्वे
जकतयादोषत्वाभावउपपद्यते च्युतसंस्कृति च्युतास्खलिता
संस्कृतिःसंस्करणंव्याकरणलक्षणानुगमोयत्र यद्वाप्रासंस्का
रकव्याकरणलक्षणाविरुद्धत्वमत्राभायांच्युतसंस्कृतीत्यर्थः
देवपंतुनलक्षणाविरुद्धंकिंतुनहिविषयः संज्ञाशब्दानांबहुलवचने
नसंस्कृतत्वात्तत्राव्याप्तिः यथा एतन्मन्दविपक्वतिन्दुकफ
लश्यामोदरापाण्डुरप्रान्तंहन्तपुलिन्दसुन्दरकरस्पर्शक्षमंलक्ष्य
ते तत्पल्लीपतिपुत्रिकुंजरकुलंकुंभाभयाभ्यर्थनादीनंत्वामनुना

४

यतेऽत्र चतुर्णां पदानां हननं मा भूद्या: । अत्र नाथत इति याचनस्यार्थे
च्युतसंस्कृति सामान्येन तु नियमादित्येतत्प्राप्तमस्यात्मनेपदस्येति
यामके नाशिषि चिनाथ इति सूत्रेण नाशिषि चितन्निषेधात् तस्मान्ना
थति स्तनयुगमिति पठनीयम् नन्तु नाथन्त इति संस्कृतमेव न
थात्वर्थविशेषेण नन्यते इति वक्तव्यम् एवं चार्थदोषत्वं प्राप्तमि
ति मैवम् यत्र प्राह परस्मिन्वर्तते निरोधेन वर्तते तस्यार्थदोषत्वम्
यस्तु तथा प्रतीतिनिवर्तते तस्य प्राहुर्दोषत्वमिति विभागात् अत्रा
थ्याप्रतीतिर्हि चकितावीजमिति नित्यदोषत्वम् अनुकरणे त्वर्थे
परत्वाभावाद्दोषत्वाभाव: अप्रयुक्तम् तथाऽनुशासनसिद्धम
पि कविभिर्यन्न प्रयुक्तम् यथा यथायं दारुणाचार: सर्वदैवा
विभाव्यते तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा । अत्र दै
वतानि पुंसि वेत्यनेनाम्नातोऽपि पुंलिंगो दैवतशब्द: कविभिर्न का
पि प्रयुक्त: तत्र किं हृच्चकितावीजम् ततावकष्ठकिविरहेतातस्ता ॥

का॰प्र॰
५
5

तु प्राप्तिःस्मृतिविरहस्यापिनास्ति प्राह्यानुप्रासेनेनक्ष्महेप्रतिबंध
काभावादितिचेन्न पदार्थोपस्थितिविलंबस्यहीजम् अतएवश्ले
षयमकादावदोषत्वम् उद्भटालंकारसंपत्त्याप्रतीत्यविलंबस्यतत्रा
नुद्देश्यत्वात् वस्तुतस्तुनाहृश्याकविसमयविलंबनप्रयोजनात्तु।
संधानस्यग्रतयाप्राप्तस्यार्थविच्छित्तिर्हैस्वकयावीजम् अतएवात्र।
करणाविदोषत्वाभावः अन्यत्राप्रयुज्यमानस्यापितदर्थकवि
भिःप्रयोगस्यदर्शनेनस्यग्रताभावादिति अनित्यदोषोयम् अ
समर्थम् इत्यूल्यार्थेनस्य तेनयत्तदर्थंपरिपठितमपिप्रकृतेस्थ
लेविवक्षितेनार्थेसामर्थ्यरहितमित्यर्थः समर्थस्येवासामर्थ्यविरु
द्धमितिचेन्न उपसंहारेनोपजीवित्वात्सामर्थ्यस्य यथाहृतिधातोः
पद्धतिजवनजंघादिषुपदादिपदोपसंहारेनेनमार्गाद्यर्थोपसंहारे
नवागतोसामर्थ्यंनतुनरविहस्य यथा तीर्थान्तरेषुस्नानेनस
मुपार्जितसत्कृतिः स्रवस्रोतस्विनीमेषहंतिसंप्रतिसादरम् १ ॥

५

अस्यार्थोपस्थितिर्हि रूपकताबीजमिति निष्पन्ना । निहतार्थम् निहतः
प्रसिद्धेनार्थेनाप्रसिद्धतया व्यवहितो विवक्षितोर्थो यस्य तत् गू
ढेप्यर्थे क्वचित्प्रयोगान्नाप्रयुक्तसंकरः उदाहरणम् यावकरसार्द्र
पादप्रहारशोणितकचेन दयितेन मुग्धा साध्वसतरला विलोक्य
परिचुंबिता सहसा १ अत्र शोणितपदं असृक्रुधिरे इति प्रसिद्धिरऽ
प्रसिद्धिस्तूज्ज्वलीकृतत्वरूपे विवक्षितार्थे रूपकताबीजं प्रसिद्धस्यैव
द्रागुपस्थित्याप्रसिद्धविवक्षितस्य विलंबोपस्थितिः अतोयमस्का
द्वावदोषत्वम् तत्रोपस्थितिविलंबस्यापि सहृदयसंमतत्वेनाविलंबा
नुद्दिष्टत्वात् अनुचितार्थम् अनुचितो विवक्षितार्थतिरस्कारकोर्थो
यस्य तत् यथा तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्य
ते च या प्रयांति तां आशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः
१ अत्र शौर्यप्रतिपाद्यपदांतरानपेक्षमेव पशुपदं कातरतामभिव्यन
क्ति तदन्वितस्यादर्शनात् विरुद्धमतिकृत्पदांतरसापेक्षं तद्येति तस्मा
द्भेदः रूपकताबीजं च विवक्षिततिरस्कारकार्थोपस्थितिः अतोस्यानित्यदो

का·प्र·
६

बाध्यम् निरर्थकम् अविवक्षितार्थकम् वृत्तनिर्वाहमात्रप्रयोजनजन
कमितियावत् अतएवचाकालंकारस्तंयमकादिनिर्वाहकं चत्वारि
पदमड्डहमित्यनित्योयम् तच्चनिपातरूपं चादिपदं बहुवचनादिच उदाह
रणम् उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि अभिवांछितं।
प्रसिध्यतुभगवतिधुष्मत्प्रसादेन १ अत्रहिपदम् अर्थस्याविवक्षित
त्वात् रूपकताबीजंत्वस्यचिंत्यताम् नहिनतावदर्थानुपस्थितिः पदां
तरैरेवयावदभिधेयोपस्थापनात् नचैवमवाचकादौ तत्रतदभिधेया।
स्यवाच्यार्थघटकस्यपदांतरैरनुपस्थापनात् नापिप्रतिकूलवर्णवद्र।
सविरोधिता चादीनांसार्थकत्वस्यलेपिरसविरोधिप्रसंगात् स्वरूपस्य
ताद्रूप्यादिति उच्यते निरर्थकंयुञ्जानस्यवचसि सहृदयानां वैरस्यंरू
पकताबीजम् प्रयोजनानुसंधानव्यग्रतावा अवाचकम् विवक्षि।
तधर्मविशिष्टस्याविवक्षितधर्मिणः क्वापिनवाचकंयत्तदित्यर्थः अ
तएवासमर्थाद्भेदः तस्यक्वचिच्छक्तिस्वीकारात् एतादृशविशिष्टवि
वक्षायां क्वचिद्धर्मिणोऽशक्तावपिविवक्षितेप्रकारेऽशक्तिविरहात् ६।

चित्प्रकारेणाकारवपि धर्मित्वाद्ग्राहित्वविरहात् वाचित्प्रकारस्य धर्मिणो
स्तम्भयोरपि भेदाभावात् तत्रायं द्विधा अपेक्षितयोगमनपेक्षि
तयोगं च तयोराद्यं यथा अवंध्यकोपस्यापि विहन्तुरापदं भवन्ति
वश्यपाः स्वयमेव देहिनः अमर्षशून्येन जनस्य जन्तुना न जातहा
र्देन न विद्विषादरः १ अत्र पूर्वार्द्धे दारिद्र्यरूपापद्विचानकनयाद
त्वं वा विवक्षितमिति द्वितीयार्द्धेन हेतुपदर्शकं जन्तुपदमदात्रि
प्रयुक्तं तत्र च जायते इति योगमपेक्ष्य तस्य प्रकाशित्वेऽपि न विवक्षि
तयाऽवाच्यतया प्रकाशमासित्यवाचकम् अनपेक्षितयोगं यथा ।
त्वंभिक्तता किल नाममसी प्राप्तिमुर्वीरुचामयापत्र सा न हि छेदस्तो
धकाहितमिदं दग्धं धिनं कल्पितम् किं कुर्मः कुसुमालिसदैव विधुरोधा
तानचेतनलक्ष्यं न ताद्दग्याममवनीमयो भवति मन्ये जीवलोकोऽधुना १
अत्र दिनपदं प्रकाशमयमित्यर्थे विवक्षितम् नामसीत्यनेन लब्ध
स्यतमोमयत्वस्य वैपरीत्याभिधानाद्योपादानात् तत्र च धर्मिता

का॰प्र॰
७

योगमनपेक्ष्यैवरूढ्यादिनंदिनत्वेनप्रकाम् नपुनःप्रकाशमयत्वे
नेत्यवाचकम् द्वितीयंयथा जलंजलधरोद्गारमयंवर्षतिवारिदः
इदंदृष्टंहितमश्वानांकाकवानेषदृश्यते १ अत्रजलधरस्याहस्यजला
धारकत्वेप्रकारेसामर्थ्येपिसमुद्रेधर्मिणिसामर्थ्येयद्यपियोगश्च
स्तित्राप्यसत्येवतथापिरूढ्याप्रतिबंधाद्वनस्तिकल्पेव तृतीयं
तूपसर्गसंसर्गादर्थांतरगतमन्यथाच नयोगंयंयथा जंघाका
ण्डोरुनालोनखकिरणलसत्केसरालीकरालःप्रत्यग्रालक्तकाका
भाप्रसरकिसलयोमंजुमंजीरभृंगः भर्तुर्नृत्तानुकारेजयतिनि
जतनुस्वच्छलावण्यवापीसंभूतांभोजशोभांविदधदभिनवो
दण्डपादोभवान्याः १ अत्रविदधातिर्धारणेप्रयुक्तः नचधार
णोधारणेवासमर्थः उपसर्गसंसर्गेणाकरणेनियतत्वात्किंत्वा
न् अन्यपदत्ववाच्यमनिष्टावाचकतायांप्राभ्रमाडित्यादावुदाहरि
ष्यते नदेवंनिर्दृष्टगणोप्रकाशोयदसमर्थेधर्मधर्मिणोर्द्वयोरपिमा ७

क्तिविरहः अवाचके तु धर्ममात्रे सः विदधतीत्युदाहरणं त्व
वाचकप्रकरणमध्येऽसमर्थस्यैवेति प्रलपितम्। न ह्यवाचकावा
चकोदाहरणानवलोकननिबंधनं संदर्भविरुद्धं चेत्यनादे
यम्। रूपकतावीजं तु विवक्षितार्थानुपस्थितिरिति नित्य
एवायम्। त्रिधाऽश्लीलमिति अश्लीलस्यानित्यत्वे सिध्मादि
त्वाल्लच्प्रत्ययः कपिलकादित्वाद्रेफस्य लत्वम्। तथा चवाचका
प्रभाववदिति पर्यवसन्नम्। कांत्यभावश्चातिप्रसक्त इति व्री
डाजुगुप्सामंगलव्यक्तिहेतुकत्वं हि प्रभेदकत्वम्। न चैतत्र
येऽनतिप्रसक्तमनुगतं रूपमस्तीति व्रीडादिहेतुत्वाकांतिमा
त्त्वनानार्थोऽयमश्लीलपदार्थः। तच्च प्रत्येकं त्रिविधम्। क
चिद्विवक्षितस्यैवार्थस्य व्रीडाद्यालंबनत्वात्। क्वचिदविवक्षिता
र्थस्य निर्वाहितार्थतथात्वात्। क्वचिदविवक्षितार्थस्यानिर्वाहि
तोऽपि स्मृतिमात्रहेतुत्वात्। एवं त्रिधा क्वचित्किंचिदुदाह्रियते।

का॰प्र॰
८
४

नत्रक्रीडात्मकार्थवर्णनस्यतथाभावोयथा साध्यनंसत्रुमहद्ध्यस्यय।
नान्यत्रविलोकयते नस्यधीशालिनःकोन्यःसहेतारालिनांभ्रुवम्।
अत्रसैन्यार्थकस्यसाधनस्याहस्यपुंव्यंजनमर्थानरम् उत्तरस्याव्य
कौतथाभूतार्थस्मृतिमात्रहेतुत्वंयथा लीलातामरसाहतोऽन्य
वनितानिःशंकदष्टाधरःकश्चित्केसरदूषितेक्षणइवव्यामील्य
नेत्रेस्थितः मुग्धाकुड्मलितानननेनददतीवायुंस्थितातस्यसा।
भ्रांत्याधूर्ततयाथवानतिमृतेतेनानिशंचुंबिता १ अत्रवायुप्रा
प्योऽपानवायुंस्मारयति ननुतदर्थनतयावाक्यमुपपद्यते अत्रसं
गतत्वमौविवक्षितस्यैवार्थस्यतथात्वंयथा ॥ चंडपवनविक्षि
प्तामलत्रियापाविनाशाद्धनरुचिरकपालोनिःसपत्नोयजातः।
इतिविगलितबंधेकेशपाशेसकेश्याःसतिकुसुमसनाथंकंह
रेदेषवर्ही १ अत्रविनाशपाशस्यविवक्षितएवार्थोऽसंगतः।
एवंत्रिष्वभिन्नाभिन्नप्रकारोदाहरणेनप्रत्येकंत्रिप्रकारत्वमूहनीयं

न्यायसाम्यात् रूपकताबीजं त्वत्र भवति द्रूपताप्रकर्षकता दृष्टा
र्थोपस्थितिः नीरसेत्वचमत्कारापकर्षकत्वेन साः अथवा ताद
र्थार्थोपस्थित्याश्रोतुर्वैमुख्यं तद्बीजम् अतः ग्राम्यकथायां दोष
त्वाभावः तादृशार्थोपस्थितेः ग्राम्यपोषकत्वात् भाव्यमंगला
दिवचने कामशास्त्रस्थितेनोचनदोषत्वं वैमुख्याभावात् शिव
लिंगभगिनीब्रह्मांडादिषु हेतुत्वेन न तथा समुन्नीत तदमंगलधीनेषु
असभ्यार्थान्तरोपस्थितेरित्यनित्योयम् संदिग्धम् तथार्थोपस्था
पनानुकूलस्वरूपद्वयसंदेहविषयः यथा आलिंगितस्तत्र
भवान्संपराये जनयत्यमिष्या आशीः परम्परां वन्द्यां कर्णे कृत्वा कृ
पां कुरु । अत्र वन्द्यामिति पदं वन्दी ग्राह्ये समन्तं वन्द्यां ग्राह्येहिती
यां तं वेति संदेहः प्रथमे हठहृतमहिलायां कृपां कुर्विति द्विती
येन नमस्यामाशीः परम्परामित्यर्थोपपन्नौ साधकबाधकवाधकप्र
माणाभावात् तात्पर्यसंशयः रूपकताबीजं तद्देशपनिश्चयाभावः

का॰प्र॰ ९
9

अतोयत्रसंदेहरूपोदोषप्रसक्तस्तत्रवाच्यादिमहिम्नाप्रकरणादिवशेन
वाऽन्यतरनिश्चयस्तत्रचाऽदोषायमिति अप्रतीतमिति नञोल्या
ख्यानयाशास्त्रानुशासनानिकिंशास्त्रमात्रप्रसिद्धमित्यर्थः अतएवा
प्रयुक्ताद्भेदः तस्यान्यत्रापिप्रसिद्धिः उदाहरणम् सम्यग्ज्ञानमहा
ज्योतिर्दलिताशयजन्मनः विधीयमानमप्येतन्नभवेत्कर्मबंध
नम् १ अत्राशयशब्दोमिथ्याज्ञानजन्यवासनार्थः सचैवंभूतो
योगशास्त्रएवप्रसिद्धः एवंशास्त्रान्तरप्रसिद्धमप्यूह्यम् रूपकता
वीजंतच्छास्त्रानभिज्ञस्यार्थानुपस्थितिः अतएवयत्रतच्छास्त्रा।
भिज्ञएवप्रतिपाद्यःस्वयमेववापरामर्शस्तत्रनदोषत्वम् प्रस्तुत
स्वल्पमितिसूचकतयागणत्वम् ग्राम्यम् केवललोकेप्रसिद्धंनतु
शास्त्रेपि अतएवाप्रयुक्ताद्भेदःरूपके अपरेतुदेश्यमनेनसंगृ।
ह्यते कटिशाटाद्ययस्तनोदाहर्तव्याः किंतुगल्लभल्लाद्यस्तस्माद्धः
तदुभयस्यापत्वात् कटिशाटस्यशास्त्रेपिप्रसिद्धस्यैवमनन्यस्यैवोदा

९

हरणत्वेनदर्शितत्वात् तस्मात्समस्तलोकप्रसिद्धं तस्मिन्दे
शेसर्वैर्लौकैर्यदाख्येयायहस्तस्यवक्रियतेनचिन्त्यार्थः तेन।
देशरूपमपिसंगृहीतम् अतएवाग्रेओदनपानमल्लादयउ।
दाहरणीयाः कलममहिषीदध्यादयश्चप्रत्युदाहर्तव्याः
उदाहरणम् राकाविभावरीकांतसंक्रांतद्युतितेमुखम् ।
तपनीयशिलाशोभाकटिश्चहरतेमनः ॥ अत्रकटिशब्दः
लोकानभिमतंप्रतीतिनदर्थानुपस्थितिहेतुत्वकतावीजमितित्वष्ट
जवः वस्तुतस्तुनागरोपनभावौविज्ञायग्राम्यपदप्रयोगा
वकाशएवेदाप्योन्नयनेनश्रोतृवैमुख्यंतदित्यालोच्यते अ।
तएवविदूषकादौऽधममेवमस्तिनदोषत्वम् तस्यतथैवौचि
त्येनवैरस्याभावात् कटिशब्देतुग्राम्यतापयोजकंनाश्ली।
लमितिनिस्संकरः नेयार्थम् नेयोऽर्थोयस्य नेयत्वंच निरू
ढलक्षणाःकश्चित्सामर्थ्यादभिधानवत् क्रियंतेचाधुनाका

का॰प्र॰
९

श्चित्काश्चिन्नैवत्वघ्राक्षितः तस्यानेन रूढिप्रयोजनाभ्यांनिषि-
द्धायालक्षणायाविषयत्वम् यथा शरत्कालसमुल्लासिपू-
र्णिमाशर्वरीप्रियम् करोतितेमुखंतन्विचपेटापातनातिथि-
म् १ अत्रचपेटापदंनिर्जितत्वेलक्षणयाप्रयुक्तम् नचतत्रा-
स्यरूढिर्नवाप्रयोजनं मुख्यग्राह्यार्थातिरेकिणोऽर्थस्याऽप्रती-
तेः रूपकताबीजंचहस्यभावेनार्थोऽनुपपद्यतेतिवितनित्योऽयं
दोषः अथभवेत्क्लिष्टमित्यादिक्लिष्टादिकंदुष्टंपदंसमास-
गतमेवेत्यभिसंबंधः तदयमर्थः क्लिष्टत्वादिदोषत्रयंपदांत-
रसाहित्येनैवसंभवति तथाचयदितयोःपदयोःसमासस्तदै-
वसमासेनैकपदत्वात्पददोषता असमासत्वेवाक्यदोषत्वमेव
इतरेषांतुसमासेऽसमासेचपददोषत्वम् द्वितीयपदनैरपे-
क्ष्येणाऽदुष्टत्वादिति तत्रक्लिष्टमर्थप्रतीतौक्लेशावहम् यतोव्य-
वहितस्यान्वितविशेषस्यप्रतिपत्तिर्विलंबितातदित्यर्थः नि

९

हतार्थादौ तु पदार्थोपस्थितिरेव विलंबितेति ततो भेदः विलं-
बश्चापन्यासनैर्वा सामान्यशब्दज्ञानात्प्रकरणादेरभावे विवक्षित-
विशेषस्य झगित्यनुपस्थितेर्वा आद्ये वाक्यमात्रदोषत्वं यस्मिन्न
सत्यादौ अंत्ये तु पददोषत्वमपि तद्यथा अत्रिलोचनसंभू-
तज्योतिरुद्गमभासिभिः सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टि-
तम् १ अत्रात्रिलोचनसंभूतेत्यादौ सामान्यतोऽन्वयबोधावि-
लंबेपि अत्रिलोचनसंभूतेत्यादिना चंद्रादेर्न झगित्युपस्थितिः अन्य-
स्यापि तथाभावात् नियामकस्याभावाच्च अतः क्रमद्वैविलंबस्य
व्यवधानेनोपस्थितिः इदमेव च अत्रिदृष्टेः समुद्भूतपर्यायेनाना-
वभासिभिरिति पाठे द्वितीयप्रभेदस्य वाक्यदोषस्योदाहरणं दृष्टव्यम्
दूषकताबीजं च प्रतीतिविलंबः प्रहेलिकादौ न स्पष्टत्वाददोष-
त्वम् मनोज्ञयादौ गुणत्वमपि तद्दौचित्यात् अविमृष्टविधेयां-
शम् अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत् प्राधान्यं च

का॰प्र॰ ११ तत्रानीतिर्योग्यता सा चानुपसर्जनीभूतत्वे सत्युद्देश्यप्रत्यानंतर्यम् अ
त्र न्यक्कारो ह्ययमित्यादौ तावत्प्रमसंकृत्यादौ वानाव्याप्तिः प्रथमे
उक्तरूपप्राधान्याभावेन द्वितीये विधेयस्य प्रसज्यप्रतिषेधस्यातिदे
शेन विशिष्टे विरहसत्त्वात् उदाहरणम् मूर्ध्नामुद्वृत्तकृत्ताविरलगल
गलद्रक्तसंसक्तधाराधौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्या
महिम्नाम् कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः १ अत्र नगरी
रक्षणे एव प्रयासस्तन्मूर्ध्नां महिमा मिथ्येति मिथ्यात्वं विधेयम् अ
प्रधानत्वात् अत एव नानुवाद्यम् प्रधानत्वेन मिथ्यामहिम्नामफल।
त्वमेवोचितमतः किमेतत्फलमित्यादिनानाभिसंबंधः स्यात् तच्च।
बहुव्रीहावन्यपदार्थे गुणीभूतं विशेषणाप्राधान्ये समासाननुभा
सनात् किंचोद्देश्यपं विधेयं च पृथक्पदाभ्यामुपतिष्ठते तदाप्राम।
सुहितप्रयोगार्थं विधीयते न च समासे पृथक्पदाद्उपस्थितिः अथवा। ११

गुपस्थितेनोच्चनतयाव्युत्पत्तिरिति एवंसमासांतरेप्यविमृष्टत्वंद्र
ष्टव्यम् तत्रकर्मधारयेयथा स्रस्तांनितंबादवलंबमानांपुनः।
पुनःकेसरदामकांचीम् न्यासीकृतांस्थानविदास्मरेणद्वितीय।
मौर्वीमिवकार्मुकस्य १ अत्रद्वितीयत्वंमौर्व्यामन्वेत्यविधेयम्
तच्चसमासेगुणीभूतम् मौर्वींद्वितीयामितिपाठेतुनिराबाधम्।
तीतिः नन्वत्रकांच्यांद्वितीयमौर्वीत्वंविशिष्टमेवान्वेतव्यमतोनोक्त
दोषावकाशइतिचेन्न तथापिहिविशेषणांशस्यद्वितीयत्वस्यप्र
धान्यम् द्वितीयसद्भावेएकस्यन्यासीकरणौचित्यात् मौर्वीत्वंत।
त्राप्रयोजकम् अन्यस्यापिसद्वितीयस्यन्यासौचित्यादितिवक्तुवि
शेषपरिच्छायकतामात्रम् तस्माद्विशिष्टविधावपिविशेषणामत्र
प्राधान्येनवक्तव्यम् अतएवाकडारादेकासंज्ञेत्यत्रएकत्वस्यप्र।
धान्यभंगभयेनसमासोनाकारीतिव्याख्यावतारः अन्यथातत्रा।
प्येकसंज्ञेत्युद्देश्येएकत्वविशिष्टसंज्ञाविधानेदोषोनस्यात् बहुव्रीहा

वेवतद्धितार्थगुणीभूतेऽन्यपदार्थेगुणीभूतोयथा वपुर्विरूपाक्ष
का॰प्र॰ मलक्ष्यजन्मतादिगंबरत्वेननिवेदितंवसु वरेषुयद्बालमृगाक्षिमृ
१२ ग्यतेतदस्तिकिंव्यस्तमपित्रिलोचने १ अत्रवरेषुमार्गणीयानांसं
12 दत्वमहाकुलीनत्वादीनांधर्माणांविकल्पदर्शनप्रस्तावाज्जन्म
न्यलक्ष्यत्वंविधित्सितंतच्चसमासेन्यग्भूतम् अलक्षिताजनिरिति
पाठेतुपौर्वापर्यविपर्ययनिबंधनाऽप्राधान्येपिसमासनिबंधनमप्रा
धान्यंनिवर्तते नञ्समासेयथा आनन्दसिन्धुरतिचापलशालिचि
त्तसन्दाननैकसदनंक्षणमप्यमुक्ता यासर्वदैवभवतातदुदन्तचिन्ता।
तान्तिंतनोतितवसंप्रतिधिग्धिगस्मान् १ अत्रावांतरवाक्येऽप्रमुक्ता
त्यनेन नवजलधरःसन्नद्धोयंनदृप्तनिशाचरःसुरधनुरिदंदूराकृष्टं
ननामशरासनम् अयमतिपटुर्धारासारोनबाणपरंपराकनकनि
कषस्निग्धाविद्युत्प्रियानममोर्वशी १ इत्यत्रेवप्रसज्यप्रतिषेधएव।
विधेयोनतु जुगोपात्मानमत्रस्तोभेजेधर्ममनातुरः अगृध्नुराद। १२

देसोऽर्थोनसक्तःस्तत्वमन्वभूत् । द्यपत्रैवाग्रस्तत्वाद्यनुवादेनाम
नोगतोपनादिवदःसुक्तत्वाद्यनुवादेनाप्यकिंचिद्विधेयमस्ति नच
समासेनञःप्रसज्यप्रतिप्रतिषेधोर्थः किंतुपर्युदासएव यत्रम्
विधेयेत्रप्रधानत्वंप्रतिषेधेप्रधानता पर्युदासःसविज्ञेयोयत्रोत्त
रपदेननञिति कथंतर्हि अश्राद्धभोजीत्यादौप्रसज्यप्रतिषेधला
भः पर्युदासेनाक्षेपात् ननुपर्युदासोऽप्यसौर्थोऽसक्तत्वमेवविधी
यतांफलाविशेषादितिचेत् भवेदप्येवंयदितथासतिवृत्तामपीत्य।
नेनसंबंधःस्यात्सहिसक्तत्वेनप्रतियोगिनैवविवक्षितोनचपर्युदासे
तथासंभवः नन्वेवमपिनाम्नश्चविधेयांशता विधेयस्यानुपस्थितेः ।
किंतुधात्वर्थोविदधइतिविधवाचकत्वमेवस्यात् समासेऽर्थान्तरनिरू
ढत्वादितिचेन्न प्राधान्येनानिर्देशात्स्यतथाप्यप्रवृत्तेः अतएवप्राधान्ये
नानिर्दिष्टोविधेयांशोपत्रैत्याहहरिहरः ननुप्राधान्येननिर्दिष्ट
तितर्हिविदधइत्यस्याप्यत्रैवांतर्भावइतिचेन्न तदर्थस्यानिर्दिष्टस्या

का॰प्र॰
१३
13

स्याविधेयत्वात् अमङ्गलत्वस्याविमृष्टविधेयांशस्यावाचकत्वमिति चे।
न्न उभयोरसंकीर्णस्थलसंभवेपि क्वचित्संकरेप्यदोषात् रूपकनाबी
जं चविवक्षितार्थप्रत्ययः तस्मान्नित्यदोषोयम् विरुद्धमतिकृत्
पदान्तरसन्निधानेनप्रकृतप्रतीतिप्रत्यूहकारिप्रतीतिजनकम् तच्चे
दमनेकधावर्तते क्वचित्समासान्तरविग्रहेणयथा सुधाकर।
कराकारविशारदविचेष्टितः अकार्यमित्रमेकोसौतस्यकिंवर्ण।
यामहे । अत्रकार्यमन्तरेणामित्रमितिविवक्षितम् अकार्यमित्र
मितितुप्रतीयते क्वचिन्नामपदयोःसमासेविरुद्धार्थनिरूपपदद्व
नायथा चिरकालपरिप्राप्तिलोचनानन्ददायिनः कान्ताकान्तस्य
सहसाविदधातिगलग्रहम् । अत्रकण्ठग्रहार्थिनयाविवक्षितो
गलग्रहपदाद्दोराराविशेषेनिरूढः क्वचिद्विवक्षितविशेषपरत्वे
पदवैपर्यप्रसंगेनाविवक्षितविशेषपरत्वग्रहणयथा नत्रस्तंय
द्दिनामभूत्तककरुणासंतानमन्तात्मनत्तेनव्याहृजनाधनुर्भगव। १३

तोदेवाङ्गवाङ्गवानीपतेः तन्मुत्रसस्तमहाभ्युतारकवधाद्दिम्वसपद
सोत्सवःस्कंदःस्कंदइवप्रियोहमथवाप्रियःकथं विस्मृतः १
अत्रभवस्यपत्नीइत्यर्थेभवानीतिसिद्धम् तथाचभवपत्नीपतौ
प्रतीयमानेभवातिरिक्तःसद्भावःप्रतीयते नहिभवएववाभिधेये
भवपत्नीपतिरितिप्रयोगोयोग्यःसचेतसाम् क्वचित्समासेक्वे
पिसमस्यमानपदयोर्दृश्यतेयथा गोरपियद्वाहननांशामव
तःसोपिगिरिसुतासिंहः सविधेनिरहंकारःपायाद्वःसोम्बिकारः
मणः १ अत्रअविकारमलपदयोर्गौरीप्रीतिकरत्ववत्मात्स्वा
मित्वमप्यर्थः रूपकतावीजं विवक्षितार्थतिरस्कारकार्योपा
स्थितिः अतोयत्रविरुद्धार्थोविवक्षितएवतत्रादोषत्वम् क्लिष्ट
त्वादिदोषविषयेषुसमासगतत्वनियमविधानात् श्रुतिकटु
प्रभृतिष्वनियमोभ्यनुज्ञातः तत्रासमासगतमुदाहृतमेव समा
सगतेषुश्रुतिकटुयथा साहरेचसुधासांद्रतरंगितविलोचना ।

का॰ प्र॰
१५
14

नहिनिर्ह्रीदनार्हीयंकालश्चसमुपागतः १ अत्रसमासादेकपदस्य
एवंच्युतसंस्कृतत्वादयोऽदृष्टव्याः उक्तान्यपददोषाणामेकदेशेवाक्येचा
तिदिशति ॥ अपास्यच्युतसंस्कारमसमर्थंनिरर्थकम् वाक्येपिदो
षाःसंत्येतेपदस्यांशेपिकेचन ५२ ॥ च्युतसंस्कारेत्यादिर्भावप्र
धानोनिर्देशः पत्तेइति श्रुतिकट्वादिमहत्तिनिमित्तमस्ताः श्रुतिक
टुत्वादस्यतन्नत्यर्थः अत्रयत्रपदांतरसाहित्येनपदानांदुष्टत्वंसवाक्य
दोषः नचासाधुत्वसमर्थनिरर्थकानांदुष्टत्वेपदांतरसाहित्यमपेक्षितमिति
तत्रितयापासनमितिसंप्रदायः तदसत् साध्यत्वेष्वस्मादोषश्रुतिकटो
दुष्टत्वेपदांतरसाहित्यस्यानपेक्षणीयतयातदुदाहरणाविरोधात् न
चतत्रापितथैवेतिवाच्यम् पस्पष्टवर्णारब्धत्वस्यस्वतएवसत्त्वात् न
चात्वेपिवासमपातवोदुष्टत्वमवतस्त्वायप्रयुक्तादाहरणाख्याभिः नहि
तत्रापिदुष्टत्वेपदांतरापेक्षेतिवक्तुमपिशक्यते किंचावाचकमप्यसम
र्थसमानशीलंकिमितिनापास्तमितिसर्वव्याख्यानेष्वविनिगमकंच ।

१५

क्यमिति अत्रेदम्ः विवक्षितधर्मिसम्पादकस्याहृ सहजित्वेसतिनाना
पदहृतित्वमेवंवाक्यहृतित्वमभिप्रेतं न्यक्कारोह्ययमित्यत्रापिनाव्याप्तिः ।
उद्देश्यविधेयविधायकयोर्द्वयोरपिउक्तत्वात् अतएवाविमृष्टविधेयां
शामित्यत्रांशापदोपादानम् योसौसुभगोतवागतश्राडदाहगणाप्रका
शोपिस्फुटमेतत् एवंचयुक्तंच्युतसंस्कृत्यादिभ्युदसनम् नचासमर्थ
सहोदरस्यावाचकस्यापिव्युदासोयुक्तः तेनापिकेनचिद्विवक्षितधर्मिता
पनात् यथोदाहृतेनजंतुपदेन च्युतत्वेष्वपुनर्नवोपिप्रभेदोविवक्षितध
र्मिप्रतिपादकइति तत्रक्रान्तिकटुवाक्यगतंयथा सोध्येष्टवेदांस्त्रिदशान
यष्टपितॄन्ततार्षीत्सममंस्तबंधून् व्यजेष्टषड्वर्गमरंस्तनीतौसमूलघातं
न्यवधीदरींश्च १ क्लिष्टम् अप्रयुक्तंयथा सपातुवोडश्च्यवनोभावु
कानांपरंपराम् अनेडमूकताद्यैश्चयत्नदोषैरसंमतात् १ अत्रेडश्च
वनप्राहृद्दृष्टे अनेडमूकप्राहृश्वेडमूकेऽप्रयुक्तः निहतार्थंयथा साय
कसहायबाहोर्मकरध्वजनियमितक्ष्माधिपतेः अब्जरुचिभास्वर
स्तेभातितरामवनिपश्लोकः १ अत्रसायकशब्दःखड्गेमकरध्वजशब्दः

समुद्रेत्तमाघाद्योमरुसोऽसमर्थाद्यमर्थवद्रेश्लोकमाहोयप्रसिद्धचप्रयुक्तः ।
नचैतेषामेतेषुप्रसिद्धिरस्त्येवम् अतःप्रसिद्धेःप्रारम्भटनत्वात्तिपद्म
पद्यैरर्थैर्निहतार्थाः अनुचितार्थंयथा कुविन्दस्त्वंतावत्पटयसि
गुणग्राममभितोयशोगायन्त्येतेदिशिदिशिचनग्नास्तवविभो
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा तथापित्वत्कीर्तिर्भ्रम
तिविगताच्छादनमिह । अत्रकुविन्दइतितन्तुवायंपटयसीति ।
पदंकरोबीतिमग्नेतितंतुनग्नेतिवस्त्रहीनंयथाहत्यकारश्लेषा
द्दयथाः विगताच्छादनमित्यवस्त्रमिचार्थानुपश्लोकमानापक
र्षयोनकतयानुचितार्थकाशयन्ति अवाचकंयथा प्राभ्रभ्राड्वि
ष्णुधामाप्यविषमाश्वःकरोत्ययम् निद्रांसहस्रपर्णानांपलायनप
रायणाम् । अत्रेभ्राजतइत्यपऽभ्रभ्राट्जलदः प्रकृष्टोऽभ्रभ्राडप्रत्र
तद्विष्णुधामेत्यस्यविष्णोरपायाम् अत्रप्राभ्रभ्राडितिप्रकृष्टजलदे विष्णुधा
मेतिविष्णुपदे विषमाश्वइतिसप्ताश्वे निद्रेतिसंकोचे सहस्रपर्णेति ।
सहस्रदले प्रकृष्टजलदत्वादिनाप्रकारेणावाचकानि कानिचिदत्र

धर्मिणिधर्मान्नाम्नेवेति यथोक्तवाक्यदोषाभावम् । अश्लीलेव्री
डादि यथा भूपतेरुपसर्पन्तीकम्पनावामलोचना तत्तत्र
हरणोत्साहवतीमोहनमादधौ ॥ अत्रोपसर्पन्तीतिसुरतारं
भम् प्रहरणेतिताडनविश्लेषंमोहनमितिचार्थान्तरंप्रतिपाद
यतव्रीडादायि जुगुप्सादायि यथा तेऽन्यैर्वान्तंसमश्नन्तिप
रोत्सर्गंचभुंजते इतरार्थग्रहेयेषांकवीनांस्यात्प्रवर्त्तनम् ॥ अ
त्रवांतोत्सर्गशब्दौजुगुप्सितार्थैनयाप्रवर्त्तनमितिकुत्सितार्थकं
पुरीषार्थान्तरतयाजुगुप्सांप्रयच्छन्ति अमंगलार्थंयथा पितृ
वसतिमहंव्रजामितांसहपरिवारजनेनयत्रमे भवतिसपदिपा
वकान्वयेहृद्यमप्रोषितशोकशल्यकम् ॥ अत्रपितृगृहेपाव
नोवृक्षाद्वृतिचविवक्षितेपितृवसतिपावकान्वयशब्दौश्मशा
नवह्निसंबंधरूपामंगलार्थंप्रतीतौ संदिग्धंयथा सुरालयो
ल्लासपरःप्राप्तपर्याप्तकम्पनः मार्गणप्रवणोभास्वद्भूतिरेषविलो

का॰प्र॰
१६
16

वचनाम् १ अत्रसुरालयेतिदेवगृहमंदिरसंदिग्धयोः ग्राम्यपर्यायत
कर्मणनच्युतिग्राम्यसैन्यत्वग्राम्यकर्म्पत्वयोरुपस्थापकम् एवमप्रये
पि अप्रतीतंयथा तस्याधिमात्रोपायस्यतीव्रसंवेगताजुषः दृ
ढभूमिःप्रियप्राप्तोयत्नःसफलितःसखे १ अधिमात्रोदृढतत्ता
वानुपायोयमादिर्यस्यतीव्रःपरमःसंवेगोवैराग्यंयस्यतमायुक्तस्य
दृढभूमिर्दृढसंस्कारः मृदूपायोमध्योपायोधिमात्रोपायश्चेति
त्रिविधाअपियोगिनः प्रत्येकंमृदुसंवेगोमध्यसंवेगस्तीव्रसंवेग
श्चेतित्रिविधः अत्राधिमात्राद्यःशब्दायोगशास्त्रमात्रप्रसिद्धाः १
ग्राम्यंयथा तांबूलभृतगल्लोयंभल्लंजल्पतिमानुषः करोतिखाद
नंपानंसदैवतुयथातथा १ अत्रगल्लभल्लमानुषखादनपानशब्दा
ग्राम्याः नेयार्थंयथा वस्त्रवैडूर्यचरणैःक्षतसत्त्वरजःपरा नि
ष्कम्पारचितानेत्रयुद्धंवेदयसांप्रतम् १ अत्रवस्त्रवैडूर्यशब्देन
अंबरमणेर्विवक्षितत्वाद्वस्त्रशब्देनगगनंविवक्षितम् नचास्य १६

तत्र प्राक्शिरितिवाचकत्वलक्षणेन प्राक्यसंबंधेनांबरस्थं ल
क्षयति तस्माच्च गगनप्रतीतिः यद्वास्ववाचकवाच्यत्वल
क्षणाप्राक्यसंबंधेनगगनमेव लक्षयतीति लक्षितलक्षणा
लक्षणावेतिवस्तुगतिः एवं वैदूर्येत्यस्य मणौ च रणेत्यस्य
पादे सत्वरजःपरेत्यस्य तमसि निरूढपेत्यस्य च ऋचलायां भू
मौ पुरुमित्यस्य हृदे वेदयेत्यस्य बोधने लक्षणैव नच तत्र रू
ढिः प्रयोजनं वेति नेयार्थत्वम् क्लिष्टं यथा धम्मिल्लस्य
न कस्य प्रेक्ष्य निकामकुरंगकप्रावाद्याः रज्यत्यपूर्वबंधव्यु
त्पत्तेर्मानसं शोभाम् । अत्र कुरंगकप्रावाद्याः धम्मिल्लस्य शो
भां प्रेक्ष्य कस्य मानसं न रज्यतीति संबंधे प्रतीतिव्यवधानम्
अविमृष्टविधेयांशं यथा न्यक्कारो ह्ययमेव मे यदरयस्त
त्राप्यसौ तापसः सोप्यत्रैव निहंति राक्षसकुलं जीवत्यहो राव
णः धिग्धिक्शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्ग।

का॰प्र॰
१७

ग्रामटिकाविलुंठनहृष्टोच्छूनैः किमेभिर्भुजैः १ अत्रप्रासमरिसत्व
मस्यमित्यनूद्यअप्रासंत्यक्तात्वंविधीयते अतोऽयमेवन्यक्कारइ
तिवाच्यम् अत्रवायमन्त्रैवनविधेयमुद्दीरयेदितिहइवचनात्
अन्यथातवैपरीत्येनविलंबेनवातथाभावःप्रतीयते अयंन्यक्कारइ
त्युभयोःपदयोर्द्वयत्वाद्वाक्यदोषत्वम् अतएवसमासगतमेवपदंद
ष्टमित्युक्तम् अपिचात्रहृष्टोच्छूनैरित्यसंगतम् उच्छूनमात्रस्यैवानु
वादस्यौचित्यात् ननुहृष्टत्वविशेषितस्य किमेभिरित्यनेनहृष्टत्व
स्यैवविधेयत्वात् अर्थभेदोपगमेपिकिमेभिरितिवैफल्याभिधान
विरोधात् हृष्टोच्छूनस्यनदौचित्यात् ननुन्यक्कारोयमित्यत्रवैपरी
त्येनविधेयत्वमप्ययाद्दर्थदोषएवायंस्यादितिचेन्न नाखल्वत्रवि
वक्षितोर्थोदुष्टः किंतुक्रमविशेषाद्विवक्षितार्थप्रत्ययएवेतिस्माहू
विशेषएवापराध्यति प्राह्यांतरेणानभ्रतीतेरवैकल्यात् यथावि
रुद्धमतिकृति नकेवलंविधेयस्योपसर्जनत्वमुत्क्रमामप्यामेवायं १७

लौ४२

तरंगि४

वाक्यदोषः किंतुविधेयानुपस्थितिरपियथा अपांगसंस-
र्गितरंगितंदृशोर्भ्रुवोररालांचलविलासवेल्लितम् विसारिरोमांचन-
कंचुकंतनोस्तनोतियोसौसुभगेतवागतः १ अत्रयोसावि-
तिपदद्वयमुद्देश्यविधेयार्थकतयाविवक्षितम् उद्देश्यमा-
त्रप्रतीतिस्तावत् उद्देश्यवाचिनोयच्छब्दस्यस्वार्थपरामर्शक-
तच्छब्दापेक्षकत्वात् नचैतत्प्रतिपादकम् यच्छब्दसान्निध्ये-
नश्रुतदृष्टादीनांप्रसिद्धपरामर्शकत्वात् ननुकेवलयोरपियत्
तदोःप्रयोगदर्शनात्सापेक्षत्वमेवानयोरसिद्धम् उच्यते अ-
नयोःपरस्परार्थापेक्षार्थकत्वंनियतमेव एतदेवोच्यते यत-
दोर्नित्याभिसंबंधइति सचाभिसंबंधःशाब्दआर्थोवा तत्रद्व-
योरुपादानेशाब्दः यथासद्धर्मनिःश्रेयसिपसनादृति ।
एकस्यद्वयोरपिवानुपादानेत्वार्थः अनुपात्तस्यापिसामर्थ्या-
देवाक्षेपात् तत्रतच्छब्देनयच्छब्दाक्षेपःप्रक्रांतप्रसिद्धानुभूता

२

का.प्र.
१८
18

र्थकेनयथा कान्तर्थकेकलानीतिःश्लोकार्थस्यापदच्छेदितम्
अतःसिद्धिसमेताभ्यामुभाभ्यामन्वितोवशः १ अत्रसदृति
मत्क्रांतराजानमाह ॥ द्वयंगतंसंप्रतिशोचनीयतांसमागम।
प्रार्थनयाकपालिनः कलाचसाकांतिमतीकलावतस्त्वमस्य
लोकस्यचनेत्रकौमुदी १ अत्रसेतिप्रसिद्धम् ॥ उत्कंपिनीभ
यपरिस्खलितांशुकांताते लोचनेप्रतिदिशंविधुरेक्षिपन्ती
क्रूरेणदारुणतयासहसैवदग्धाधूमांधितेनदहनेननवीक्षि
तासि १ अत्रतेइत्यनुभूते त्रिष्वपियच्छब्दस्योपादानंनावश्या
पेक्षणीयम् तदभावेप्याक्षेपाद्धियःपूर्वोक्तगुणवान् या
प्रसिद्धायेअनुभूतेइतिचमत्प्रयाविद्यानात् यच्छब्दस्तूत्तरवा
क्यगतएवसर्वत्रतच्छब्दाक्षेपसमर्थः यथा साधुचंद्रमसिपु
ष्करैःकृतंमीलितंयदभिरामताधिके उद्यताजयिनिकामि
नीमुखेतेनसाहसमनुष्ठितंपुनः १ यथाचमम मानभार।

१८

निवत्सवत्सलतया किं नाम नाचर्यते मित्राणि स्थिरतावि
वेकविनयाः कार्यस्तु ह साधितम् इत्यालोच्य विमृश्य
मामिह मनागतं तर्हि तस्थीयतां यावत्वादृशाविप्रयोगस्त्व।
लभ्या लक्ष्मीर्मया लभ्यते १ पूर्ववाक्यगतस्तु तदादेपा
समर्थ्यतया तदुपादानमेवापेक्षते यथा त्रैवोदाहृतानि
पूर्वार्द्धपादयोर्व्यन्यासे ननु पूर्ववाक्यगतोप्ययं तदादे
पसमर्थो यथा ॥ तत्र द्वर्मद्विहारि लेक्षवलयैरित्यादा।
विति चेत् सत्यम् समर्थो न तु सर्वत्र किं तु यदीत्येतावद्।
पलत्यपर्याय: चेदितिवा उत्तरवाक्यगतस्तु सकलरूप।
त्यैव तिविशेष: यद्वा यदीत्यव्ययमिदं न तु यच्छब्द: तत्र
भिन्नस्वभावमेव एवं चेत्कृष्णोपि द्वयोरप्यनुपादाने प्या।
र्थीयतत्रदो: संबंध: यथा येनाम केचिदिह न: प्रथयंत्यव
ज्ञां जानंति ते किमपि तान्प्रति नैष यत्न: उत्पत्स्यते स्ति म

का॰प्र॰ १९
19

मकोपिसमानधर्मा कालेप्ययंनिरवधिर्विपुलाचपृथ्वी १
अत्रयउत्पत्स्यते अस्तिवाममसमानधर्मातंप्रतियत्नइति
स्फुटमेवावगम्यते यथाश्रुते हि न पूर्वार्द्धेनकथमप्यन्वयः
यत्तुप्रक्रांतार्थस्यतच्छब्दस्ययच्छब्दापेक्षैवनेति व्याख्या
नंतदप्यतिविवेकायनालोचननिबंधनंप्रकाशकारायनभिम
तंच यद्यपियच्छब्दोपादानंनापेक्षतेतस्याह नतुयच्छब्दंनापेक्ष
तेइति तस्माद्यथाव्याख्यानमेवादरणीयम् एवंचयोसोस्तुभ
गेइत्यत्रतच्छब्दस्यानुपादानादाक्षेपासंभवासंभवाच्चयच्छ
ब्दः साकांक्षः ननुस्यादेवैतत् यदितच्छब्दार्थकोयमदःशब्दो
नस्यादितिचेत् तत्किमदःशब्दस्यतच्छब्दपर्यायता तथासति अ
सौमरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमंडलाग्रणीः वि
युक्तरामातुरदृष्टिवीक्षितो वसंतकालोहनुमानिवागतः १
इत्यत्रादःशब्दस्तच्छब्दार्थमेवाभिदध्यान्नत्विदमर्थम् अथाऽ

१९

कृतं ४

त्रैवेजात्यादिष्टापनिमालंवसेतर्हि ॥ करवालकरालदोःसहायो
युधियोसोविजयार्जुनैकमल्लः यद्विम्नृपतिनासनत्रकार्येवि
नियुज्येतततःकृतंस्यात् १ इत्यत्रसद्गृहीतिपुनरुक्तंस्यात् अदः
ग्राहेणतच्छद्मार्थाभिधानात् नन्वर्थानरत्वमस्यननिषेध्यामः।
किंतुअनुजानीमस्तदर्थैकत्वम् कथमन्यथा ॥ योविकल्प
मिदमर्थमंडलंपश्यतीशानिखिलंमवद्धधः आत्मपक्षपरि
रितेजगत्यस्यनित्यसुखिनःकुतोभयम् १ इत्यत्रेदंग्राहस्यापि
तच्छद्मार्थता इदमदसोःसमानशीलत्वादितिचेत् सत्यमि
त्यसु परंतयच्छद्माद्व्यवहितानंतरवर्त्तीसमानाधिकरणात
च्छद्योपिप्रसिद्धिमात्रेनिरूढः किंपुनरिदमादिः यथा यनह
र्जिनमस्तुग्रहात्रेतेजोस्यभूपतेः दीव्यताहेस्तद्दानेनन्त्ततंतद
पिहापितम् १ इत्यादौ तस्माद्योविकल्पमित्यत्रैवव्यवधाने
नादःप्रयोगोयुक्तोनत्वव्यवधानेन कथंतर्हि नकेवलंयोम

हतोपमाघतेऽप्यतोतितस्मादप्रियः सपापभागित्यत्र तच्छब्देन प्रति
सिद्धार्थं इति चेत् यदस्तत्र विच्छेदेन कथवधानात् योसावित्यत्र त
का॰प्र॰ संधिनायच्छब्दनिविष्टैकदेशत्वेनाविच्छेदात् ननु भवेदेवं य
२ द्वियत्तदोर्नित्याभिसंबंधः स्यात्स एव तु नास्ति कथमन्यथा
यद्यत्पापं प्रतिजगात्वाद्यनन्यस्यतन्मेदूत्यत्रैकयत्परामृष्टस्यै
केन तदा परामर्शोपि द्वितीययच्छब्दानिराकांक्षत्वप्रतीतिः द्विती
यतत्पदाभावात् नच तत्राक्षेपोपि यदः सर्ववाक्यगतत्वादि
ति मैवम् नखल्वेकेनैव रूपेण यत्पदाभ्यां परामर्शनियम इति भ्रमः
किंत्वेकस्यताभ्यां परामर्श इति तथा चात्रापि पापात्मकं वस्तु ये
न केनचिद्विशेषणेन यत्पदाभ्यां परामृष्टं तत्पदेन तत्पापत्वेनै
केनेति को विरोधः वस्तुतस्तु यद्यदितिनपदद्वयं किंतु नित्यवी
प्सयोरिति सूत्रेण वीप्सायां द्वित्वापन्नोयमादेशः तथा चादेशि
नाप्येकेन यत्पदेन तत्पदेन च द्वाभ्यामप्येकेनैव रूपेण पापपरामर्शः २

आदेशस्तस्याकल्प्येन संबंधपरतयाह का इति यत्पदीयेनै
वतेन तदुपपन्नो तत्पदेपि यत्र तु तत्पदेपि वीप्सा तत्र न यत्प
देप्यादेशः किं तु भाव्यं तत्पदद्वयेन सर्वोपस्थापनमिति सा
रम् असमासत्वस्समासेष्वनेकपदगतत्वेनास्य वाक्यदोष
त्वम् यथा किं लोभेन विलंघितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा मिथ्यैत
न्मम चिन्तितं द्वितयमप्यार्यानुजोसौ गुरुर्माता तात कलत्रमि
त्यनुचितं मन्ये विधात्रा कृतम् १ अत्र कलत्रेणात संबंधस्या
नुजे च आर्यसंबंधस्योत्कर्षाधायकत्वेन विधित्सितयोः समा
साङ्गाङ्गीभावः वाक्यदोषत्वं तद्यथा न दुष्टम् सोयं बहुव्रीहितत्पु
रुषः समासः एवं समासान्तरेपि विरुद्धमतिकृद्यथा श्रितक्ष
मारक्तभुवः शिवालिंगितमूर्तयः विग्रहक्षपणेनाद्य शेर
ते ते गतासुखाः १ अत्र क्षांतिमतो नुरक्तभुवः कल्याणलिंगि

ताः श्रुतदुष्टपदेन दुःखाभाववत्त्वं तः श्रोतृत्वेऽपि विवक्षिते भ्रमि
पतिताः कश्चिदस्यानानि शिवाभिमानिलिंगिताः शारीरत्वपदे।
नगतप्राणेंद्रियाः श्रोतृत्वेऽपि विकल्पं प्रतीयते अमतपरार्थेऽपि वि
रुद्धोऽप्यर्थो विवक्षितत्वेऽपि ततो भेदः नचप्रकाशितविरुद्धसं
करः तत्रार्थस्यात्र तु शाब्दस्य व्यंजकतया विशेषात् पदैक।
देशो यथासंभवमुदाहरणानि तत्र श्रुतिकटु यथा ॥ अल
मतिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरसत्वात्संगरा
मेनांगनायाः इति यदि शतकृत्वस्तत्त्वमालोचयाम स्तद
पि न हरिणाक्षीं विस्मरत्यन्तरात्मा १ एकत्रपदे वा श्रुति
कटुकत्वे पददोषत्वम् पदस्यैव कटुत्वप्रतीतेः एकस्मि
न्तथात्वे पदैकदेशदोषत्वम् नचैवं सोऽप्येकत्वाद्दोषप्रत्ये।
कं पददोषाभावात्कथं वाक्यदोषतेति वाच्यम् नहि नाना
पदस्पष्टत्वे वाक्यदोषता किंतु नानापदस्पृक्त्वमात्रेण साच

पदावच्छेदेन तद्देकदेशावच्छेदेनेति कोविदाः त्वादित्य
स्यकदुत्वासंगतौ ॥ तत्सिद्धौ रूपं देवकार्यमध्यीयम
र्थान्तरलभ्य एव अपेक्षते प्रत्ययमंगलब्धैवीजांकुरः प्रा
गुदयादिवांभः १ अत्र सिद्धौ लब्धैव तदुदाहार्यम् नि
हतार्थं यथा यच्चासरो विभ्रममंडलानां संपादयित्री। नाः=
शिखंडैर्विभर्त्ति वलाहकच्छेदविभक्तरागामकालसंध्या
मिव धातुमत्ताम् १ अत्र मत्ताधातुः सहिद्धौ वायंसत्प्र
सिद्धः निरर्थकं यथा आदावंजनपुंजलिप्तवपुषां श्वा
सानिलोल्लासितप्रोत्सर्पद्विरहानलेन च ततः संतापिता
नां दृशाम् संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरंगेक्षणा १ अत्र ह
शामिति बहुवचनमविवक्षितार्थमेव हरणयोपात्त
म् एकस्याः कुरंगेक्षणाया दृग्बहुत्वासंभवात् अलसवलि

का॰प्र॰
२२

तेन्याद्विवक्षाव्यापारभेदाद्भुक्तत्वमिति चेन्न तत्रेक्षणार्थेरितिव
चनतदनुपादानात् न च भावसाधनतया दृग्धातुरेव
व्यापारे वर्तते अञ्जनलेपनादिविशेषणानन्वयप्रसंगा
त् एवं च कृतत्वात्मनेपदत्वमपि निरर्थकम् साध्यतत्त्वमपि
वा निरर्थकमेवाविशेषणात् प्रधानक्रियाफलसंबंधस्य क
र्त्रर्थविवक्षणात् नन्वनाप्तिविनाप्यनद्रुतिवत् कर्त्रभिप्रेत
क्रियाफलत्वाभावे आत्मनेपदमसाध्वेव न तु निरर्थकम्
नाप्यतत्त्वमपि वा निरर्थकमेवाविशेषणात् एवं द्वयोरप्य
र्थयोर्बहुवचनमसाध्वेवेति उच्यते आप्तिविनाप्यद्रुत्यऽने
नाप्तिव्यात्मनेपदं नियमयता ऽनाप्तिविनतद्भावो बोध्यते
तस्याप्यावचनेनतस्य युक्तमसाधुत्वम् तथा स्वरितञितः कर्त्रभि
प्राये क्रियाफले इत्यनेन तत्कर्त्रभिप्रेतक्रियाफलविवक्षायां
तन्नियमयता पराभिसंबंधविवक्षायां तन्निषेधः प्रतिपाद्य २२

22

ते इति तत्रैवासाधुत्वं ननु कर्त्रभिप्रेतत्वाभावमात्रे अत एव कर्त्र।
भिप्राय इति किम् पराभिप्रेतक्रियाफले मा भूदित्यवोचत् ननु
कर्त्रभिप्रेतक्रियाफलत्वाभाव इत्यवोचत् न चात्र पराभिप्रेतक्रि
याफलत्वं द्योत्यं किंतु कर्त्रभिप्रेतक्रियाफलद्योतनमात्रमिति तेना
साधुत्वम् एवं बहुष्वपि बहुवचनमित्यत्र तत्र बहुष्वपि बहुवचनं नि।
यमयत् द्व्येकयोरुपस्थितयोस्तन्निषेध इति ननु बहुत्वाविवक्षा।
मात्रे इष्टामित्यत्र वचनं हि द्वित्वैकत्वे विवक्षिते येनासाधुत्वं स्यात् किं
तु बहुत्वाविवक्षामात्रमित्यनर्थकतैवेति युक्तमुत्पश्यामः एते।
नावयवाभिप्रायेणासाधुत्वमेवेति चण्डीदासमतमनादेयम्।
अवाचकं यथा चापाचार्यस्त्रिपुरविजयी कार्तवीर्यो विजेयः खा
ण्डव्यस्तः सदनमुदधिर्भूरियं हन्तकारः अस्त्येवैतत्किमु कृतव
ता रेणुकाकण्ठबाधां बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः १।
अत्र विजेय इति यत्प्रत्ययः कृत्यप्रत्ययार्थे प्रयुक्तस्तत्रावाचकः अ
श्लीलेषु व्रीडादायि यथा अतिपेलवमतिपरिमितवर्णं लघुतर

का॰प्र॰
२२
13

मृदाहृतिपाठः परमार्थतः सहृदयं वहति पुनः कालकूटघटितमि
व १ अत्रपेलेतिपेलवशब्दैकदेशो गुह्याङ्गस्मारकतया व्रीडादायी
जुगुप्सादायी यथा यः पूयते सुरसरिन्मुखतीर्थसार्थस्नानेन शास्त्र
परिशीलनकीलनेन सौजन्यमान्यजनिरूर्जितमूर्जितानां सोऽयं द
लोः पतति कस्यचिदेव पुंसः १ अत्रपूयेतिपूयव्यंजकतया जुगुप्सा
दायि अमंगलं यथा विनयप्रणयैककेतनं सततं यो भवदंगनाद
ग्रः कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः १ अत्रप्रेतेतिभा
गोऽमंगलस्मारकः संदिग्धं यथा कस्मिन्कर्मणि सामर्थ्यमस्य नोत्तमते
परम् अयं साधुचरस्तस्मादंजलिर्बध्यतामिह १ अत्रचरभागो भूत
पूर्वे चरडिति चरट्प्रत्ययो वा चरेष्ट इति टान्तश्चरधातुर्वेति संदेहात्स्वयं सा
धुरिति वा साधुश्चरतीति वार्थ इति संदेहः नेयार्थं यथा किमुच्यतेस्य
भूपालमौलिमालामहामणेः सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते
१ अत्रवचोबाणपदाभ्यां गीर्वाणो विवक्षितः न च तत्र समर्थः गीर्वाणपदा
द्व्योरेव समस्तयोस्तदर्थे रूढत्वेन तु तत्पर्यायान्तराणाम् अत एव गीः पदा २२

द्विमाद्येऽपि तत्रासमर्थः पर्यायपरिवृत्त्यसहत्वात् तस्माद्वचः
स्याद्वेनगीःश्याद्योऽलक्ष्यते नचतत्र वृत्तिःप्रयोजनंवेतिनेयार्थता
एवंजलध्यादिमाद्येऽपि पदपरिवर्तनंद्रष्टव्यम् परंतुतत्रोत्तरप
दमेवपरिवृत्त्यसहम् वडवानलादौतुपूर्वपदमेवेतितदन्यपद
परिवर्तनेऽप्यदोषः नन्वसमर्थत्वं विवक्षितार्थाप्रतीतिःसाम(
र्थ्यविरहएवोच्यताम् सचप्रसिद्ध्यभावात्समयाद्यभावाद्धेत्व
प्रयुक्तावाचकनिहतार्थादयोऽप्यसमर्थभेदाभवितुमर्हन्तीतिकि
मितिपृथगुक्तिः दिष्टा इति चेन्नध्यमात्य एवंत्वन्येऽपरालंकारिकैर्भेदा(
नदर्शिता इति तथैवनिर्दिष्टाः किंच वैजात्याभावेऽपिशिष्यबु
द्धिवैशद्यायतत्तद्भेदावक्तव्याएवेत्यतोऽपिविभज्योक्ताइति ॥ ॥
अथवाक्यमात्रदोषलक्षणमाह ॥ प्रतिकूलवर्णमुपहतलु
प्तविसर्गंविसंधिहतवृत्तम् न्यूनाधिककथितपदंपतत्प्रकर्षं
समाप्तपुनरात्तम् ५३ अर्धान्तरैकवाचकमभवन्मतयोगमन॰

नभिहितवाच्यम् अपदस्थपदसमासंसंकीर्णंगर्भितंप्रसि
द्धिहतम् ५४ भग्नप्रक्रममक्रमममतपरार्थंचवाक्यमेव।
तथा ॥ अत्रापिच्युतिद्वियोगाभ्यामर्थद्वयोपस्थितौलक्ष्यल
क्षणाभ्यांवाक्यत्वोपपत्तिः वाक्यमेवतथा प्रतिकूलवर्णत्वा
दिकंवाक्यएवदोषोनतुपदादिष्वपीत्यर्थः तत्रप्रतिकूल
वर्णविवक्षितरसादेःप्रतिकूलाश्चननुगुणाःवर्णायत्रत।
त् अनुगुणत्वंवर्णानांगुणविवेचनावसरेवक्ष्यते शृंगा
रेयथा अकुंठोत्कंठयापूर्णमाकुण्ठंकलकण्ठिमाम् कंबु
कण्ठ्याःक्षणंकण्ठेकुरुकण्ठार्तिमुद्धर १ अत्रटवर्गःशृं
गारप्रतिकूलः अटवर्गादित्यादिनानिषेधात् रौद्रेयथा
[illegible]
[illegible] ॥ देशःसोयमरातिशोणितज
लैर्यस्मिन्ह्रदाःपूरिताःक्षत्रादेवतथाविधःपरिभवस्तातस्य

केशग्रहात् तामेवाहंनिहन्तेतिबसमरङ्कुरूणपस्खाणीभास्वंतिमेयद्धा
मेणाकृतंतटेवजडहतेद्रोणात्मजः क्रोधनः । अत्रमस्टवोवर्णाः प्र
तिकूलाः ओजस्विनिरसे विकटवर्णत्वस्य दीर्घसमासत्वस्य चानु
गुणत्वात् यथा प्रागप्राप्तनिशुंभशांभवधनुर्द्वैधाविधाविर्भव
क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धः क्षणात् उज्वालः
परशुर्भवत्वषिथिलस्त्वत्कण्ठपीठातिथिर्येनानेनजगत्सुखंड
परशुर्देवोहरःख्याप्यते । इत्यत्र यत्रनक्रोधस्तुर्यपादेतत्र
षिथिलएवप्रयोगः अपदस्थस्यापिरौद्रादिविरोधितयास्मन।
श्रुतिकटुभेदत्वम् नचश्रुतिकटोरेतद्द्विविधत्वम् तस्यसहात्म
योगेप्यात्मलाभात् अस्यतुवाक्यव्यापित्वेन अतएवास्मन।
पदद्दोषत्वम् एकत्रतादृशवर्णप्रयोगस्यरसाविरोधित्वात् ।
दोषत्वबीजमपि अस्यरसस्यविरोधित्वमेव अतएवनित्यदोषो
यम् नीरसादावात्मलाभाभावात् श्रुतिकटोस्तुनीरसादावात्म

का॰ प्र॰ २५
25

लाभादनित्यत्वमिति महान्भेदः इदं तु चिंत्यम् रौद्रादिरसे श्लो ५/२
काद्यपर्यंतं समासेनैकपदे प्रेङ्खाप्राये ऽस्य न कथं पददोषत्वमि।
ति अथान्यसाहित्येन दोषत्वं वाक्यदोषत्वम् निरपेक्षदोषत्वं तु
पददोषत्वमिति चेन्न एवं क्लिष्टादावपि पददोषत्वं न स्यात् किं
बहुना यादृशाविवक्षया क्लिष्टत्वं पददोषत्वेनोक्तं तयादृशमपि त
स्यैनिरूप्यः पददोषविभागः ॥ उपहतलुप्तविसर्गम् ॥ उपहतविस
र्गं लुप्तविसर्गं चेति द्वयमित्यर्थः उपहता ओत्वं प्राप्ता लुप्ता वा विस
र्गा यत्रेति बहुवचनांतो विग्रहः एकविसर्गस्य तथात्वे वैरस्यात् उप
घातश्च ओत्वप्राप्तिः उपघातांतरस्य तु दोषांतरेऽन्तर्भावात् ते
न नैरंतर्येणोत्वप्राप्तबहुविसर्गत्वम् तथा लुप्तबहुविसर्गत्वं
च लक्षणं द्वयोरेकस्यैवोदाहरणम् यथा धीरो विनीतो निपुणो।
वराकारो नृपोत्र सः यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभावि
ताः १ स्पष्टकतावीजं बंधपारुष्यमसमुच्चययोर्हेतुः अतएवाऽयं

२५

नित्यः अत्रापीदं चिन्त्यम् भूयो महीयो नित्यप्रयोगो विसृष्टि
नर्त्वस्याद्दोषः कथं न पदद्दोषत्वमस्येति ॥ विसन्धिः ॥ विरू
पः संधिः सन्निकर्षो यत्र वैरूप्यं च त्रिधा विश्लेषोऽश्लील
त्वं कष्टत्वं च विश्लेषस्तु प्राप्तस्य संश्लेषस्य संहिताकार्यस्या
भावः स चान्यत्र विभाषयेति वचनादैच्छिकः आनुप्रासि
कस्य तत्रान्त्यः प्रगृह्यादित्वात्सर्वत्रासिद्धमित्यादिना वि
सर्गादिलोपासिद्धेर्वा द्विविधः नैयायः सकृदपि वर्तमा
नो दोषाय इच्छानिबंधनत्वेनाप्राप्तिसूचकतया प्रथमत
एव सहृदयोद्वेजकत्वात् अन्त्यो त्वसकृदानुप्रासनिक
त्वेनाप्राप्त्यनन्तरज्ञापकतयावंऽपाकृष्यत्वे तयोर्दोषत्व
म् नच्चासकृत्प्रयोग एव तत्रैरूप्यवतामनुगामश्चान्यत
मत्वेन अश्लीलकष्टानार्थत्वमेव वा एवं त्रिप्रकारेऽपि विश्ले
षे आद्यप्रकारत्रयं यथा राजन्विभान्ति भवतश्चरितानि ता

निःदोर्दण्डनिर्दयनियानिरसानलेन्तः धीदोर्बलेऽप्रतिनते
उचितार्थवृत्तीआतन्वती विनयसंपदमेत्यभातः १ अन्योय१
था ननउदितउदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः
निजवंशाउदात्तकांतकांतिर्बतमुक्तामणिवच्चकास्त्यनर्घ्यः १
हृपकताबीजमसमर्थम् अश्लीलत्वं यथा वेगाड्डीयगग
नं चलन्नामरचेष्टितः अयमत्रपतेपत्रीनततोत्रैवरुचिंकुरु १
अत्रचिंकुरित्यश्लीलम् कष्टत्वं यथा उर्ध्वसावत्रतर्वालीब
र्वैत्रेचार्वेवस्थितिः नात्रर्जुर्युज्यतेगंतुंशिरोनमयतन्मना १
कु १ अत्रहृपकताबीजंपदद्दोषप्रस्तावेउक्तमिति अत्रापी
दंचिंत्यम् समासेनैकपद्येऽश्लीलकष्टत्वानिबंधनविश्लेषा
णामश्लीलकष्टासाधुमध्यगवेषोपिलोपासिद्धिर्निबंधन १
विश्लेषस्यपदेपिसद्भावात्कथमसमस्तपदद्दोषत्वं यथा भू
यउच्चैर्महउदात्तमप्याउदाररत्नि वयंत्वतर्कयामः सकलप्रमे

दर्भिन्ना एते दोषाद्दूषणान्तरासंकीर्णा वाक्य एवेति वाक्यसे।
वनश्चेति नियमार्थः अत एव न पददोषविभागस्त्वनतापि
नादृष्टास्येव पददृष्टत्वेस्तत्र विभागाच्चिति हतवृत्तम् हतं वृत्तं
यत्र तत् हतत्वं चाश्रव्यत्वं गुरुकार्याल्लघुपादान्यलघुवर्णा।
त्वप्रकृतरसाननुगुणत्वं वा अनुचितमत्वेनैषामनुगमः अश्र
व्यत्वं च लक्षणाननुगमात् यतिभंगात् स्थानविश्लेषेणावि
श्लेषयोगाच्च यथाहतत्वमश्रव्यत्वमेव तच्च गुर्वादिनिरूपल।
क्षणाननुगमात् यतिभंगात्स्थानविश्लेषेणाविश्लेषयोगा
त् प्लावविधानाद्वा वैस्वस्य लघोर्गुरुकार्याक्षमत्वात् प्रकृतर
सानुगुणत्वाच्च तत्राद्यं यथा यस्मिन्पंचपंचजना आका
शश्च प्रतिष्ठितः तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः १
अत्र श्लोके पंचमस्य गुरुत्वाच्छंदोभंगः यतिभंगो वर्णाश्रयेय
था अमृतममृतं कः संदेहो मधूनामपि नान्यथा मधुरसमधिकं च

का॰प्र॰
३७
27

तस्यापिप्रसन्नरसंफलम् सकृदपिपुनर्मध्यस्थः सत्रसांनरवि
जनोवदतुयदिहान्यस्वाडप्रियारदनच्छदात् १ अत्रहरिणीछं
दसिषष्ठेदशमेचयतिरुचिता चतुर्थेतुयदिहान्यदित्यत्रतद्भंगः १
मात्राहृतेस्यानविश्लेषेगणाविश्लेषयोगो यथा जंपरिहरउंतीरहस्स
णाअंविणसुंदरत्तणगुणेण अहगावरंजस्सदोसोपडिवक्कवेहिं।
पिपडिवणो १ अत्रार्यायांद्वितीयतृतीयोसगणोभगणौतौचतु।
र्थाविधोछन्दः प्रास्त्रिगाडःश्रवत्वेनप्रतिपादितौ पादांतलघो
र्गुरुकार्याक्षमत्वं यथा विकसितसहकारतारहारिपरिमलगुं।
जितपुंजितद्विरेफः नवकिसलयचारुचामरश्रीर्हरतिमुनेरपि
मानसंवसंतः १ अत्रवापादांतस्यगुरुत्वाछंदोभंगाभावेपिप्र
थमपादांतवर्तिनेरिकारस्यलघोर्गुरुकार्यकरणाक्षमत्वम् ननु
वत्रारिष्टतत्कार्येक्षमत्वाददोषः तस्मात्हारिप्रमुदितसौरभे
निपठनीयम् नकेवलंप्रथमतृतीयपादयोरेवायंदोषः किंतु

अन्ययोरपि तत्र चतुर्थपादे यथा अन्यास्तागुणरत्नरोहणभुवो
धन्या मृदन्यैव सा संभाराः खलु तेन्य एव विधिना यैरेष सृष्टो युवा
श्रीमत्कांतिजुषां द्विषां करतलात्स्त्रीणां नितंबस्थलाद्दृष्टे यत्र पत
न्ति मूढमनसामस्त्राणि वस्त्राणि च १ अत्र वस्त्राण्यपीति पाठे
गुरोरेव संयोगपरतया स्वरूपतो लघुरपि गुरुकार्यकारी संपद्य
ते एवं द्वितीयपादेप्यूह्यम् एषु चाश्रवानामसहचर्यो ह्रीजनीड
ष्टताबीजम् अतो नित्यदोषोयम् प्रकृतरसाननुगुणत्वं यथा
हान्तप्रहावुधमहाकविबंधो विप्रसहस्रसमाश्रय देव मगधविद
ग्धसभांतररत्नकासि गतः खवयं च तवेति १ इदं दोधकच्छंदं
श्लोकाननुगुणम् नहि दोधकमिहास्य व्यंजकत्वात् अस्य च प्रतिकू
लवर्णदुष्टताबीजम् नीरसे च नास्यात्मलाभमिति नित्यदोषता
न्यूनाधिकं यथा न्यूनाधिकमित्यादि न्यूनपदमधिकपदं कथि
तपदं चेत्यर्थः तत्र न्यूनपदं न्यूनं पदं वाचकं यत्र तत् यथा

का॰प्र॰ कन्हननतायांत्वअनभिहितवाच्यत्वमितिदोषः उदाहरणम् तथा
भूतांदृष्ट्वानृपसदसिपांचालतनयांवनेव्याधैःसार्द्धंसुचिरमुषि
२८ तंवल्कलधरैः विराटस्यावासेस्थितमनुचितारंभनिभृतंगुरुः
28 खेदंखिन्नेमयिभजतिनाद्यापिकुरुषु १ अत्रपादत्रयमध्येअ
स्माभिरितिविवक्षितंयस्यपूर्वमित्थमितिचपदंनास्ति आवश्यप
केचनते अन्यथाकर्तृत्वलाभादेकवाक्यत्वासंभवाच्च अर्थश्चे
नाद्दृष्ट्वाएवविवक्षितंदृष्टिग्राहकस्येवायमपराधः यत्राविधेयप
वननाद्दृष्ट्वाविवक्ष्यतेतत्रार्थएवदुष्टइतिसाकांक्षत्वंदोषान्त
रमितिचेदुच्यतेविवक्षितार्थप्रतिपत्तिप्रतिबन्धकताबीजमतोऽत्रटि
तिआक्षेपाहितस्तल्लाभेनक्वचिद्रसादिपरिपोषकत्वेनचादो
षत्वमित्यनित्योऽयम् अधिकपदं यथा स्फटिकाकृतिनिर्मलः
प्रकामंप्रतिसंक्रान्तनिशातशास्त्रतत्त्वः अविरुद्धसमन्वितोक्ति
युक्तिःप्रतिमल्लास्तमयोदयःसकोऽपि १ अत्रस्फटिकमेवनि
२८

र्मलतायाउपमानंविवक्षितमुपात्तोऽस्याक्रान्तिपदेयथाकथं
चित्तेनैवोपमितिपर्यवसितिपर्यवसानादित्याक्रान्तिपदमधि।
कंनतुन्यूनत्वाद्दुष्टार्थेनसंकरत्वमितिवक्ष्यते नकेवलंसमा।
सएवपदाधिकंपदंकिंत्वसमासेऽपि यथा इदमनुचितमक्रम
श्चपुंसांयदिहजरास्वपिमान्मथोविकारः यदपिचनकृतं
नितम्बिनीनांस्तनपतनावधिजीवितंरतंवा १ अत्रकृतमि।
त्यधिकंपूर्वार्द्धवाक्येनैवप्रतीतिपर्यवसानात् कृतंप्रस्तुतप्र।
क्रमभंगमावहति पूर्वार्द्धेऽकरणात् तथाचयदपिचनकुरं
गलोचनानामितिपठनीयम् निष्प्रयोजनपाहस्रवणेन।
श्रोतुर्वैमुख्यंवक्तृतावीजमतोहर्षाद्यावभिष्वंगेनदोष
त्वम् कथितपदंयथा अधिकरतलतल्पंकल्पितस्वाप।
लीलापरिमिलननिमीलत्पाण्डिमागण्डपाली सुतनुक
थयकस्यव्यंजयत्यञ्जसैवस्मरनरपतिलीलायौवराज्याभिषे

का·प्र·
३१
१८
२७

कम् १ अत्र लीलापदं द्वारद्वयमनुपात्तम् हृषकनाबीजं च क
वेरपुत्रानुवृत्तयत्नेन श्रोतृवैसुख्यमतो लाटानुप्रासाद्दावदोष
त्वम् अपुत्रानुवृत्तयात् इदं तु चिन्त्यम् समासे सत्येकस्मिन्न
पि पदे व्यवधानाल्लाटानुप्रासविरहेपि संभवात्कथं नपद।
दोषमिति पतत्प्रकर्षम् अलंकारस्यपबंधहतनस्यवाप्रकर्ष
स्यपत्रोत्तरोत्तरपतनो निकर्षः यथा कस्कः कुत्र न चुर्चुरा।
यितचुरीचोरोचुरेत्स्तूकरः काः काः कं कमलाकरं विकमलं।
कर्तुं करीनोद्यतः केके कानिवनान्यरण्यमहिषानोन्मूल
येयुर्यतः सिंहीस्नेहविलासबद्धवसतिः पंचाननोवर्तते
१ अत्र तत्कलाभिधानेपिविकटबंधहतनोनुप्रासहतनस्य
प्रकर्षः सिंहाभिधानेपतितः हृषकनाबीजं चापुत्रानुवृत्तय
यत्नेन श्रोतृवैरस्यम् रसानुगुणानयातत्स्यानेपि नदोषः
समासगुणनवदातम् समासगुणनवदातं वाक्ये समासेगुन

३१
२५

स्यादन्वयिग्राह्योपादानं यत्रेत्यर्थः यच्च समासे वाक्ये विशे
षविशेषविधायि विशेषणांतरोपादानकत्वं तल्लक्षणमि
ति तत्र प्रागुक्तसमासेन्यादौ वाक्यांतरारंभे विशेषणांतरा
नुपादानेन तल्लक्षणाविरहेण तत्रानित्यदोषत्वमुत्पादन
विरोधात् उदाहरणम् ॐकारः स्मरकार्मुकस्य स्फुरत्क्री
डापिकीनां रवो ॐकारो रतिमंजरीमधुलिहां लीलाचको
रीध्वनिः तन्व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्
कंकणक्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः
१ अत्र तनोतु वस्समासमेव वाक्यं नववय इत्यादि विशेष
णेनोपात्तम् निराकांक्षत्वं च हृष्टकता बीजम् अतश्चानि
त्यदोषोऽयं वाक्यांतरारंभेन तदभावात् अर्द्धांतैकवाचकम्
द्वितीयार्द्धगतमप्रधानहेत्वाद्यर्थकमेकवाचकं यत्र तत्

का·प्र·
३·
30

यथा महताचरणापातं गम्यतां भूः सदर्भा विरचयं सिचया।
नंमूर्भिधर्मः कठोरः नहि निजजनकश्री लोचने स्फारणोतिः वधि
पथिकवधूभिर्वीक्षितामितिदिनाच १ अत्र भृशं सदर्भा नं नस्य त्व
साचरणापातं गम्यतामिति वाक्यं तत्र च न हि स्पर्शं न रसनम्
अत्र च निराकांक्षत्वनाङ्क्षिवीजं भक्तनमात्रस्यैव भृशं सदर्भत्व।
स्याक्षेपादिना हेतुत्वप्रतीतेः यस्मात्कर्त्रो दर्शनं तथाप्रतिपत्ति।
स्तस्याङ्गीनरोपादानेपि आत्मलाभ एव नास्ति न तल्लाभेपि वान।
दोषत्वमिति निर्दिष्टं वाईदृगनेकवाचकपोषमनुत्तराईम् यथा वक्षःस्थ
लेमुक्तादस्यकौस्तुभांकं कपर्दिनः चूडालो बालचंद्रोणाजटाजूटः स
पातुवः १ अभवन्मतयोगम् अभवन्मतो अभिमतो योगो यत्र। नं४
त्र नचाविमृष्टविधेयमध्येस्यान्तर्भावः उपजीव्यत्वेन भेदा
दितिकेचित् वस्तुतस्तु तत्र पदार्थयोरुपस्थितयोरन्वयो भ।
३·

वस्येव यत्वमभिमतेनाग्राधान्यादिनारूपेण अत्रतु संबंधएवत
योर्नप्रतीयतेइतिमहान्भेदः नन्वेवमभवन्मतयोगमित्यत्रयोग
मतत्वविशेषणानर्थक्यमितिचेन्न एकवाक्यस्थपदोपस्थापिता
न्वादिरूपस्ययोगस्यसर्वत्रापिसत्वात् मतत्वंचान्वयबोधविषयत्व
मित्यप्रसंगः एतच्चक्वचिद्विभक्तिभेदात् यथा येषांतास्त्रिद
शेभदानसरितःपीताःप्रतापोष्मभिर्लीलापानभुवश्चनन्दनत
रुच्छायासुयैःकल्पिताः येषांहूंकृतयःकृतामरपतिक्षोभाःतपा
चारिणांकिंतैस्त्वत्परितोषकारिविहितंकिंचित्प्रवादोचितम् १ ॥
अत्रयैरित्यस्यविशेष्यतयातपाचारिणामित्यर्थोविवक्षितः नचते
नतैस्तस्यायोगःप्रतीयतेविभक्तिभेदात् अपयैर्लीलापानभुवः
प्रकल्पितायेषांयैःप्रतापोष्मभिरित्यादिप्रकारेणायच्छब्दाभिधेय
योरेवतयोरन्वयोस्तुकिंविशेष्यान्तरविवक्षयेतिचेन्न अतवाच्यानां
हिविधेयेनैवसाक्षादन्वयोनततमनन्तर्भाव्यानुवाद्यान्तरेणाच
ज्ञात्वस्याभयत्रानुल्पनायाविशेष्यत्वविनिगमनायाअभावात्

का॰प्र॰
३१
31

नचैतदुक्तं गुणानांचपरार्थत्वादसंबंधः समत्वात्स्यादिति अ
तएवाङ्गगुणेष्वेकस्याधिन्याविंगाद्यासीमार्कीणतनीत्याङ्गणपादी
नांविंगाद्यपादिभिर्नान्वयोनापिगावान्स्याअपितुयसाधना
त्वेनगुणत्वात् विशेषणविभक्तिवैयर्थ्याच्च किंतूक्तयैव
कथंतर्हिधर्मेतरस्येदाङ्गपादिभिः कयइतिचेन्न अङ्गपादी
नांगवांतानामार्थसमाजात् नहि नहदेवात्राप्यार्थएवसमा
जोस्त्विति चेत् भवेदेवंयदिनद्दसमानविभक्तिकत्वंभवेत् ।
कथंतर्हिभवत्यभिमतोयोगइतिचेत् त्वपाद्यादिभिरितिपाठे
कथम् सकलयत्पदनिर्दिष्टानांतत्पदेनपरामर्शेतेषांसर्वेषां
त्वपाद्यादित्वावगतेः क्वचिन्नञ्नत्वादिनिवंधनोयथा त्वमेव
सौंदर्यासचरुचिरतायाःपरिचितःकलानांसीमानंपरमिहयु
वामेवभजथः अयिद्वंद्वंदिष्ट्यातदितिसुभगेसंवदतिवामतः
शेषंयत्स्याज्जितमिहतदानींगुणितया १ अत्रमंगलशेषस
पोरगुणानांजयप्रयोजकत्वान्वयोविवक्षितः सचद्विधासंभव

३१

ति यदि त्यस्य चेदित्यर्थकतया तद्यदिपदार्थयोर्विवक्षया
वा तयोर्यदि प्रथमेन तात्पर्यं तदा वाचकतया हि तीये तु
मूलपदत्वमिति न च मूलपदस्यापि सूत्रैवान्तर्भावः का
चिन्मूलपदे पि अध्याहारादिना मतयोगासंभवे विलंबादे
रुद्दृष्टत्वसंभवात् क्वचिदाकांक्षाविरहाद्यथा संग्रामांग
णासंगतेन भवता चापे समारोपिते देवाकर्णय येन येन स
हसा यद्यत्समासादितम् कोदंडेन शराः शरैररिशिरस्तेना
पि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रय
मू १ अत्र पूर्वार्द्धे नोत्तरार्द्धस्य योगो विवक्षितः न च कथंचि
त्संपद्यते तथा हि अर्थानां वाक्यार्थे योगः क्रियात्वेन कार
कत्वेन वा संबंधित्वेन वा एवं विशेषणतया वा हेतुत्वलक्ष
णत्वादिना वा तदादिना पूर्ववाक्यार्थमनूद्य वाक्यान्तराव
ष्टंभाद्वा ऐकवाक्यतया वा भवेत् तत्र कोदंडादेः प्रथमान्त

का॰प्र॰
३२

नीयपंचमषष्ठाः पदार्थास्तद्विशेषणतानासंभाविनः एवंकार
कत्वमपिकर्मकर्तृभावास्यामन्यत्रचरते तत्रश्च्याकाणां नक्रि
याया पदार्थमात्रस्यकर्मत्वेविवक्षितेकोदंडप्रारानितिद्वि
तीयास्यात् अथपरस्परमान्वितामिलिताः पदार्थाः कर्मन
प्रत्येकम् अतोनप्रत्येकवाचकानकोदंडादिप्रारान्हित्वि
येतिचेन्न नहिषुरुषमातिपदिकार्थमात्रार्थत्वात् कोदंडाः
प्रारान्हत्वादिप्रथमास्यात् माहिष्वंदधिसप्तावर्करंपयश्त्वादि
वत् अथसमादनक्रियायोः कोदंडादीनांकर्तृतयाप्रारादी
नांतकर्मभावेनान्वयइतिचेन्न प्रारान्समादितमित्यन्वयात्
किंच येनयस्समादितंकोदंडेनप्राराः समादितास्तदाकर्णा।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका हरेण सह
साश्लिष्टा शिवाय यास्तु वः । अत्रौत्सुक्यग्राहत्वात्सहसाप्रसरणादि
पोनुभावो नौत्सुक्यमसंदिग्धं प्रतिपादयितुमीष्टे भयादिसाधारण
त्वात् अतएव हराडौत्सुकेत्यादिपद्ये व्रीडादीनि विवलितत्वादिभि
रनुभावैरुपनिबध्नन्नेव रसिकशिरोमणिरमरुककविरौत्सुक्यं स्वपदेनैवो ।
पात्तवान् दोषत्वाभाववीजमुक्तं प्रागित्यवधेयम् त्वरादीनां भयादिसा
धारणपेक्षौत्सुक्यपादिनास्वकासेन विशेष्यमाणास्तएवासाधारणमा
सादयन्तौत्सुक्यादिं व्यंजयन्ति इत्यास्वादोदयः ननु ग्राह्यास्वतास्त्वनिपष्ठा ।
व्यभिचार्यादीनां वाच्यत्वासहत्वमुत्पादनात् अतएवात्र नवैयर्थ्यम ऽ
पि विशेषणत्वेनोपयोगात् हराडौत्सुकमित्यादौ तथाहमहिम्नावि ।
शिष्टस्यैवानुभावस्य कल्पनमिति नो भिव्यक्तिरिति एवं च व्यवस्थिते

६३

ग्राह्येन तदुपस्थितिं विना न तदनुभावस्यासाधारण्यम् नच तेन वि-
नाभिव्यक्तिर्व्यभिचारिव्यक्तिं विना स्वादसंभवो नच तेन विनाभावमध्य
प्रवेशो न च तमंतरेण तस्याकीर्तनं युक्तमिति भावस्योत्कीर्तनमपि
नादरणीयस्य व्यभिचारिणः स्वशब्दवाच्यतया दोषाभावं साधयतीति
युक्तमुत्पश्यामः ॥ संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥
६३ ॥ प्रकृतरसविरुद्धं व्यभिचार्यादि यदि बाध्यत्वेनोच्यते तदा हृदे-
होषत्वं प्रत्युत प्रकृतरसपरिपोषकतया गुणत्वम् अत्र व्यभिचारि-
णो यथा क्वाकार्यं शशलक्ष्मणः क्वच कुलं भूयोपि दृश्येत सा दोषा-
णां प्रशान्तये श्रुतमहो कोपेपि कान्तं मुखम् किं वक्ष्यन्त्यपकल्मषाः
कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्यो-
धरं धास्यति ॥ इत्यादौ अत्र चतुर्षु पादेषु पूर्वभागप्रतिपाद्यानां व्यामा
गानां वितर्कमतिशंकाधृतीनाम् उत्तरभागप्रतिपाद्याभिरभिलाषौ-
गस्मृताभि दैन्यौत्सुक्यस्मृतिदैन्यचिंताभिस्तिरस्कारस्वरसः संचिंतायामे

वपर्यवसानमितिभावस्थावल्लनापरिपोषकत्वान्मुख्यत्वम् पांडुक्षा
मंवदनंहृदयंसरसंतवालसंचवपुः आवेदयतिनितांतंक्षेत्रियरो
का० प्र० गंसखिहृदंतः १ इतियथेपांडुत्वादीनांरोगानुभावत्वस्याविरहेपि
६५ विप्रलंभशृंगारेसमारोपादंगभावंप्राप्यादोषत्वाभावइतिध्वनिका
65 रः तदयुक्तम् तेषामुभयसाधारणत्वाद्विरोधस्यैवासिद्धेः विभावस्य
यथा सत्यंमनोरमारामाः सत्यंरम्याविभूतयः किंतुमत्तांगनापां
गभंगलोलंहिजीवितम् १ अत्रपूर्वार्धेशृंगारस्यपरार्धेशांतस्यवि
भावः अनयोर्विरोधेपिपूर्वार्धस्यबाध्यत्वेनैवोक्तत्वान्नदोषत्वंप्रस्तु
तस्यांतपरिपोषाद्गुणत्वम् एवंह्यत्रप्रतीयते सर्वारामादयःसत्ये
वजीवितेनसौकर्यार्थमुपादेयाः जीवितंचातिभंगुरमितिकिंकृतं
तेषामुपादेयत्वमनोरम्यत्वेपिनिष्फलत्वादिति नन्वेवंपूर्वार्धप्र
तिपाद्यस्यबाध्यत्वेपिमत्तांगनापांगभंगस्यनेनविरोधोनपरिहृतः
नचतत्रनशृंगारप्रतीतिरितिवक्तुंशक्यम् तदुपादानवैयर्थ्यप्रसंगा ६५

दितिचेन्न तत्ररसाप्रतीतिस्तद्व्यंजकानुभावाद्यप्रत्ययात् किमर्थं
तर्हि तदुपादानमितिचेत् दृष्टांतपरिपोषणार्थमेवेति ब्रूमः स ए
कथमितिचेत् जीवितस्यातिभंगुरत्वप्रतीतेः सापि कुत इतिचेत्
जीवितादप्यधिकमपांगस्यास्थैर्यं सकलजनप्रसिद्धम् अतस्त
थाविधभंगुरस्यापांगस्योपमानत्वेनोपादानात् न चैतदुक्तं
जीवितादप्यधिकमपांगस्यास्थिरत्वमिति प्रसिद्धभंगुरत्वोपमा
नतयोपात्तं दृष्टांतमेव पुष्णाति केचित्तु प्रसिद्धभंगुरत्वसाधर्म्ये
ण जीवितोपमानतयोपात्तमिति निर्व्याचक्षते ध्वनिकारस्तु
भवत्येवात्र शृंगारप्रतीतिः परंतु तयारूढजिह्विकान्यायेनो
न्मुखीकृत्य विनेयाः दृष्टांते रसे विनेष्यंत इत्यदोषता यद्वा काव्य
शोभानिमित्तमेव तदुपादानाद्दोषत्वाभावः नहि विना शृंगारेण
काव्यशोभेति समाधेयं तत्रातिमनोरमम् शृंगारप्रतीत्यनुपपत्ते
मेपि शृंगारदृष्टांतयोर्नैरंतर्याभावेन प्रथमसमाधेरसंभवात् द्वि
तीयसमाधिरपि तदास्वाद्यदशायां तद्योगेन चारुत्वं नानुभूयेत न

का॰प्र॰
६५
65

त्वेवम् किंच रसमात्रेणाचारुत्वमित्यपि न शक्यते वक्तुं प्रागेव शृं
गारमात्रेणेति यतश्चित्रकाव्येऽलंकारादेव चारुत्वप्रत्ययः न
रसात्तत्र प्रतीतरसादनुप्रासमात्रेणवा चारुत्वसंभवान्नोत्तरोपि समा
धिरिति अविरोधोपायांतरमाह ॥ आश्रयैक्ये विरुद्धो यः स।
कार्यो भिन्नसंश्रयः रसांतरेणांतरितो नैरंतर्येण च यो रसः ६३।
यो रसस्तु यत्र विरुद्धस्तस्यानुबध्यते रसानां विरोधो हि द्विधा समा
नाधिकरणतया नैरंतर्येण चेति तत्र वीरभयानकयोरेकाधिक
रणे विरोध इति भिन्नाधिकरणप्रतिपक्षगतत्वेन भयानको वर्ण।
नीयस्तथासति तत्संदेहदोषत्वम् प्रस्तुतवीरपरिपोषः यथा मम॥
आहूतापि पदं दधाति न पुरो न प्रार्थितापीक्षते साहूतं परिभावि
तापि वक्रुधाः किंचिन्न चाभाषते आश्लिष्टापि न समुखीनिश्च
यत्नं गानिमृदुत्रायाकोपोद्रेकवशाद्वदेवतरुणी यदीयद्विषा
मु १ न चात्र शृंगारभयानकयोरपि विरोधः वक्ष्यमाणक्रमेण
द्वयोरप्यन्यांगत्वात् अधिकरणत्वाच्च यद्यप्यालंबनभेदेनैका ६॥

अथवावपिवीरभयानकयोः क्वचित्तु भूयस्त्वे तथापि न तथावा।
प्तिरिति भिन्नाश्रयत्वेन निवेशनीयौ एवमन्येषामपि द्र।
ष्टव्यम् यस्य तु येन रसेन नैरन्तर्येण विरोधः सोऽविरोधिना
रसान्तरेणान्तरितो निबद्धव्यः यथा नागानन्दे शान्तजीमूत
वाहनस्याहो गीतमहो गीतमहो वादित्रमित्यनेनाद्भुतमन्तर्नि
वेश्य मलयवतीं प्रति शृङ्गारो निबद्धः न केवलं प्रबन्ध एव
रसान्तरव्यवधिना विरोधनिर्हृतिः किंत्वेकस्मिन्नपि वाक्ये।
यथा भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहु
मध्याः गाढं शिवाभिः परिरभ्यमाणान्सुराङ्गनाश्लिष्टभुजा
न्तरालाः १ सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगाना
मुपवीज्यमानान् संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः
कल्पलतादुकूलैः २ विमानपर्यङ्कतले निषण्णाः कुतूहला
विष्टतया तदानीम् निर्दिश्यमानांल्ललनाङ्गुलीभिर्वीराः स्वदे
हान्पतितानपश्यन् ३ अत्र विप्रलम्भस्य वीरस्य कर्तृः सर्ववाक्या

का॰प्र॰
६६

66

न्वयित्वेन विमानाधिरोहणादिनामध्ये उत्साहप्रतीतेर्वीभत्स।
शृंगारयोरविरोधः यद्यप्यत्र वीर एव प्रधानमन्येच तद्व्यभिचा।
रिणाविति नाविरोधस्तथाप्येवमप्यविरोधः संभवतीत्युदाहृतम्
अविरोधहेत्वन्तरमाह ॥ स्मर्यमाणो विरुद्धोपि साम्येनाथ विव।
क्षितः अंगिन्यंगत्वमाप्तौ यौ तौ न दुष्टौ परस्परम् ॥ ६५ ॥ तत्र स्मर्य
माणत्वेनाविरोधो यथा अयं स रशनोत्कर्षी पीनस्तनविमर्दनः
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः १ समरभुवि पतितं भूरि
श्रवसो हस्तमालोक्य तद्वधूनामिदं वचनम् तथा च शृंगारांगम
पि पूर्वावस्था स्मर्यमाणा तथोद्दीपनविभावत्वेन करुणपरिपोषि
केत्यविरोधः साम्यविवक्षया यथा दंतक्षतानि करजैश्च विपाटिता
नि प्रोद्भिन्नसांद्रपुलके भवतः शरीरे दत्तानि रक्तमनसा मृगराजव
ध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि १ पाटनं खंडनं प्रस्रवजनिता
तिबुभुक्षावशेन निजापत्यमेव भोक्तुमारभमाणायै सिंहवध्वै परम
दयालुर्जिनस्तद्रक्षार्थं स्वशरीरदायकं प्रतीयमुक्तिः अत्र दयावीरस्याऽ

६६

नुभावविभावैः शृंगारस्योपमानभावेनांगम् नचात्रद्वयोरपि विषयो
पकारकत्वेनांगम् वीरज्ञानां स्वाभाविकद्वयापरीतत्वेन विषया
जनकत्वात् एकत्रांगिनि विरुद्धयोरंगत्वं द्विधा तुल्यकक्षतयांगा
गिभावेन वा साक्षात्परस्यांगमासाद्य वा तत्राद्येनाविरोधो यथा ।
क्रामन्त्यः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः पातित
यावकैरिव पतद्बाष्पाम्बुधौताननाः भीता भर्तृकरावलंबितकरास्त्व
द्वैरिनार्योधुना दावाग्निं परितो भ्रमंति पुनरप्युद्यद्विवाहा इव १।
अत्र चाटुके या राजविषया रतिस्तत्र करुणशृंगारावुभावपि साक्षा
दंगमिति तन्निर्वाहेणैव व्याकुलयोस्तयोरेकराजकार्यापत्तयोरविव
भक्तयोः सहजातो विरोधोपि न दोषाय यथा एहि गच्छ पतोत्तिष्ठ
वद मौनं समाचर एवमाशाग्रहग्रस्तैः क्रीडंति धनिनोर्थिभिः १ अ
त्र प्रधाने क्रीडायामंगभावेन भावाभावयोरपि न विरोधः एहीति
क्रीडंति गच्छेति क्रीडंतीति प्रकारेण तयोरंगत्वात् तस्माद्विधेययोरेव
विरोधो दोषाय न त्वनूद्यमानयोरपीति परमार्थः प्रकृतोदाहरणेव

का॰ प्र॰
६७
67

पुनरप्युद्यद्विवाहादवेक्ष्यमेदानेनपह्निराछेतिवस्तुतापेक्षयोरपिसा
त्नादेवांगत्वम् नातः प्रोक्तप्रभावोयेनासौपुनर्विवाहउमेदानेर
तिप्रतीतिपर्यवसानात् शृंगारभावेनपरांगतयाविरोधोयथा
क्षिप्तोहस्तावलग्नःप्रसभमभिहतोप्याददानोंशुकांतंगृह्णन्केशे
ष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण आलिंगन्योवधूतस्त्रिपु
रयुवतिभिःसाश्रुनेत्रोत्पलाभिःकामीवार्द्रापराधःसदहतुदुरितंशां
भवोवःशराग्निः १ अत्रत्रिपुररिपुप्रभावातिशयस्यकरुणोंगम् ।
तस्यतुशृंगारः नन्वेवंकरुणस्यप्राधान्येनतत्रैवविश्रांतेरुभयोरंग
त्वासंभवेकथमुदाहरणत्वमितिनवाच्यम् शृंगारापेक्षयाहिना
स्यप्राधान्येपिनतत्रैवविश्रांतिरितितस्यापिप्रभावेपर्यवसानेव य
तः यथाकामुकःपूर्वंकरालंबनादिकमकार्षीत् तथासंप्रतिशराग्नि
रितिउपमानतयाशृंगारपरिपोषितेनकरुणेनप्रभावातिशयएव
प्रकर्षमानीयते नचांगांगस्यकथमंगत्वमितिवाच्यम् तदुपकृत
स्यांगस्योपकारविश्रामाधायकतयातस्याप्युपकारकत्वात् यद्वा

६७

गुणाः कृतात्मसंस्काराः प्रधानं प्रतिपद्यते प्रधानस्योपकारे हि तथा भूयसि व
र्त्तते इति ननु प्राकरणिकपादितद्रूपवैयर्थ्यान्तरसंपर्कशून्यस्य रसस्य रसान्तरेण
विरोधो नाप्यङ्गाङ्गिभावस्तस्य स्वकक्ष्यमेवैतत्सर्वमिति चेन्न रसपदेनात्र
प्रकरणे स्थायिभावस्याभिधानात् रसपदनिरुक्तेः ॥ इति श्रीगो
विन्दठक्कुरकृते काव्यप्रदीपे दोषोल्लासः सप्तमः समाप्तः ॥ ७ ॥ एवं
दोषे निरूपिते गुणालंकारौ प्राप्तावसरौ तयोर्गुणस्यान्तरङ्गतया
प्राथम्यम् विप्रतिपद्यन्ते केचिद् गुणालंकारयोर्भेदे किं च सामान्य
तो लक्षिते विशेषलक्षणमुचितमिति कारिकाद्वयेन तयोः स्वरूपद
र्शनमुखेन भेदकलक्षणमाह ॥ ये रसस्याङ्गिनो धर्माः शौर्यादय
इवात्मनः उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ६६ ॥ आत्म
नः शरीर इवात्मवत्काव्ये प्राधान्येन स्थितस्य रसस्य धर्माः साक्षात्तदा
श्रितास्तद्धर्माः अचलस्थितयः इत्यत्र पृथक्स्थितत्वस्याव्यभिचारिस्थि
तय इति यावत् अव्यभिचारश्च रसेन तदुपकारेण च तेन रसं विना
येनावतिष्ठन्ते अवतिष्ठमानानां चावश्यं परसमुपकुर्वन्तीत्यर्थः अत
एवानयोर्व्यतिरेकमलंकारे वक्ष्यति एवं च रसोत्कर्षहेतुत्वे सति
रसधर्मत्वं तथात्वे सति रसाव्यभिचारिस्थितित्वम् अयोगव्यवच्छे

का.प्र.
९८
68

द्वेन रसोपकारकत्वं चेति लक्षणत्रयं सगुणानां द्रष्टव्यम् अलंकारस्मात्रभेद
कं तु सत्वं न भागाविभक्तमिदमेव ग्राह्यम् अन्यथा विशेषणवैयर्थ्यात् ।
चंडीदासस्तु रसधर्मत्वमात्रं लक्षणम् उत्कर्षहेत्वचलत्वं तु गुणग्राहकप्रहलि ।
बीजमित्याह नदयुक्तम् शृंगारत्वादेर्धर्मेतिव्याप्तेः ननु रसधर्मत्वम
प्यसिद्धं कथमन्यथा नीरसेपि सुकुमारादिवर्णेषु ललितमधुरत्वा ।
दिव्यवहारो रसवत्यपि दीर्घसमासवर्णाभाववत्यमधुरादिव्यवहार इति ।
उच्यते शौर्यादयस्तावदात्मन एव धर्मा इत्यविवादम् एवमपि तु क्वचिद्
शूरेपि आकारमहत्वादियोगिनि शूरव्यवहारः शूरेप्याकारलाघवा ।
दियोगिन्यशूरव्यवहारश्च तत्त्वस्य हेतोः अथ क्वचिच्छूरव्यवहारवि
षये विततकृतिदर्शनादाकार एवास्य शूर इत्यौपचारिकत्वं ।
वसायस्त्वनभियुक्तानामाकार एवैतावता शूरपदवाच्य इति विपर्या ।
सादहङ्कारदर्शिनस्तथा व्यवहरंति नतु तावता क्वचिदुपचारत इति ।
कल्प्यम् हं तैवं मधुरादिरसयोगिनि सुकुमारादिवर्णेषु केमधुरादि
व्यवहारो वर्णानां वायं मधुरादिरित्यौपचारिकमपि दृश्याच्चाभियुक्ता ।
नाम् वर्णा एवैतावन्तो माधुर्यभागिनि विपर्यासाद्रसपर्यन्तावगाहिबु ।
द्धि विधुरा व्यवहरंति नत्वालोचिनस्तु क्वचिदुपचारादिति तत्त्वमेतत् ननु

वृत्तित्वाच्चावस्थितत्वादेवं स्यान्मैवं तत्सिद्धावविनिगमकाभावादिति चेन्मैव
म् भवत्वेवं विनिगमकाभावो यदि त्वया वर्णमाधुर्याश्रयो गुणोऽस्तीति स्वीक
र्तुं शक्यते न त्वेवम् श्लिष्टाक्षरवर्णरचनायामपि तदभ्युपगमात् तथा च र
समात्रवृत्तित्वे लाघवं वर्णरचनोभयवृत्तित्वे तु गौरवम् यतश्चैवमत एव
माधुर्यादयो रसधर्माः समुचितैर्वर्णादिभिर्व्यज्यन्ते न त्वेव सम्पृक् व्यंजक
त्वं चैषां यथा तथोदाहरिष्यते इति नातिप्रसङ्गशङ्का ॥ ॐ उपकुर्वन्ति तं स
न्तं येऽङ्गद्वारेण जातुचित् हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ६७ अ
ङ्गिनो रसस्याङ्गभूतौ शब्दार्थौ तद्द्वारेण तदतिशयाधानमुखेन ये धर्मा रसमु
पकुर्वन्ति ते अलङ्काराः तत्र शब्दद्वारेणानुप्रासादयः अर्थद्वारेणोपमादयः
यथा कण्ठाद्यङ्गोत्कर्षद्वारेण शरीरिणोऽप्युपकारका हारादयः सन्तमिति
यत्र रससम्भवस्तत्रैतदुपकुर्वन्ति यत्र तस्यासम्भवस्तत्रोक्तिवैचित्र्यमात्रप
र्यवसिता इति भावः जातुचित् न तु नियमेन तथा च सन्तमपि रसं क
ञ्चिन्नोपकुर्वन्तीत्यर्थः एतावता रसावृत्तित्वं चलस्थितित्वं च दर्शितम् ।

तथाचरसोपकारकत्वेसतितद्वृत्तित्वम् तथात्वेसतिरसव्यभिचारि
का॰प्र॰ त्वमनियमेनरसोपकारकत्वंचसामान्यलक्षणत्रयमलंकाराणांगुण
६९ मात्रभेदकंतुसत्यन्नभागरहितंतद्धेदितव्यम् अन्यथाव्यर्थविशेषण
69 त्वात् तत्रशब्दद्वारेणरसोपकारकंयथा ॐअपसारयघनसारंकुरुहारं
मल्ल ५ दूरएवकिंकमलैः अलमालिमृणालैरितिवदतिदिवानिशंबाला १
अत्ररेफानुप्रासः शब्दमलंकुर्वन्शृङ्गारमुपकरोतिरेफस्यशृङ्गारव्यञ्जक
त्वात् अर्थद्वारेणयथा मनोरागस्तीव्रंविषमिवविसर्पत्यविरतंप्रमा
थीनिर्धूमोज्वलतिविधुतःपावकइव हिनस्तिप्रत्यङ्गंज्वरइवगरीयान
इतोनेमांत्रातुंतातःप्रभवतिनचांबानभवती १ अत्रविषमिवेत्या
दिरुपमा साचार्थालंकारोर्थमुपकुर्वाणोरसमुत्कर्षयति विषमिवे
त्युपमावशेनविसर्पणादेरतिशयप्राप्त्याविप्रलम्भोत्कर्षात् रसंविना
प्यलंकारसंभवोयथा स्वच्छन्दोच्छलदच्छेत्यादौ चित्रभेदेसत्यपिरसे
तदनुपकारकत्वंशब्दालंकारस्ययथा ॐचित्तेविहट्टदिणटुट्टदिसा ६९ ८

गुणेसु से जाउ लोहहदिविसहहदिदिस्सहेस वोलम्मिवहहदियग्रहहदिकव्वुव-
न्धेसाणेणलुहहद्दिविरं नरुणीन रही ॥ १ ॥ अत्रानुप्रासेन ग्राह्यमात्रमलंक्रियते
न तु सत्यपि विप्रलंभः शृङ्गारः टवर्गस्य तत्प्रतिकूलत्वात् अत्र च प्रतिकू-
लवर्णत्वं न दोषः प्राकृतस्याप्योजोगुणस्याप्रधानत्वात् अस्य च तदभिव्यं-।
जकत्वादिति कश्चित् वस्तुतस्तु सत्यपि प्रतिकूलवर्णत्वे रसस्यानानुत्पत्ति-
रेव अनुभवविरोधात् किं त्वपकर्षमात्रम् न चापकर्षेऽपि विद्यमानेन ।
स्मिन् टवर्गानुप्रासस्योपकारकतेति सारम् सत्यपि रसे तदनुपकारकत्व-
मर्थालङ्कारस्य यथा मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति क्रन्दत्सु
भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् चक्राह्वेन वियोगिना विसलता
नास्वादिता नोज्झिता कण्ठे केवलमर्गलेव निहिता प्राणस्य निर्गच्छतः ॥ १ ॥
अत्रोपमार्थालङ्कारः न चासौ प्रकृतस्य शृङ्गारस्योपकारिका विप्रलम्भे
हि जीवनिर्गमोपवर्णने तदुत्कर्षाधायकत्वादिति तद्विरोधहेतुपाद

का॰ प्र॰
७.
७०

नमनुचितं प्रस्तुतस्नेहाभावे पर्यवसानात् तदेतदुक्तम् अत्र विमलतां जीवे
निरोद्धुमशक्तेति प्रकृतानानुगुणोपमेति अशक्तत्वं चानुचितत्वमिति भावः
वस्तुतस्तु नत्वनया व्याख्येयम् विमलतां जीवे रोद्धुमशक्तेत्युपमा प्रकृतान
नुगुणा प्रकृते विषये ऽननुगुणा रहिता उपमाया अननुगुणत्वं यस्मात् दूषणं तत्के
न्यात् तस्मादत्रोपमानालंकारः किन्त्वेतदानवतस्यामपि तद्दूषणादवस्थ्य
म् संभावितेनापि सादृश्येन तत्प्रतीतेः न तूपमावदत्रासमन्वयेव जीवरोध
कत्वरूपं सादृश्यमप्युत्प्रेक्षणीयकोटावेवान्तरंभूतम् यथोच्यते रोधक
मिवानिहितमिति तर्हि कथं प्रकृतोदाहरणमिति चेत् उत्प्रेक्षातो ऽस्माति
श्यायप्रतीतेः प्रस्तुतसादृश्योत्प्रेक्षया उपमोक्त्या येनापकर्षपर्यवसाना
दिति एषएव गुणालंकारविभागो विचारसिद्धो नान्यः तदेवं गुणालंका
रयोर्भेदव्यवस्थिते यत्कैश्चिदुक्तं लौकिकयोर्गुणालङ्कारयोः शौर्यादिहा
राद्योः समवेतत्वसंयोगित्वाभ्यां भेदः संभवति अलौकिकयोर्माधुर्या

७.

ह्यनुप्रासोपमाद्योरुभयोरपि समवेतत्वादेतयोर्भेदस्तस्मात्तयोर्भेदाभि
धानं गड्डलिकाप्रवाहन्यायेन तथाहि गड्डलिकामेषी काचिदेका केनचिदे
तेनानुगेन गच्छति इतरास्तु विनैव निमित्तविचारं तामनुगच्छन्तीति तथा केना।
प्यालंकारिकेण गुणालङ्कारौ केनचिदभिप्रायेण भिन्नतयोक्तौ इतरैस्तु विचा
रं विनैव तदनुसारेण तद्भेदं वदन्तीति तदसम्यगेवोदितत्वम् यदप्युक्तं वामनेन
काव्यशोभाव्यवहारनिमित्तं कश्चिदतिशयः तद्धेतवो गुणास्तदतिशयहे
तवस्त्वलङ्कारा इति तयोर्भेद इति तदप्ययुक्तम् यतः शोभाहेतवो गुणा इत्य
त्विं युक्तम् न समग्रैर्गुणैः काव्यशोभोत्पाद्यते येन केनापि आद्ये पाञ्चाली
गौडीयावैदर्भीति कथं काव्यस्यात्मा माधुर्याद्यभावेन समस्तगुणाभावाच्छो।
भावुकत्वेः अद्येशस्तावदसम्बलल्याग्निरुद्धैः प्राज्यः प्रोद्यत्तुलस्तोषप्रमदत्या
दावोजः प्रसादगुणसत्त्वात्काव्यव्यवहारप्रसङ्गः नहि मन्मत एव तन्मतेपि
तद्व्यवहारे अलङ्कारापेक्षा तेन गुणमात्रेणैव काव्यव्यवहारस्वीकारात् य
दपि गुणाहेतवः शोभातिशयहेतवोऽलङ्कारा इति तदप्ययुक्तम् स्वर्गप्राप्ति

का·प्र·
७१
७।

एवेनैव देहेन वरवर्त्तिनी अस्यार्द्दक्क्‌दृस्कोन्यक्कुरोमिनि वंसुधाम् १ इत्यत्र
दृश्यौ ईदृशेनेन मानुषदेहेनैव वरवर्त्तिन्येवमुत्कृष्टा स्थितिरित्यर्थे विशेषोक्तिरेकगुण
हानिकल्पनया शेषगुणमहार्हकल्पनाविशेषोक्तिरिति वामनलक्षणात्
उक्तरीत्या व्यतिरेकः उपमेयस्य गुणातिरेकत्वं व्यतिरेक इति लक्षणात् ए
तेषां गुणमनपेक्ष्यैव काव्यव्यवहारहेतुशोभाजनकौ एवमन्यत्राप्यूह्यम् न
न्वत्रापि प्रसादादेर्वर्त्तमानत्वात्कथं गुणानपेक्षत्वमलङ्कारयोः किंच निर्गुण
त्वे कथं तत्र काव्यव्यवहारः सगुणत्वविशेषणाभावादिति चेन्न अस्त्येव
वात्र गुणास्तथापि तानेव परं तु किंचिद्गुणत्वस्य शोभाहेतुत्वेति प्रसंगात् सम
स्तगुणवत्त्वे न घावकत्वान् नचात्र तत्सामर्थ्यम् तथा च गुणजन्यशोभामन
पेक्ष्यैवालंकाराणां शोभासम्पादित्विति तात्पर्यम् इदानीं गुणानामलङ्कार
भेदं सिद्धे दशविधत्वं खण्डयितुं त्रैविध्यमाह ॐ माधुर्यौजःप्रसादाख्यास्त्रय।
स्तेन पुनर्दश ॥ विभागक्रमेणैषां लक्षणमाह आह्लादकत्वं माधुर्यं शृङ्गा
रे द्रुतिकारणम् ६८ आह्लादकत्वं यथानन्दहेतुत्वे तेहि न शृङ्गारस्यापि त ७१

सोऽवरसानां कत्वेन तज्जनकत्वात् आनन्दरूपत्वे चेत्तर्हि सर्वेषामेव रसानामि
त्यत आह द्रुतिकारणमिति द्रुतिश्चेतसो गलितत्वमिव गलितत्वमपिहे।
षादिजन्यकाठिन्याभावः तथाच यद्दर्शनेनश्रवणेनमनस्कतेव समुत्पद्यते त
दाह्लादकत्वस्वरूपं माधुर्यमित्यर्थः घटकम् गलितत्वमिवाह्लादपदव्या
ख्येयेदत्त माधुर्यं नाम शृङ्गारेप्रतोहं गाहृते गुणा इति क्वासावित्यत आह
शृङ्गारइति शृङ्गारपदं संभोगपरं विप्रलंभेतिशयस्य वक्ष्यमाणत्वात् भाक्
रत्न श्रव्यत्वं माधुर्यस्य लक्षणमाह तदयुक्तम् ओजःप्रसादयोरपितथा
त्वेनातिव्याप्तेः श्रुतिसुखत्वाच्च तत्किं संभोग एव माधुर्यमित्यत आह ॥ करुणेवि
प्रलंभेतच्छान्तेचातिशयान्वितम् संभोगात्करुणेतस्माद्विप्रलंभेततोपि।
शान्तेतिशायितं माधुर्यम् हास्यादेरुपगमेनातिद्रुतिहेतुत्वात् इयांस्तुवि
शेषः संभोगविप्रलम्भयोस्तत्त्विः सपत्नं शान्तेतु जुगुप्साद्यन्वयादेलेशा
नुविद्धमिति दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः ६९ दीप्तिस्वरू
पायामनसो विस्तृतिर्ज्वलितत्वमिव तथाच यद्दर्शनाज्ज्वलितमिव मनो

जायते नत्वोज इत्यर्थः क्वेदमित्यत आह वीररसस्थितीति अस्याधिकरणा
न्तरमाह बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च वीराद्बीभत्से ततोपि रौद्रे
ऽखिलदीप्तेः कार्यायाः सातिशयतया कारणमोजः क्रमेणोत्कर्षवदिति हि
रौद्रयोर्निः प्रतिपन्नम् बीभत्से तु माधुर्यलवानुविद्धमिति विशेषः प्रा
धान्येन माधुर्यौजसोरेकैकविधानमत्र प्रक्रान्तमतो हास्याद्भुतभयानके
षु न किंचिद्विहितम् तेषूभयगुणप्राधान्यात् शुष्केन्धनाग्निवत्स्वच्छज
लवत्सहसैव यः ७० ॐ व्याप्नोत्यन्यत्प्रसादोसौ सर्वत्र विहितस्थितिः ॥
ओजसि वीररौद्रादिरसेषु शुष्केन्धनादिवत् माधुर्ये शृङ्गारकरुणादिरसे ।
स्वच्छशर्करावस्त्रादिसम्बन्धिजलवद्यो गुणोन्यद्व्याप्नोति चित्तं झटित्येव र
सेन व्याप्नोति स प्रसादः करुणस्यापि स्वातन्त्र्यविवक्षया इति निर्देशः ।
अयं च सर्वेषु रसेष्वाधेयतया सर्वासु च रचनासु व्यंग्यतया स्थित इति तन्त्रे
णाह सर्वत्र विहितस्थितिरिति कथं तर्हि तत्त्ववेदिनामपि शब्दार्थयोर्मा
धुर्यादिव्यवहार इत्यत आह ॥ गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता

गुणवृत्तिरुपचारः आकारे शौर्यस्येव व्यंजके सुकुमारवर्णादौ तदुपचार उ-
क्तार्थः। तेषां गुणानाम् तत्र कलक्षणेष्वेवाद्ययोर्विदग्धाद्युत्पद्यत्वाल्लक्ष-
णस्य यथावत्पुनरसंगमाद्यपि दर्शितम् अत आह केचिदन्तर्भवन्त्येषु दोषत्यागा-
त्परे श्रिताः अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ७२ एषु मडकलव।
लेषु माधुर्यादिषु त्रिषु श्लेषोपलक्षणमलङ्कारध्वन्यारप्य भावस्य दर्शयिष्य-
माणत्वात् उक्तानुभावादिहेतव्ययोपादानमप्युपलक्षणं वैचित्र्यमात्रप-
र्यवसानस्यापि दर्शयिष्यमाणत्वात् दोषत्यागादिति दोषाभावरूपत्वा-
त्तद्व्यापकतया वा दोषत्वम् कुत्रचिदिति दोषस्याभावस्य गुणस्वभावा।
नौचित्यात् स्वभावभङ्गप्रसङ्गात् तथाहि श्लेषत्वमनेकेषामपि पदा-
नामेकवद्भासनं समाधित्वमारोहावरोहयोः क्रमः सचोत्कर्षापकर्षयोर्वै-
रस्यानाधायको विन्यासः उदारत्वं विकटाक्षरत्वं तच्च नृत्यद्भिरिव पदैर्याव-
टनात् तत्र प्रसाद ओजोमिश्रितशैथिल्यम् सर्वशैथिल्यस्य दोष[illegible]त्वात्
तदेतच्चतुष्टयमोजस्यन्तर्भूतम् यद्यपि दीप्तिजनकत्वरूपे रसनिष्ठओ।

नक्लिष्टत्वमत्रभावः तथापि तत्स्वीकारे तत्स्वीकृतेन श्लेषकगाढबन्धत्वलक्षणो
न दत्वभावरूपस्यार्थः एवमर्थेऽपि दुष्करादेरूपं माधुर्यमसृष्टाभावाद्दोषाणाम् य
थोक्तमाधुर्यव्यञ्जकत्वेन समासस्याविधानात् अर्थव्यक्तिस्तु स्फुटितार्थसम
का॰ प्र॰ र्पकतया या साच प्रसादपदेनैव दोषाभावयथोक्तप्रसादस्य तद्व्यञ्जकत्वात् समता
त्वारब्धवैदर्भ्यादिमार्गापरित्यागः साच क्वचिद्दोष एव यथा मातङ्गाः किमु
७२ वेल्लितैरित्यादौ प्रारब्धस्य मसृणवर्णत्वस्य सिंहाभिहतेत्यत्र त्यागो दोषाय न
72 त्वनित्यागत्वप्रत्युतगुणत्वप्रत्युक्तम् नच दोषस्याभावस्य गुणत्वम् स्वभावस
द्भूप्रसङ्गात् सुकुमारत्वनिष्ठुराक्षराप्रायत्वम् नच कष्टत्वरूपदोषाभावपर्य
वसन्नम् कान्तिरुज्ज्वलता उज्ज्वलत्वं तु ग्राम्यपदादिपरित्यागे तेन सापि ग्राम्य
त्वरूपदोषाभावपर्यवसन्नैव एवं दशशब्दगुणा न पृथग्वक्तव्याः अर्थगु
णा अप्येवम् तथाहि अर्थस्योजः प्रौढिः साच पदार्थे वाक्यरचनं वाक्यार्थे ७२
च पदाभिधा प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य चेति प्रतिपादितपञ्च
प्रभेदाः तेषामादिभेदचतुष्टयं किं वैचित्र्यमात्रं न गुणत्वं तेन विनापि काव्यव्यव

ह्लादनमाधुर्यादिनिरूपे ह्लादनचमेनन नह्यवहारापवर्गेणात् अत्र संक्षेपो दोषगुणार्थरू-
पदोषाभावरूपत्वमत्र : एवं प्रसादो दोषैर्नैर्मल्यम् प्रयोजकमात्रपरिग्रह इति याव-
त् सोऽप्यधिकपदत्वरूपदोषपरित्यागादेवान्यथासिद्धश्चिरैः माधुर्यमुक्तिवैचि-
त्र्यं नवीकृतत्वरूपदोषाभावरूपं सौकुमार्यं पुनः पारुष्यं परुषेऽप्यर्थेऽपरुषशब्दा-
भिधानमिति यावत् तच्चामङ्गलत्वरूपाश्लीलत्वपरित्यागेनैव सिद्धमिति उदारत्वम-
र्थस्याग्राम्यत्वम् तच्चाग्राम्यत्वरूपदोषाभाव एवेति अर्थव्यक्तिस्तु वस्तुस्वभावस्-
स्फुटता सा च स्वभावोक्त्यन्तर्भूता कान्तिर्दीप्तरसत्वम् सा च रसध्वनौ रसवद-
लङ्कारे गुणीभूतव्यङ्ग्ये चान्तर्भूता श्लेषस्तु क्रमकौटिल्यानुल्बणत्वोपपत्तियो-
गरूपघटना अस्यार्थः क्रमकौटिल्यमतिक्रमस्तस्यानुल्बणत्वमस्फुटता त-
त्रोपपत्तिर्युक्तिस्तस्या योग इति यथा दृष्ट्वैकासने इत्यादि अत्र पिहितनयनाम-
तिक्रम्यान्याचुम्बनादतिक्रमस्तस्यास्फुटत्वमनयानदर्शनात् तत्रोपपत्तिरे-
वम् अनयानज्ञानत्वमिति केचित्तु क्रमकौटिल्यं क्रमस्यातिक्रमः स चात्रव्य-
क्त एव एकदेशे भयानुरञ्जनात् स च श्लेषः उक्तिवैचित्र्यमात्रं न गुणः अन्य

साधारणरसोपकारित्वातिशयविरहात् प्रस्तुतरसानुसंधानेन रसव्यवधानसं
भवात् समतावैषम्याभावोऽप्यस्य च क्रमाभेदरूप इति क्रमभेदरूपदोषाभाव एव
का. दी. दोषत्वेन व्यतिरेकस्य कथमिति चेत् यतो न वेत्त्वनुन्मत्तोऽन्यप्रस्तावेऽन्यदभिध
त्ते इति समाधिः पुनरर्थदर्शनम् न चासौ गुणः काव्यशरीरत्वात् स्वयं हि सा
७४ न्यच्छायायोनिरस्यार्थस्याप्यादिदर्शनेन कथं न हि काव्यशरीरनिष्पत्तिः असाधार
75 णशोभाधायकं हि गुणत्वं ब्रुवन्ति न च काव्यशरीरनिर्वर्तकमिति उक्तयुक्तीर्बुद्धि
स्थीकृत्याह तेन नार्थगुणा वाच्याः परैरुक्ता इति हेतुनार्थगुणास्ते चोक्तयुक्त्या न पृथग्व
क्तुमर्हाः प्रोक्ताः शब्दगुणाश्च ये वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥७२॥
ये तु त्रय उपचारेण त्वन्यैः शब्दगुणाः प्रोक्ता वस्तुतो रसगुणा एव वर्णादयस्तेषां व्य
ञ्जकत्वं गताः केकस्य व्यञ्जका इत्याकाङ्क्षायामाह मूर्ध्नि वर्गान्त्यगाः स्पर्शा अट
वर्गा रणौ लघू अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥७४॥ माधुर्यव्यञ्जकाष्टव ७४
र्गवर्जिताः कादिमान्ताः रेफणकारौ चेति वर्णाः युक्ता इत्यर्थः कादयो मूर्ध्नि स
स्ववर्ग्यपञ्चवर्णगताः यथा अङ्क इत्यादि रेफणकारौ तु ह्रस्वस्वरान्तरितौ वृत्तिः स

मासस्त्वसत्त्वाभावमध्यमत्वावाइति समासः घटनानत्येति सौकुमार्यवतीप
दान्वययोगेनरचनाचेति वर्णाःसौकुमार्यवतीरचनावर्णःसौकुमार्यादेवलब्धे
तिपदान्वययोगेसौकुमार्यस्यलाभायघटनानत्येत्युक्तमिति उदाहरणम् ॐस्म
नङ्गरङ्गप्रतिमन्तदङ्गंभङ्गीभिरङ्गीकृतमाननताङ्ग्याः कुर्वन्तियूनांसहसायथैताः
स्वान्तानिशान्तापरचिन्तनानि १ योगआद्यतृतीयाभ्यामन्त्ययोरेणतुल्ययोः
टादिःशषौवृत्तिदैर्घ्यंगुम्फउद्धतओजसि ७५ ओजसिव्यञ्जकेवर्गप्रथमतृती
याभ्यांसहनदन्त्ययोर्द्वितीयचतुर्थयोर्योगः यथाकष्टपुष्टेत्यादि तयोरे
फेणाधउपरिउभयत्रवायस्यकस्यापियोगः यथावक्रार्कनिर्ह्रादाद्यः त
यातुल्ययोःकयोश्चिद्योगो यथाचित्तवित्तादौतथाटादिचतुष्टयंशषौचेति
वर्णाःसमासस्तुदीर्घः गुम्फोरचनासाचोद्धताविकटेति उदाहरणम् मूर्ध्ना
मुद्धतकृत्तेति श्रुतिमात्रेणवर्णानांयेनार्थप्रत्ययोभवेत् साधारणःसमग्रा
णांसप्रसादोगुणःस्मृतः ७६ येनश्रवणेनसमासेनवायथारचनयावाश्रुति
मात्रेणशब्दादर्थप्रत्ययःसप्रसादव्यञ्जकउच्यते उदाहरणम् ॐपरिम्लान

पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् इदं व्यस्त
न्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम् ॥ अ
न्येषां तु वर्णानामुदासीनत्वमिति तदुपादानेन गुणानङ्गीकार्येत्युच्यते नचैवं माधुर्यादेरु
क्ताद्रूपेऽरचनाद्याः सर्वे च विरुद्धाः स्युरिति वाच्यम् यतो यद्यपि गुणपरतन्त्रा रचनादय
का॰ टी॰ स्तथापि ओजस्विवाच्यप्रबन्धानामौचित्येन क्वचिन्माधुर्यादिव रचनावृत्तिवर्णानामन्य
७५ थात्वमपीष्यते ७८ अन्यथात्वं गुणपारतन्त्र्याभावः वक्तृवाच्यप्रबन्धौचित्याद्वि
75 55 रहपदत्वं गुणपारतन्त्र्यस्वीकारात् तत्रापि वक्तृक्रोधाद्यव्यञ्जकानुपयोगात् क्वचिद्वा
च्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः यथा मन्थायस्तार्णवाम्भःप्लु
तकुहरचलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघ
ट्टचण्डः कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः केनास्म
त्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥ अत्र न वाच्ये क्रोधादि ७५
दीप्तरसव्यञ्जकम् असत्स्वरूपत्वात् प्रबन्धश्च नाटकात्माभिनेयरूप इति दीर्घसमा
सत्वं प्रतिकूलं यद्यपि तथापि वक्ता भीमसेन उद्धत इति तदौचित्यादुद्धता रचना ॥ अत

सङ्घटनादिव्यक्तावेवोपयुज्यते क्वचित्तु वक्तृप्रबन्धौचित्यानपेक्षया वाच्यौचि ।
त्यादेव रचनादयः यथा ओंघ्रोद्दकेलान्तुत्पोकुलनरयभवन्नैहिकेयोपयालया
साहस्रास्रातिर्यग्वलितरविरथेनाहतानेहसामालम् ऊर्ध्वंकाकस्यवीर्यं स्तुनिमि
वमहतां कल्पपर्यन्तभाजां भाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णेन मा
र्गम् १ अत्र वक्ता वैतालिकः प्रबन्धश्चाभिनेयात्मेति दीर्घसमासानौचित्येऽपि वा
च्यस्य कुम्भकर्णाभिमार्गस्याभीमत्वेनौजस्विन्यासङ्घटनारचनादयः क्वचिद्वक्तृवा
च्यानपेक्षा प्रबन्धौचित्यादेव रचनादयः तथाहि आख्यायिकायां हि शृङ्गारेऽपि
व्यञ्ज्यतुङ्गलेवमसृणानातिमसृणावर्णादयः प्रत्युत विकल्पवत्स्वैव कथायावत्वा
त्र विप्रलम्भकरुणयोरस्तुनस्यामपि दीर्घसमासपरिहारस्तयोरतिसौकुमार्यात्
कथायां तु रौद्रेऽपि नात्यन्तमुद्धता वर्णादयः वर्णनीयमहापुरुषस्वसमर्पणस्यो
द्भयत्वात् नाटकादावभिनेयेत्वरौद्रेऽपि न दीर्घसमासादयः विच्छेदेनाभिन
यसौकर्यात् एवं मुक्तकादावौचित्यमनुसरणीयम् तथाहि एकैकच्छन्दसि वा
क्यसमाप्तिर्मुक्तकम् द्वयोः सन्दानितकम् त्रिषु विशेषकम् चतुर्षु काला

पकम् पञ्चादिचतुर्दशान्तेषु कुलकम् तत्र मुक्तकेषु कवेः रसबन्धाभिनिवेशिन
स्तेरसाश्रयमौचित्यम् यथा शून्यं वासगृहमित्यादौ रसानिवेशाभावे तु कामचारः
सन्दानितकादिषु काव्यसमासे वैकल्यम् दीर्घमध्यसमासतनावप्रबन्धगतेषु पु
का॰ टी॰ नस्तेषु प्रबन्धौचित्यमेव रचनादयस्त्वादि सेयम् इति श्रीमहामहोपाध्यायगो
विन्दठक्कुरकृते काव्यप्रदीपे गुणालङ्कारभेदनियतगुणनिर्णयो नाम अष्टम उल्ला
७६ सः ८ एवं गुणे विवेचितेऽलङ्कारा विवेचनीयाः तत्र सामान्यलक्षणं गुणावि
वेचन एवोक्तं शब्दालङ्कारार्थालङ्कारोभयालङ्काररूपविशेषलक्षणत्रयं चावशि
ष्यमिति तेषां विशेषलक्षणेषु वक्तव्येषु काव्यलक्षणे शब्दस्य प्राथम्यात्त
च्छब्दालङ्कारविशेषलक्षणं वक्तव्येषु प्रथमं वक्रोक्तिं लक्षयति यदुक्तमन्यथावा
क्यमन्यथान्येन योज्यते श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ७८ व
क्त्रान्याभिप्रायेणोक्तम् अन्येनान्यार्थकतया योज्यते सङ्गत्येति सा वक्रोक्तिरित्य ७६
र्थः श्लेषेण काक्वा चेति योजनाहेतुत्वेन विशेषलक्षणद्वयम् तथा द्विधेति
विभागः श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति द्विधेत्यर्थः श्लेषस्तु द्विधा सभ

ङ्गपदोः भङ्गपदश्च न त्वसभङ्गश्लेषेण यथा नारीणामनुकूलमाचरसि चेज्जा
नासि कश्चेतनो वामानां हितमादधाति हितकृन्नैवाबलानां भवान् युक्तं किं
हितकर्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधा
तुं कुतः १ अत्र नारीणामिति पदं स्त्रीणामित्यभिप्रायेणोक्तम् श्रोता तद्
ज्ञानशत्रूणामित्यर्थतया योजयित्वाह कश्चेतन इत्यादि अत्र वामानामिति श
त्रूणामित्यर्थो वक्तुरभिप्रेतः स्त्रीणामित्यर्थतया योजयित्वा अन्यथाह हित
कृदिति अथान्योऽबलानामिति दुर्बलार्थतया हितकृदिति कृन्तनार्थतया
योजयित्वाह युक्तं किमित्यादि अथान्यो बलाभावप्रसिद्धार्थपदमिन्द्रार्थत
या योजयित्वाह सामर्थ्यमित्यादि अत्र नारीणामबलानामिति पदे सभङ्गे ।
अभङ्गमात्रपदेन श्लेषेण यथा अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता त्रि
गुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् १ अत्र दारुणेति क्रूरेत्यर्थतया व
कुरभिप्रेतं काष्ठेनेत्यर्थतयान्यो योजितवान् काकुवक्रोक्तिर्यथा गुरुपर

सवि १

का. टी.
७७
77

तन्त्रूनयावत्तद्दूरतरं देशमनुयातो गच्छन् अलिकुलकोकिललालिते नैष्यति सुरभि
समये सौ । अत्र नैष्यतीति नायिकया निषेधाभिप्रायेणोक्तम् सख्या तु नैष्यतीति भ्र
पितु एष्यत्येवेत्यर्थकतया काक्वा योज्यते इयं च न वाक्यवाक्यमात्रे किं तु स्वतोप्य
न्येनोक्तस्यान्यथायोजनमात्रे न्यायसाम्यात् यथा मम कृष्णा वैरिविमर्दने हरिप
दस्योत्सर्जने त्वर्जुनः पीतपङ्कजलोचनाभिरभिनोनेत्राञ्जलैरञ्जलैः एकसज
नसङ्ग मेघुकरणक्षेत्रणीमतोर्थोपायस्यानेवर्णाचतुष्टयस्यावृत्ते भर्गो भवानीपते ।
अत्र वर्णचतुष्टयस्याभङ्गश्लेषः इति सार्वलौकिकं वाक्यमन्यथा श्लेषादिनास्मा
भिः समर्थितमेव मन्यदपूर्वम् अथावृत्तिनिबन्धनेष्वलङ्कारेषु रसानुगुण
तयानुप्रासः प्रथमं लक्षणीयः स द्विधा वर्णानुप्रासः पदानुप्रासश्च तत्राद्यः
वाचकवर्णमात्रावृत्तौ द्वितीयस्तु वाचकपदानुवृत्ताविति विवक्षुराह तत्राद्यं
लक्षयति येवर्णसाम्यमनुप्रासः अव्यवधानेन वर्णमात्रविन्यासो वर्णानु
प्रासइत्यर्थः प्राङ्कसाम्येऽप्यनुप्रासस्य सामान्यलक्षणमितरथा लभ्यते वर्णपदेत्या

७७

ञ्जनपरम् अतो व्यञ्जनवैसादृश्ये स्वरमात्रसादृश्ये विच्छित्तिपदादौ नास्ति व्याप्तिः । न
न चैवं सति तत्रानुप्रासशब्दार्थस्याभावात् रसादिभिरनुगतः प्रकृष्टश्च सोऽन्या
सो ह्यनुप्रासशब्दार्थः न च स्वरमात्रसादृश्ये रसानुगमो न वा सत्यपि हृद्यानुरञ्ज
कत्वलक्षणः प्रकर्षः तं विभजते छेकवृत्तिगतो द्विधा छेकगतो विदग्धा ।
श्रितस्तेषां प्रचुरमेतत्प्रयोगात् वृत्तिगतो वृत्त्याश्रितः वृत्तिश्च मधुरादिरसानु
गुणो नियतमसृणादिवर्णगतो रसविषयो व्यापारो व्यञ्जनाख्यः तयोर्लक्ष ।
णमाह सोऽनेकस्य सकृत्पूर्वः अनेकस्य व्यञ्जनस्य सकृदेकवारं साम्यं पूर्वश्छेका
नुप्रासः उदाहरणम् ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी दध्रे कामपरि ।
क्षामकामिनीगण्डपाण्डुताम् १ अत्र स्पन्दगण्डयोः द्वितीये लक्षयति एकस्या
प्यसकृत्परः ७९ अपिशब्दादनेकस्यापि असकृदावृत्तिः बहुकृत्वो वा वस्तुत
लक्षकानुप्रासभिन्नं लक्षणम् अन्यथैकस्य सकृदावृत्तेरसंग्रहापत्तेः एवं चैक ।
स्य वर्णस्य सकृदसकृद्वा अनेकस्य त्वसकृत्साम्यं वृत्त्यनुप्रास इति पर्यवसन्नम्
तत्र माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते यथा अनङ्गरङ्गप्रतिममित्यादि ।

का॰ दी॰ ७८ 78

ओजः प्रकाशकैस्तैश्च परुषा यथा मूर्ध्नामुद्वृत्तेति कोमलाख्यैः ८० ओजोमाधुर्य
व्यञ्जकातिरिक्तैः प्रसादव्यञ्जकैर्वर्णैः एतामेव केचिदलिशायिन कान्तिराहित्येन ग्रा
म्यत्वसाम्याद्ग्राम्येति वदन्ति उदाहरणम् अपसारय घनसारं कुरु हारं दूर एव ।
किं कमलैः अलमलमालिमृणालैरिति वदति दिवानिशं बाला १ केषाञ्चि
देता वैदर्भीप्रमुखा रीतयो मताः वामनादीनां मते एता एव यथाक्रमं वैदर्भी गौडी
पाञ्चाल्यो रीतय उच्यन्ते शाब्दानुप्रासमाह शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्र
तः ८१ शब्दानां स्वरूपाकारवान् शब्दः प्रातिपदिकादिः तद्गतः शाब्दः अतो
न वर्णानुप्रासस्साधारणयम् भेदे इति तात्पर्यमन्वयभेदस्त्वन्यागात् भेदेन तु
स्वरूपार्थाहा तथा च भिन्नतात्पर्यैस्तुल्यार्थकशब्दसादृश्यं लाटानुप्रासः स ।
तु लाटानुप्रास उच्यते तु अन्वयः तु शब्दो वर्णानुप्रासस्य लाटीयत्वव्यवच्छेदकः
यत्तु पुनरुक्तत्वव्यवच्छेदाय भेदे तात्पर्यमात्रत इत्युक्तमिति व्याख्यानं तदसत् ७८
मात्रशब्दस्याप्रयोजकत्वापत्तेः एष एव केश्चिन्त्यदानुप्रास उच्यते सोऽयं पद ।
स्यनाम्नो वेति द्विविधः तत्र सविभक्तिकस्य पदस्यावृत्तिः सप्रायः अन्यादृश

स्तुद्वितीयः तयोराद्योऽनेकस्य पदस्यैकस्यैव वा पदस्येति द्विविधः अय
स्त्रिविधः आवृत्त्योरभिन्नसमासस्थतया भिन्नसमासस्थतयैकस्याः स
मासस्थत्वेऽन्यस्यासमासस्थतया च समासं विनाऽप्यसमस्तत्वादिति
पञ्चप्रभेदा इति कारिकया प्रतिपादितम् तत्राद्यमाह पदानां सः ला
टानुप्रासः पदानामपि निबद्धवचनमनेकोपलक्षणम् अन्यथा द्वयोः पदयोर
वृत्तावेव प्रभेदापत्तेः उदाहरणम् यस्य न सविधे दयिता दवदहनस्तुहिनदी
धितिस्तस्य यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥ अत्र य
द्यपि पूर्वार्द्धे दवदहनशब्दस्य परार्द्धे तु हिनदीधितिशब्दस्यार्थान्तरसंक्रमि
तवाच्यत्वात्तात्पर्यभेदः तथापि शाब्दमात्रेणोदाहरणम् यद्वा अवि
शिष्टपदावृत्तेरेवोदाहरणोऽनुक्रम द्वितीयमाह पदस्यापि अपिशब्देन
स्वरतिसमन्वीयते यथा वदने वरवर्णिन्यास्तस्याः सत्यसुधाकरः सुधा
करः क्व नु पुनः कलङ्कविरहितो भवेत् ॥ नाम्नः प्रकारान्तरमाह वृत्तावन्यत्र
तत्र वा नाम्नः सदृशवृत्त्योक्ता वृत्तिनिरूपितप्रकारत्रयेणानाम्नपदत्वाल्लाटानु

का॰ दी॰
७९
79

यामऽत्यर्थः उदाहरणम् सितकरकररुचिरविभाविभाकराकारधरणि
धरकीर्तिः पौरुषकमलाकमलासापि तवैवास्ति नान्यस्य ॥ १ ॥ पौरुषकम
ला पौरुषलक्ष्मीः लक्ष्मीश्च तवैवेत्यर्थः यत्तु पौरुषं कमलमाश्रयो यस्याः
सा पौरुषकमलेति व्याख्यानं तदयुक्तम् अर्थभेदेनानुदाहरणत्वापत्तेः अ
त्र करकरेत्येकसमासः विभाविभेति भिन्नौ समासौ कमलाकमलेति पूर्वस्य
समासः उत्तरस्यासमास इति त्रयाणामुदाहरणम् तदेवं पञ्चधा मतः ८२ व्या
ख्यानम् अर्थेसत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकम् अर्थभिन्नानां
भिन्नार्थानामित्यर्थः एतच्च लाटानुप्रासे निव्याप्तिवारणाय तन्मात्रे च कृते सम
स्तसमरसोयमित्यादौ द्वितीयार्द्धे मेरर्थाभावादव्याप्तिः स्यादत उक्तम् अर्थेस
तीति यद्यर्थस्तदा भिन्न इत्यर्थः वर्णानामिति बहुवचनमविवक्षितम् द्व
योरपि यमकव्यवहारात् सेति पूर्वैर्लोकक्रमेण स्थितेत्यर्थः अतः सरोरस
इत्यादौ नातिप्रसङ्गः एवं च समानार्थत्वाभाववत्समानानुपूर्वीकानेकव
र्णानुपूर्वी यमकमिति लक्षणं द्रष्टव्यम् तदेव हि भजते पादतद्भागवृत्तितया ७९

न्यनेकताम् ८२ प्रथमपादे यदि द्वितीयपादे यम्यते तदा मुखं नाम यम
कम् तृतीये चेत् संदंशकम् चतुर्थे चेत्तदावृत्तिः एवं द्वितीयपादस्य तृतीयेन
तदा गर्भः चतुर्थेन तदा संदष्टकम् तृतीयस्य चतुर्थेन तदा पुच्छम् प्रथमद्वितु
चेत्तदा पंक्तिः महायमकमिति केचित् पदद्वययमकं तु न चमत्कारकारि प्र
योन पृथुकमिति नैकपादावृत्तौ सप्तभेदाः प्रथमो द्वितीयेन तृतीयश्चतुर्थेन तदा
युग्मकम् प्रथमश्चतुर्थे द्वितीयस्तृतीये चेत्तदा परिवृत्तिरित्यड्डीभ्यासमते
पादद्वयावृत्तौ द्वयमिति पादानां नव भेदाः अर्द्धावृत्तिस्समुद्गः श्लोकावृ
त्तिर्महायमकम् तदुभयमपि पादावृत्तिविशेष एवेत्येकादश पादयम
कभेदाः पादभागावृत्ति बहुभेदम् तथाहि द्विधा विभक्तेषु पादेषु प्रथ
मादिपादानामाद्यभागाः एवं वद्द्वितीयादिपादेष्वाद्यभागेष्वेव यदि य
म्यन्ते तदा पूर्ववन्मुखादयो दश भेदाः श्लोकान्तरे भागावृत्तिर्न स्वदते इति
श्लोकावृत्तिस्थानीय एकादशो भेदो भागावृत्तौ नास्ति एवं प्रथमादिपादा
नामन्त्यभागस्य द्वितीयादिपादान्त्यभागेष्वेव यमने पूर्ववद्दश भेदाः एवंहि

खण्डीकृतेषु विंशतिः त्रिखण्डीकृतेषु त्रिंशत् चतुःखण्डीकृतेषु चत्वारिं-
शद्भेदाः स्थानानावृत्तिनो भवन्ति अथ स्थानपरिवृत्त्या भेदाः प्रथमादिपा-
दानामाद्यादिभागाद् द्वितीयादिपादानामाद्यादिभागेषु यम्यमानत्वात्तदन्वय-
नानुसारेणाद्यादियमकप्रभेदाः भवन्ति तथाहि द्विखण्डे यथा प्रथम
का॰प्र॰ पादस्याद्यमर्धं द्वितीयपादस्याद्यार्धे चेद्यम्यते तदाद्यादियमकम् प्रथम
८० भाग एव चेदन्त्यभागेषु तदाद्यन्तयमकम् एवं प्रथमपादस्याद्यन्तभागौ।
80 द्वितीयस्याद्यान्तविभागयोर्यदि यम्येते तदाद्यन्ताद्यादियमकयोः समुच्चयः
अत्र त्रिखण्डे चतुःखण्डयोः पूर्वपादमध्यभागमुत्तरपादस्यादिभागे यदि।
यम्यते तदा मध्यादियमकम् एवं स्यादिभागश्चेन्मध्ये उत्तरपादस्य मध्यभाग
येन तदाद्यमध्ययमकम् एवं स्यान्मध्यादिभागौ चेदुत्तरस्याद्यमध्ययोस्तदा
या मध्यादिमध्ययोः समुच्चयः एवं प्रथमस्यान्तिमो भागो द्वितीयस्य मध्य। ८०
भागे चेत्तदान्त्यमध्यम् एवं स्यान्मध्यभागश्चेत् द्वितीयस्यान्त्यभागे तदाम
ध्यान्तिकम् एवं स्यादन्त्यमध्यभागौ चेत् द्वितीयस्य मध्यान्त्यभागयोस्त

लन्नमध्यान्त्ययोः समुच्चयः यद्यपि पूर्वस्यादिभागउत्तरस्याद्यभागे चेत्तदा
यमकम् अन्त्यभागस्त्वाद्यभागे चेत् तदन्त्यादिकमित्यादिप्रकारद्वयं संभव
ति तथापि द्विवेत्योर्गतमेव तद्वितिष्टद्यकृतगणने सर्वेषां चैषामपरः
समुच्चय इति भिन्नपादयमनेप्रभेदाः एवं तस्मिन्नेव पादेऽद्याद्यादिभागानां
मध्यादिभागेषु आवृत्तौ भेदा द्रष्टव्याः सर्वे चैते नियतस्थानविवक्षया स्था
नयमकभेदाः नियतेषु स्थानेष्वावृत्तेरिति अस्थानयमकभेदा अपि बहे
वो भवन्तीति प्रभूतत्वमभेदयमके तदेतत्काव्येऽडम्भृतमिति तावत्स्वलक्ष
णं कृतम् दिङ्मात्रं तल्लक्ष्यते तत्रैकपादाभ्यासेषु सन्दंशो यथा सन्ना
रीभरणोमायमाराध्य विधुशेखरम् सन्नारीभरणोमायस्ततस्त्वं पृथिवीं
जय १ द्विपादाभ्यासे यमकं यथा विनायमेनोनयतासुखादिना वि
नायमेनोनयतासुखादिना महाजनोऽदीयतमानसादरं महाजनोऽदीय
तमानसादरम् १ श्लोकाभ्यासे महायमकं यथा स त्वारम्भरतोऽवश्य
मवलम्बिततारवम् सर्वदारणमानैषीद्दवानलसमस्थितः १ द्विरव

ऽर्धे प्रथमपादे पादस्य भागाभ्यासे द्वितीयपादान्त्यभागस्य चतुर्थपादान्त्यभागे य
मकं सन्दष्टकं यथा अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् या च मातेव
भजते प्रणते मानवे दयाम् तस्मिन्नेवाद्यन्तकं पादे यथा यदानतोयदान
का॰ प्र॰ तो नयात्ययं नयात्ययम् शिवेहितां शिवेहितां स्मरामितां स्मरामिताम्
८१ १ प्रथमपादाद्यभागस्य द्वितीयादिपादानामाद्यभागेषु यमने श्रृंखलाई।
आद्यन्तयमकमुत्तरार्द्धे आद्यभागयोः समुद्गयो यथा सरस्वति प्रसादं मे स्थि
तिं चित्तसरस्वति सरस्वति कुरुक्षेत्रकुरुक्षेत्रसरस्वति १ द्वयोरप्यर्द्धयो
राद्यभागावृत्तिके समुद्गो यथा ससार साकं दर्पेण कन्दर्पेण ससारसा श
रन्नवाना विभ्राणा नाविभ्राणा शरन्नवा १ चतुःस्वपि पादे द्वितीयभागस्य
तृतीयभागे यमनं यथा मधुपराजिपराजितमानिनीजनमनःसुमनःसु
रभि श्रियम् अभृत वारितवारिजविप्लवं स्फुटितताम्रतताम्रवणं जग ८१
त् १ एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम् वाच्यभेदेन भिन्ना यद्युग
पद्भाषणस्पृशः श्लिष्यन्ति शब्दाः श्लेषोऽक्षरादिभिरष्टधा ८४ अ
साव

र्थभेदेन शब्दभेद इति नयेन भिन्नाः शब्दाः काव्यमार्गे स्वरो न गण्यते इति
नयेन युगपदुच्चारणविषयतया यत्र श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते एक
वृन्तगतफलद्वयन्यायेन यत्रार्थद्वयप्रतीतिः स श्लेषः शब्दस्थः वर्णादि
भिरिति वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनभेदादष्टधासौ
शब्दस्थः तत्र वर्णश्लेषो यथा अलङ्कारः शंकाकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः अवस्थेयं स्थाणोरपि भवति
सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी । अत्र विधावित्य
त्र विधुविधिशब्दयोरिकारभेदाद्वर्णश्लेषः पदश्लेषो यथा पृथुकार्तस्वर
पात्रं भूषितनिःशेषपरिजनं देव विलसत्करेणुगहनं संप्रति सममावयोः
सदनम् । अत्र पृथुकानां बालानामार्तस्वरस्य पात्रम् पक्षे पृथु बहुलं का
र्तस्वरस्य पात्रं यत्रेत्यादिक्रमेण पदभेदात्पदश्लेषः लिङ्गवचनयोः श्ले
षो यथा भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी ध्यानालम्बन
तां समाधिनिरतैर्नीते हितप्राप्तये लावण्यस्य महानिधी रसिकतां लक्ष्मी

इत्येतस्मिन्वनी गुच्छाकं कुरुतां भवान्निधिमनं नेत्रेन नु वीहरेः । अत्र प्रग
णिनीउ इति स्त्रियां प्रथमैकवचनम् नपुंसकेन द्विवचनं चेति लिङ्गवचन॰
योः श्लेषः एवमग्रे एष्टव्यम् भाषाश्लेषो यथा महदेसुरसंधम्मे तमवस
का॰प्र॰ मासंगमागमाहरणे हरवहुसरणं तं चित्तमोहमवसरउ मे सहसा । अत्र
८२ प्राकृते मम देहि रसं धर्मे तमोवशमाशां गमागमाद्धर नः हरवधू शर
णं त्वं चित्तमोहोऽपसरतु मे सहसेत्यर्थकानि पदानि संस्कृतपक्षे तु महदेउ
८२ त्सवदे सुरेण सन्धा सन्धानं यस्मात् तमागमाहरणे समासङ्गमव बहुसर
णं संसारहरणं यस्मात् तं चित्तमोहमवसरे उमे हर सहसा इत्यर्थकानि पदानि
प्रकृतिश्लेषो यथा अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति सामर्थ्य
कृदमित्राणां मित्राणां च नृपात्मजः । अत्र वक्ष्यतीति वचिवह्योः लृ ८२
टि कृदिति कृन्तति करोतेः क्विपि तुल्यरूपमिति प्रकृतिश्लेषो विभ
क्तेर्वैचित्र्यविशेषहेतुतयाऽप्यग्रूपादानात् प्रत्ययपदेन्नद्गतिरित्रूप

रम् । नत्र श्लेषो यथा । रजनिरमणमौलेः पादपद्मावलोके क्षणसमयपप

रामाः सर्वे समन्तस्महत्तम् प्रमथ्यनिहमथो जातुचिन्नन्यमा तादृह्मसुचिरलरुचिः

स्यान्नन्दिना सानयामे । अत्र नन्दिनेति लिङ्गविभक्तिवचनभेदेन नाहं नन्दिनानन्दकः

स्यां नयामासा नन्दिनानन्दिनो भावो मे स्यादित्यर्थः । विभक्तिश्लेषो यथा । सर्वस्वं

हर सर्वस्य त्वं भवच्छेदतत्परः । नयोपकारसांमुख्यमायासि तनुवर्तनम् । अत्र

हर भवेत्यनयोः संबोधनत्वक्रियापदत्वाभ्यां सुप्तिङ्भेदात्त्वमेव मायासी

त्यादिक्रियापदत्वेऽपि अन्यत्वे च विभक्तिश्लेषः । एवमन्यत्राप्यूह्यम् । भेदाभा

वात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत् । नवमोऽपीत्यपि भिन्नक्रमः । उदाहरणम्

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः । शतकोटिदतां बिभ्रद्विबुधेन्द्रः

स राजते । अत्रैकार्थमात्रनियतप्रकरणाद्यभावाद्द्वावप्यर्थौ वाच्या

वेवेति । अभात्मनोऽङ्गराधिरोहतनोरित्यादिवन्न ध्वनित्वम् । ननु श्लेषस्ता

वद्विधा सभङ्गपदोऽभङ्गपदश्च । तत्राद्यः शब्दश्लेषः स्वरितादिगुण

भेदाद्भिन्नप्रयत्नोच्चार्यतया भिन्नानां शब्दानां संबन्धो जतुकाष्ठन्याया

कृतयोरेवश्लिष्टत्वात् द्वितीयस्त्वर्थश्लेषः स्वरितादिगुणाभेदादेक
प्रयत्नोच्चार्यतया शब्दभेदाभावादेकवृन्तगतफलद्वयन्यायेनार्थयोरेव
श्लिष्टत्वात् पद्मपर्यायभेदेन शब्दभेदस्तु तिनयेन द्वितीयेपि शब्दभेदस्तथा
प्युपपत्त्या शब्दभेदप्रतीतावप्येकतात्पर्यवसायात्तास्तिशब्दभेदः सएषउ
का॰ टी॰ क्तलक्षणः शब्दश्लेषोर्थश्लेषश्चानिरवकाशतया सर्वालङ्कारबाधकत्वेनाल
८२ ङ्कारान्तराणां प्रतिभामात्रमुत्पादयतीति न्यपर्यायमिष्टम् यथा स्वयं च पल्लवा
९३ ताम्रभास्वत्करविराजिनी प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा । अत्र
पूर्वार्द्धे अभङ्गः उत्तरार्द्धे सभङ्गः पदश्लेषः द्वयमप्युपमाप्रतिभोत्पत्तिहेतुः
साधर्म्याभावेन तस्याः प्ररोहाभावात् यदुक्तम् एकप्रयत्नोच्चार्याणां तच्छा
यां चैव बिभ्रताम् स्वरितादिगुणैर्भिन्नैर्बन्धः श्लिष्टमिहोच्यते अलङ्कारा
न्तरगतां प्रतिभां जनयत्पदैः द्विविधैरर्थशब्दोक्तिविशिष्टं तत्प्रतीयतामि ८२
ति द्विविधोप्यलङ्कारः सरस्वतीकण्ठाभरणादिभिर्यथास्थितत्वेनार्थालङ्कारमध्ये
पठितस्तत्कथं शब्दालङ्कारमध्ये पठित इति उच्यते दोषगुणालङ्कारा

णो शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यतिरेकाभ्यामेव निश्चते यत्र हि प
र्यायान्तरपरिवृत्तिसहत्वं नास्ति तच्छब्दगतत्वम् यत्र तु तत्सहत्वं तदर्थ
गतत्वम् यथा कष्टत्वादयो दोषा गाढत्वादयो गुणा अनुप्रासादयोऽलङ्का
राश्शब्दगताः पर्यायान्तरेण तदर्थोपस्थापनेनैषामसंभवात् व्यर्थत्वा
दयो दोषाः प्रौढत्वादयो गुणा उपमादयोऽलङ्कारा अर्थगताः पर्यायान्त
रेणापि तदर्थोपस्थापनेनैषां संभवात् उदाहृते च स्वयं च पल्लवाताम्र
त्यादौ द्वयोरप्युद्देश्यो शब्दपरिवृत्त्यसहत्वाद्द्वयोरपि शब्दालङ्कारत्वमेवोचि
तम् तत्कथमस्याप्यर्थालङ्कारत्वम् नन्वेवमर्थश्लेषः किं नास्त्येव कथमा
ह कस्तर्हि तस्य विषयः यत्र पदपरिवर्तनेऽपि न श्लेषभङ्गः यथा स्तोकेनोन्न
तिमायाति स्तोकेनायात्यधोगतिम् अहो सुसदृशी वृत्तिस्तुलाकोटेः खल
स्य च । अत्र पदे स्तोकेनेत्यादिपदस्थानेऽल्पादिपदप्रक्षेपेऽपि न श्लेषभङ्गः
यच्चोक्तम् स्वयं च पल्लवाताम्रेत्यादौ उदाहृते उपमाप्रतिभोत्पत्तिहेतु

श्लेष इति तदप्ययुक्तम् प्रस्तुतोपमेयावाचश्लेषप्रतिभोत्पत्तिहेतुः तद्बा
धकत्वात् तथाहि साधर्म्याभावेनोपमायाः प्रतीत्यभावादेव तावदुप
माबाध्या यतः कमलमिव मुखं मनोज्ञमेतत्कचति तरामित्यादौ मनो।
का॰ टी॰ ज्ञत्वस्य गुणस्य दीप्तिरूपायाः क्रियाया वा उभयोः साम्यं वाच्यं योपमानिर्व
२४ हति तथा सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिवेत्यादाव
८१ पि शब्दमात्रसाम्येनापि साधुत्वमेव साधर्म्यमात्रस्योपमाप्रयोजकत्वा।
त् तस्य चार्थरूपस्येव शब्दरूपस्याप्यविशेषेण सम्भवात् तथा हि युक्तं रु
द्रटेन स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु आश्रित्य शब्द
मात्रं सामान्यमिहापि संभवत इति अथात्र साधर्म्यसम्भवेऽपि नोपमा। १८
साधारणधर्मप्रयोगस्य त्वाहि कमलमिव मुखमित्येतावन्मात्रादि।
रुपमाविषयः अत्र तु शब्दरूपसाधारणधर्मप्रयोगाभावेन निवेज्ञा।
न्या हृतत्वं तदपि न युक्तम् सर्वोपमायाः निर्विषयत्वापत्तेः।

साधारणधर्मप्रयोगेउपमात्वाभावान्नरप्रयोगोन्वयपूर्णत्वात् नदे
नडजातु नचकमलमुखमित्यादिसाधारणधर्मप्रयोगाभावेउप
माविषयत्वनिवर्तकंपुनःपूर्णोपमायानिर्विषयत्वापत्तेः केचित्तु
नलुप्तस्यथाख्याचक्षते तथाहि यत्रसाधारणधर्मोद्धारेपिउप
मासंभवतिप्रसिद्धत्वात्सउपमाविषयोनचात्रतथेत्याक्षेपः
सिद्धान्तार्थस्तु अयंचपूर्णोपमाविषयोनस्यादिति यद्वा श्ले
षस्योपमाबाधकत्वाद्येनदं गौणक्रियते तथाश्लेषस्योपमाबा
धकत्वेपूर्णोपमानिर्विषयैवस्यात् कमलमिवमुखंमनोज्ञम
त्रहिपत्रमनोज्ञत्वसंबंधिभेदान्नानात्वेनार्थश्लेषस्वीकारा
दितिसमाधानार्थः नन्वेवंश्लेषस्यनिर्विषयत्वमसंकीर्णस्या
नाभावादितिचेन्न ॥ त्वमेवदेवपातालमाशानांत्वंनिबंधनम्
त्वंचामरमरुद्भूमिरेकोलोकत्रयात्मकः १ इत्यादिपद्येषुलंका
रांतरासंकरात् तथाहि नतावदत्रोपमा स्वार्थप्रयोगात् ना
पिपातालादिनारूपकंबाध्यम् वाक्यार्थरूपस्यतस्यासंभवेपिबा
धापेक्षयैवासंकरणविषयमिति किंत्वयेनत्वमनोभवेनेत्या

दैनास्त्येवकिंचिदलंकारांतरमितिउपमाश्लेषयोर्विभक्तोदाहर
णासंभवात् बाध्यबाधकभावानुपगमेद्वयोर्योगेसंकर एवेति
वरमभ्युपगंतव्यम् उपपत्तिपर्यालोचनेतूपमायाएवात्र विषयो
नश्लेषस्येत्युक्तमेव उपपत्तिश्चैवम् व्यपदेशाः प्राधान्येनसंभवा
तीतिवस्तुव्यवस्थितिः प्रधानंचात्रोपमा श्लेषस्यतन्निर्वाहकस्य।
तदंगत्वात् नहिश्लेषंविनासमानशब्दवाच्यत्वलक्षणं साधर्म्यमु
पमानिर्वाहकंनिर्वहति उपमायास्तुनश्लेषांगम् श्लेषप्रतीतिंविना
तत्प्रतीत्यभावेनतदनुपकारकत्वादिति यदिचोपमाव्यवस्था।
एवारणायसाधारणधर्मप्रयोगाच्छून्यउपमाविषयइतिस्वीकार्य
त्वम् तदापूर्णोपमायानिर्विषयत्वंस्यादिति तदेतदुक्तम् अन्य
थापूर्णोपमायानिर्विषयत्वापत्तेरिति नकेवलमुपमायाएवश्ले।
षवाधकत्वम् किंत्वलंकारांतरस्यापि यथा अविंदसुंदरीनित्यं।
गलल्लावण्यबिंदुकेत्यत्रविरोधालंकारस्यश्लेषबाधकत्वमिति नकेवल
उपमायाएवश्लेषबाधकत्वम् नह्यत्रार्थद्वयप्रतिपादकशब्दस्य
श्लेषो बिंदुशब्दाहित्यरूपद्वितीयार्थस्यप्रतिभामात्रविषयस्यप्ररोहा

भावात् ननु अप्रस्तुतोपि श्लेषोऽलंकारस्यास्तां विरोधाभासवदिति चेत् ।
भवेदेवं यदि विरोधाभासस्य विरोधत्वमिव श्लेषाभासस्य श्लेषत्वमभि
मतं कस्यापि भवेत् न त्वेवम् तस्मादेवंविधे विषये श्लेषप्रतिभोत्पत्ति
हेत्वलंकारान्तरप्राधान्यात् तथा च सद्वंशमुक्तामणिरित्यत्र सकु ।
लमेव वंशा[illegible]स्तत्र मुक्तामणिरिति परम्परितश्लेषरूपके रूपकं प्रधा
नम् वंशाश्राद्धे श्लेषस्तु वेणुकुलयो रूपकोपयोगितया तदंगमिति श्ले
षप्रतिभोत्पत्तिहेतु रूपकमेव व्यपदेश्यम् नाल्पः कविरिव स्वल्पश्लो
कोदेवमहान्भवान् इत्यत्राल्पः कविरिव न स्वल्पश्लोक इति श्लेषव्यति
रेके व्यतिरेकप्रधानम् श्लेषस्तु तन्निर्वाहक इति तत्प्रतिपत्तिहेतुर्व्यति
रेकः ॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः अहो दैवगतिश्चित्रा त
थापि न समागमः । अत्र पद्ये समासोक्तिरलंकारः अभिधाया नियं
मनेश्लेषस्यासंभवात् अर्थद्वयबोधकत्वाभावात् ॥ आदाय चापम
चलं कृत्वाहीनं गुणं विषमदृष्टिः यश्चित्रमच्युतशरो लक्ष्यमभांक्षीन्नम
स्तस्मै । अत्र पद्ये विरोध एवालंकारः प्रधानम् श्लेषस्तु तदंगमात्रमप्ररो
हात् ॥ कवीनां संतापो भ्रमणमभितो दुर्गतिरिति त्रयाणां पंचत्वं वय
सि न तच्चित्रमधिकम् चतुर्णां वेदानां व्यरचि न वतावीरभवता द्विषां सेना

का॰ प्र॰
८६
86

लीनामस्तुनमपि लक्ष्यंवमहाकाव्याः ॥ अत्र मदीयपद्ये काव्यलिंगस्य प्रधानस्य ।
श्लेषोंगमिति श्लेषप्रतिभोत्पत्तिहेतुकाव्यलिंगम् तस्मादलंकारांतरप्रतिभो
त्पत्तिहेतुः श्लेष इति रिक्तं वचः किंच प्रभातसंध्येवेत्यादौ प्राह श्लेषस्यार्थालं
कारत्वमिति वचनं भवतां विरुद्धम् प्राह्यानामित्येतत्त्वेन व्यपदेशस्यान्याय्य
त्वात् अपि च यस्य वैचित्र्यं कविप्रतिभासंरंभगोचरः स एवालंकारस्थानम्
स्वयं च पल्लवाताम्रेत्यादौ प्राह वैचित्र्यमेव तादृक्तु तस्यैव कविप्रतिभयामुल्ल
तयोर्हृत्कृतादिति प्राह्यालंकारत्वमेवोचितम् ननु श्लेषोऽर्थमुखप्रेक्षकः न
ह्यर्थप्रतीतिं विना श्लेषस्य चमत्कारित्वं संभवतीति अर्थालंकारत्वं श्लेषस्ये ।
ति चेन्न एवं ह्यनुप्रासस्याप्यर्थालंकारत्वं स्यात् रसादिव्यंजकस्वरूपवाच्यस
व्यपेक्षत्वेन ह्यनुप्रासस्यालंकारता अन्यथा हतिविरोधादिदोषस्य वक्ष्यमाण
त्वात् किं चैवं प्राह्ययोर्गुणदोषयोरप्यार्थत्वं स्यात् तयोरप्यर्थापेक्षत्वे एवत
याभावात् शृंगारादौ हि माधुर्यादिर्गुणः कष्टत्वादिर्दोषः यच्चोक्तमेकप्रयत्नो
च्चार्यप्राह्यत्वे शब्दश्लेषत्वमिति तदप्ययुक्तम् विधौ वक्रे मूर्ध्नीत्यादौ वर्णादिप्राह्य
भेदेपि अर्थश्लेषत्वापत्तेरित्यादि स्वयमपि विचार्यम् ॥ चित्रं लक्षयति ॥ त
च्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ८५ ॥ यद्यप्यवर्णानामाकाशगुणा
नां खड्गाद्याकृतिहेतुत्वमसंभवि तथापि विन्यस्तवर्णात्मा लिपयः सन्ति

८६

वेष्टविशेषवत्त्वेन यत्र खड्गाद्याकारमुल्लासयंति तच्चित्रमिति विवक्षितम् । न-
र्हि लिपिनिष्ठत्वाच्छब्दालंकारत्वं न स्यादिति चेन्न तादृशवर्णविन्यासं वि-
ना तादृशलिपिविन्यासाभावात् शब्दान्वयव्यतिरेकयोरभग्नत्वात् लि-
पिवर्णभेदस्य लोकप्रसिद्धिमाश्रित्य शब्दालंकारत्वमिति कश्चित् तथापि
शृंगारादिरसानुपकारकस्य कथमलंकारत्वमिति चेत् कविनैपुण्यप्रदर्श-
नविस्मयोपकारकत्वादिति गृहाण लेख्यानिर्वाह्यं चैतत् न च तादृशस्य रसोप-
कारकमिति दिङ्मात्रमुदाह्रियते तत्र खड्गबंधो यथा ॥ मारारिशक्ररामेभ-
मुखैरासाररंहसा सारारब्धस्तवा नित्यं तदर्तिहरणक्षमा १ माता नता-
नां संघट्टः श्रियां बाधितसंभ्रमा मान्याथ सीमा रामाणां शं मे दिश्यादुमादि-
टि = मा २ खड्गविन्यासो यथा नाडिकायां प्रथमं माशब्दं विन्यस्य तदूर्ध्वमारोह-
क्रमेणैकस्यां धारायां चतुर्दशवर्णान् अग्रश्लिष्टं सेति वर्णं ततोऽपरधाराया-
मवरोहक्रमेण च चतुर्दश मेति प्रथमेन माशब्देन श्लिष्टं तद्दक्षिणपार्श्वे निष्क्र-
मणक्रमेण सप्त वामपार्श्वप्रवेशक्रमेण सप्त ततो माशब्दो श्लिष्टो एवं ना- टि =
डिकामाशब्दादधः क्रमेण वर्णत्रयमेवं गंडिका तदधो मेति तद्दक्षिणपार्श्वे
निष्क्रमणक्रमेण च तद्द्वयम् वामपार्श्वप्रवेशक्रमेण च तद्द्वयम् ततो माश-
ब्दः श्लिष्टः एतन्मुष्टिनकस्य ततो माकारादधः शेषवर्णाद्वयं न्यसेत् एतन्मस्तक

का॰ प्र॰
८७

मिति मुरजबन्धो यथा सरलाबहुलारंभतरलालिबलारवा वारलाबहुला
मंदकरलाबहुलामला १ मुरजबंधः अस्य न्यासः प्रथमपादस्य वर्णाष्टकं
पंक्तिक्रमेणाभिलिख्य तेषामधोधोऽपरपादत्रयवर्णान्पंक्तिक्रमेण विलि
खेत् तत्रैतच्छ्लोकोन्यापनमार्गेण रेखायां दत्तायां मुरजाकारता भवति ॥
पद्मबंधो यथा भासते प्रतिभासार रसाभाताहताविभा भावितात्माशुभा
वादे देवाभा वत ते सभा १ अस्य न्यासः कर्णिकायां भा इति पूर्वपत्रे निर्ग
मक्रमेण सते आग्नेयपत्रे प्रवेशक्रमेण प्रति ततो भेति कर्णिकास्थं श्लिष्टं त
तो दक्षिणपत्रे निष्क्रमक्रमेण सारेति वर्णद्वयं ततस्ताभ्यां कर्णिकास्थेन वर्णे
न प्रवेशक्रमेण श्लिष्टं रसाभेति वर्णत्रयं एवमग्रेपि दिक्पत्रस्य कर्णिकाया
श्च वर्णाः सर्वत्र श्लिष्टा इति ॥ सर्वतोभद्रं यथा रसासाररसासाररसायता
क्षतायसा सातावाततवातासा रक्षतस्त्वस्त्वतक्षर १ सर्वतोभद्रः अ
स्य पादचतुष्टये पूर्ववत् पंक्तिचतुष्टयेन लिखिते प्रतिलोमादिपाठेन स एव
श्लोकः संभवितोप्यन्ये भेदा न दर्शिताः एते हि शक्तिमात्रप्रकाशका न तु
काव्यरूपतां दधत्यतिनीरसत्वादिति ॥ पुनरुक्तवदाभासो विभिन्नाका
रशब्दगः एकार्थतेव शब्दस्य ॥ एकार्थतेति एकार्थत्वावभासयोग्य
शब्दतेत्यर्थः अयमपि द्विधा सभंगशब्दनिष्ठोऽभंगशब्दनिष्ठश्च तयो ८७

गद्योर्यथा अरिवधदेहशरीरः सहसारथिसूततनूरगपादातः । भा-
तिसदानत्यागः स्थिरतायामवनितलतिलकः ॥ अत्र देहशरीर-
शब्दयोः पुनरुक्तवद्धीः सभंगौ च तौ अरिवधदा ईहा यत्र तादृशा
ज्ञारिणः शरयुक्तान्योधानुईरयतीत्यर्थकत्वात् एवं सारथिसूत-
शब्दयोः सहहठेन रथिना सह वृत्तं तनुरगपादातं यस्येत्यर्थकत्वात् दान
त्यागयोश्च सदानत्या भाति स्थिरतायामगः पर्वत इवेत्यर्थकत्वात् स-
भंगः पुनरुक्तवदाभासः शब्दमात्रालंकारत्वं चोभयोरपि शब्दयोः पर्या-
यपरिवृत्त्यसहत्वात् अभंगनिष्ठो यथा चकासत्यंगनारामाः कौतु-
कानन्दहेतवः तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ॥ अत्रांगना
रामाशब्दयोः स्त्र्यर्थकतया पुनरुक्तधीः वस्तुतस्तु अंगानेऽस्या आरमंत इत्यंगा-
नारामाः अंगनासु रमंत इति वाऽर्थ इति न पुनरुक्तिः न चात्र शब्दभंगः
शब्दमात्रालंकारत्वं चैकस्यापि परिवृत्त्यसहत्वात् एवं कौतुकानंदशब्द-
योः सुमनसो विबुधाः शब्दयोश्चेदृग्ज्ञेयम् ॥ उभयालंकारं द्वितीयमाह ।
तथा शब्दार्थयोरयम् ८८ ॥ यथा तनुवपुरजघन्योऽसौ करिकुंजररु-

का॰ प्र॰
८८
९९

यिरक्तक्षणनखरः तेजोधाममहः पृथुमनसामिंद्रो हरिर्जिष्णुः १ अत्र
तनुवपुः पृथ्वोः पुनरुक्तधीः नहि रुहस्त्वनप्याहस्यान्यार्थकत्वात् अ
यंचोभयालंकारः तनुपृथ्व्योः पर्यायपरिवृत्त्यसहत्वात् एवंकारिकुंजर।
पृथ्व्योस्तेजोधाममहः पृथ्वानामिंद्रहरिर्जिष्णु पृथ्वानां तदार्थसत्वमुभ
यालंकारत्वं द्रष्टव्यम् यद्यप्युभयालंकारोऽत्र न प्रकृतस्तथापि शब्दमा
त्रालंकारस्यैव तद्भेदस्यात्र प्रकरणेऽवश्यवक्तव्यतया तत्प्रसंगादुभयालं।
कारेषु शब्दालंकारत्वानपायाच्चोभयालंकारस्य तेऽप्ययमत्रोक्तः उभयालंका
रांतराणां तु न कोऽपि भेदः शब्दमात्रालंकारस्तु तानि तान्यत्र पठितानीति स
र्वं रमणीयम् ॥ इति श्रीमहामहोपाध्यायश्रीगोविंदठक्कुरकृते काव्यप्र।
दीपे शब्दालंकारनिर्णयो नाम नवम उल्लासः ॥ ९ ॥ अथार्थालंका
रा लक्षणीयाः तेच उपमानन्वयस्तदुपमेयोपमा ततः उत्प्रेक्षा च ससं।
देहो रूपकापह्नुती तथा श्लेषस्तथा समासोक्तिः प्रोक्ता चैव निदर्शना अ
प्रस्तुतप्रशंसातिशयोक्तिः परिकीर्तिता प्रतिवस्तूपमा तद्वदृष्टांतो दीपकं।
तथा तुल्ययोगिता यावदुक्तो व्यतिरेकः प्रकीर्तितः आक्षेपो विभावना च

विशेषोक्तिस्तथैवच यथासंख्यमर्थान्तरन्यासः स्यानांविरोधवत् स्वा
भावोक्तिस्तथाव्याजस्तुतिःप्रोक्तासहोक्तिवत् विनोक्तिपरिवृत्तीचभा
विकंकाव्यलिंगवत् पर्यायोक्तसमासोक्तीचसमुच्चयस्तुदीरितः पर्यायश्चा
नुमानंचप्रोक्तःपरिकरस्तथा व्याजोक्तिपरिसंख्येचविज्ञेयेहेतुमाल
या अन्योन्यमुत्तरंसूक्ष्मसारौतद्वदसंगतिः समाधिश्चसमेनस्याद्वि
षमस्त्वधिकेनच प्रत्यनीकंमीलितंचस्यात्तामेकावलीस्मृती भ्रांति
मांस्तुप्रतीपेनसामान्यंचविशेषवत् तद्गुणातद्गुणौचैवव्याघातः
परिकीर्त्तितः संसृष्टिसंकरौचैवमेकशष्टिरुदीरिताः ॥ तेष्वनेकालं लंका ५
मूलभूतत्वेनसौकर्यातिशयाच्चप्रथममुपमांप्रथमंलक्षयति ॥
साधर्म्यमुपमाभेदे ॥ ननुसाधर्म्यस्यप्रतियोग्यनुयोगिनिरूपणतया
तदनभिधानेन्यूनत्वंलक्षणवाक्यस्येतिचेन्न आक्षेपादुपमानोपमेयरू
पयोस्तयोर्लाभात् नचप्रतियोग्यनुयोगिमात्राक्षेपेऽतिप्रसंगः उपमानो
पमेयेविनान्यस्यकार्यकारणादिमात्रस्यसाधर्म्याभावात् एवंचोपमानो
पमेययोःसमानेनधर्मेणसंबंधउपमेतिलक्षणार्थः अत्रचोपमानोपमेय

योरात्तेपः साधर्म्यप्रतिपत्तिमात्रफलकोनन्वयावर्तकः नन्वेवं भेदरूपस्या
नुपादेयं नतस्याप्याक्षेपादेव लाभसंभवात् न ह्यभेदे सादृश्यात्मकं साधर्म्य
मितिचेन्न साधर्म्यपदस्यारोपितानारोपितसाधारणसमानधर्मसंबंधमा
त्रपरत्वेनारोपितसाधर्म्यनिबंधनस्यानन्वयालंकारस्याव्यवच्छेद्यत्वात् अ
लंकारेसतीत्यपिस्मरणीयम् साधर्म्यमात्रस्योपमात्वाभावात् एनांविभज
ते ॥ पूर्णालुप्ताच ॥ यत्रोपमानोपमेयसाधारणधर्मोपमाप्रति
पादकशब्दस्यचोपादानंसापूर्णा एतच्चतुष्कमध्येएकस्यद्वयोस्त्रयाणांवानु
पादानंयत्रसालुप्ता तयोःपूर्णांविभजते ॥ साग्रिमा श्रौत्यार्थीचभवेद्वा
क्येसमासेनतद्धितेतथा ८७ ॥ अग्रिमा प्रथमोद्दिष्टापूर्णेत्यर्थः वाक्यंविग्र
हः तेनोपमानादिपदानिचत्वार्यपियत्रासमस्तानिभिन्नविभक्तिकानिसावा
क्यगा यत्रतुतेषुद्वयोरपिसमासःसासमासगा तद्धितेनोपमाप्रतिपादके
नतुसमस्तमुपमानवाचिन्याःप्रकृतेर्नसमासोनापिविग्रहइतितत्रतद्धितीयमुप
माभेदः त्रिविधाप्येषाश्रौत्यार्थीभेदात्प्रत्येकंद्विविधेतिषड्विधापूर्णेत्यर्थः
श्रौतत्वंचोपमानोपमेययोःसाधारणधर्मसंबंधरूपायास्तस्याःशाब्दत्वम्

अर्थोपगिरामस्फुटत्वं चार्थत्वम् तत्र यथेववादिशब्दानां तत्र तस्यैवोपमानेनेवार्थे विहि
तस्य वतेश्चोपादाने श्रौती तुल्यादीनां शब्दानां तेन तुल्यमित्यादिना तुल्यार्थे ।
विहितस्य वतेश्च प्रयोगे आर्थी ननु यं विभागोनुपपन्नः उभयत्र सादृश्यस्य
याविशेषात् न च वाच्यं यथादिशब्दैः साधारणधर्मसंबंध उभयत्रापीव बोध्य
तेन पुनस्तुल्यादिशब्दैः अयमेव विशेष इति यतो यथादिशब्दा यदनंतरमुपात्ता
स्तस्यैवोपमानतामवगतीति रिति उपमानविशेषणान्येते अत उपमानेन संबंधबोध
यंतु न पुनरुपमेये अन्यविशेषणस्यान्यत्र संबंधबोधकत्वादर्शनादिति चेन्न श
ब्दशक्तिस्वाभाव्यादन्यविशेषणत्वेप्यन्यत्र संबंधबोधकत्वात् न चादृष्टचरत्वम्
षष्ठ्यंतयार्दर्शनात् षष्ठी हि यदनंतरमुपात्ता तस्यैवोपसर्जनत्वमवगतीति रिति उ
पसर्जनविशेषणत्वेपि प्रधानेपि संबंधं बोधयति तस्मादवतीत्यनुपपत्त्यावती
तानुपपत्त्या च संबंधबोधविशेषाश्रौतार्थविभाग इति मतं तकम् तथा हि यथ
मिव मुखमित्यादावुपमानस्यादितस्य वा रमणीयत्वादेः संबंधमविषयीकृत्य
पर्यवसानम् यथावादिशब्दानां धर्मविशेषसंबंध एव प्राकृतत्वात् तुल्यादिश
ब्दस्तु नैवम् पद्मेन तुल्यं मुखमित्यादावुपमेये पद्मं तुल्यं मुखस्येत्यादावुपमाने ।
मुखं पद्मं च तुल्यमित्यादावुभयत्रापि सामान्यतस्तुल्यत्वं बोधयित्वा विश्रांतेषु ते

का॰प्र॰
९॰
९०

शुधर्मविशेषं विना कथं लभ्यते इति प्रतीतावुपमस्याधर्मविशेषसंबंधप्रतीतिरिति
केचित् उपमानोपमेयभावरूपसंबंधस्य श्रौतार्थत्वाभ्यां विशेषः इति भावः तद
युक्तम् साधर्म्यस्यार्थत्वात् तुल्यादिपदोपादाने आर्थीति प्रकारविरोधात् यथा
सैव ह्यार्थी तया उपमाया आर्थत्वं न सैव श्रौतं तया श्रौतत्वोचित्यात् किंच साध
र्म्यमेवोपमेति न सैव श्रौतत्वार्थत्वाभ्यामुपमाभेदो युक्तः अत एव यथादिना
सादृश्यरूपः संबंध एव साक्षादभिधीयते षष्ठीवत् तुल्यादिभिस्तु धर्म्यपीति
व्याख्यानमनुपादेयम् ननु तथाप्यनुपपन्नो विभागः पूर्णोपमायां येन कोप
मानयोरेव हि समासः संभावितः न च यथादिभिः समम् असौ दृश्यते येन समासे
श्रौती स्यादिति चेन्न इवेन नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वर
त्वं चेत्यनेन इवशब्देन समं समासविभक्त्य लोपयोः संभवात् विभक्त्यलोप
दर्शनाच्च समासव्यवहारो मुख्यानाम् तत्र वाक्ये श्रौती यथा स्वप्नेपि समरेषु
त्वां विजयश्रीर्न मुंचति प्रभावप्रभवं कांतं स्वाधीनपतिका यथा १ अत्र जयश्री
रुपमेया स्वाधीनपतिकोपमानम् न मुंचतीति साधारणो धर्मः यथेत्युपमाप्र
तिपादकम् एवमग्रेऽप्यूह्यम् न चैतेषां कयोरपि समासः इति वाक्यगा श्रौती।
वाक्यगा आर्थी यथा चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहा

९०

रिकांति सरसिजमिदमाननंचतस्याः सममितिचेतसिसंमदंविध
त्ते । इयंसमस्ताहप्रयोगाद्धार्थी समासेश्रौतीयथा अन्यायुतैर्नि
यमकारिभिरुद्धतानांदिव्यैःप्रभाभिरनपायमयैरुपायैः शौरि
र्भुजैरिवचतुर्भिरदःसदायोलक्ष्मीविलासभवनैर्भुवनंबभार ।
अत्रेवेनसमासः समासेआर्थीयथा अविनयमनोरथपथप्र
थनेषुप्रगुणगरिमगीतश्रीः सुरतरुसदृशःसभवानभिलषणी
यःक्षितीश्वरनकस्य । अत्रसुरतरुसदृशइतिउपमानयोनकयोः
समासः तद्धितेश्रौत्यार्थीयथा गांभीर्यगरिमातस्यसत्यंगंगाभुजं
गवत् दुरालोकःससमरेनिदाघांबरत्नवत् । अत्रगंगाभुजंगव
दितिश्रौती तत्रतस्येवेत्यनेनेवार्थेवतेर्विधानात् निदाघांबरर
त्नवदित्यार्थी तेनतुल्यमित्यर्थेवतेःप्रयोगात् नतुचित्रभेदाअलं
कारनिर्णायेनिर्लोठ्यंतेइतिदर्शवमवादीः इदानींस्वमेपीन्दुरुदाहरा
सिनचैनचित्रंभवितुमर्हतिति अत्रस्वाधीनभर्तृकाकांतंभजमाना
यथाचसत्कारसः तथाजयश्रीस्वदासेवनेनेत्यादिवस्तुरूपंव्यंग्यं
विनानोक्तवैचित्र्यं वैचित्र्यंचालंकारत्वनिष्पत्तयइतिव्यंग्यमवश्यापे ।

रणीयम् अनन्तस्य प्राधान्येन ध्वनिमध्यप्राधान्ये गुणीभूतव्यंग्यत्वं
तस्मात्सर्वोपरि प्राधान्यमिति चेन्नैवंवादी: न खलु व्यंग्यपरामर्श
प्राग्वैचित्र्यचारुताप्रतीति: अपि तु वाच्योपमामात्रपरामर्शादेव चा
रुत्वहेतुश्चालंकार: अवर्जनीयसन्निधेश्च व्यंग्यस्यास्फुटतरतया
न ध्वनित्वं गुणीभूतव्यंग्यव्यवहारप्रवर्तकतेति न कश्चिद्दोष: नन्वेव
मप्युदाहृते रसादिरूपव्यंग्यसद्भावाच्चित्रतानुपपत्ति: किं चानुप्रा
साद्यलंकारान्तरसद्भावात्संकरालंकारोदाहरणान्येतानि युक्तानि
न तु शुद्धाया उपमाया इति चेन्न रसादिरूपव्यंग्यस्यालंकारान्तरं चैतेषु
व्यभिचारीति तत्रौदासीन्यमालंब्योपमालंकारोऽयमीदृश इत्यभि
प्रायेणालंकारमात्रमत्रोदाहृतं न तु चित्रकाव्यम् अत्र चेद् धवल: पट
इत्यादिको रसालंकाराभ्यामसंभिन्न एव विषय: किमिति नोदाहृय
त इति चेत् तत्र हि तत्त्वेनोदाहरणे वैरस्यप्रसंगात् तादृशवाक्यस्या
काव्यत्वेन तस्याप्यनुपमात्वात् ॥ अथ लुप्तां विभजनीया ॥ सा च
सप्तधा तत्रैकस्य लोपे त्रिधा उपमानस्य साधारणधर्मस्य द्योतकस्य च लो
पात् उपमेयमात्रस्य लोपादर्शनात् द्विलोपे त्रिविधा धर्मवाचयोर्धर्मो

पमानयोर्वाचकोपमेययोश्च लोपात् अन्यस्य द्विकस्य लोपासंभवात् ।
त्रिलोपे त्वियमेका उपमेयं विनान्येषामेवैकमात्रसत्त्वे उपमाया असं।
भवादिति द्वर्ग्रीयेन्नेव यथासंभवं तासां सप्तविधानामपि विभागमाह ॥
तत्र धर्मस्य लोपे स्यात् श्रौती तद्धिते पुनः धर्मस्य साधारणधर्मस्य तत्र ।
तु समासे वाक्ये तद्धिते च श्रौती आर्थी चेत्यर्थः तत्र विशेषमाह नश्रौ ।
तीतद्धित इति इवार्थ एव विहितेन तद्धितेन सा श्रौती भवेत् इवार्थस्य वति ८१—
हेव सूचनात्तत्र तस्येवेत्यर्थकतया नित्यं धर्मस्याकांक्षत इति धर्मानुपादाने
श्रौती तद्धितेन भवत्येव आर्थी तु यथा पिवति तुल्यतद्धितेन संभवति तेन तु
ल्यमित्यर्थे नित्यं तुल्यक्रियाकांक्षत्वेन धर्मलोपेन तत्संभवात् तथापि क
ल्पबूदेश्यदेशीयरबहुच्च्रूपे संभवत्येवेति पंचविधा धर्मलोपोपमेत्यर्थः
तत्र वाक्ये श्रौती यथा धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा । अत्रामृतवचसोः परिणामसु।
खकरत्वादि साधर्म्यं तत्त्वतो पात्तम् आक्षेपाल्लभ्यस्य संबंधो यथाशब्दे
न तद्बोधं विनाः पर्याप्तेन श्रुत्येव बोध्यत इति धर्मलोपे श्रौतीयम् एवम
ग्रेऽप्यूह्यम् वाक्ये आर्थी यथा आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।

का॰ प्र॰
९२

मन्यर्थिसेनयाद्दष्टःहसांतेनसमःप्रभुः १ आहाष्टकरवालस्त्वंनसाधारणोध
नः यमस्यदंडायुधत्वेनप्रसिद्धेरित्यर्थः अन्यच्चयथा करवालइवाचारस्त
स्यवागमृतोपमा विषकल्पंमनोवेत्सियदिजीवसितत्सखे १ अत्रकरवा
लइवेतिसमासेश्रौती अमृतोपमेतिसमासेआर्थी विषकल्पमितितद्धित
गाआर्थी ॥ उपमानानुपादानेवाक्यगाथसमासगा ८८ ॥ अत्रतद्धितगा
नसंभवति उपमाप्रतिपादकस्यतद्धितस्यवतिकल्पवादेरुपमानादेवविधाने
नउपमानानुपादानेऽसंभवात् नवाश्रौती इवादीनामुपमानान्वितत्वात्त
दनुपादानेतेषामप्यनुपादानात् अतोवाक्यसमासयोरेवेतयोरप्यार्थ्ये
वेतिद्विप्रकारालुप्तोपमा तत्रवाक्यगायथा सअलकरणपरवीसामसि
रिविअरणंणसरसकव्वस्स दीसइअहवणिसम्मइसरिसंअंसंसमत्तेण १
अत्रविशेषतउपमानंनोपात्तम् चिंत्यमेतत् इदमेककव्वसेत्यत्रकव्वस
ममतु सरिसमित्यत्रतूणमितिपाठेसमासगोदाहरणं द्योतकलोपेवाक्य
गानावत्नसंभवति मुखंचंद्रोरमणीयमेतावन्मात्रेणोपमाप्रत्ययाभा
वात् नापितद्धितगा वतेःकल्पवादीनांचद्योतकत्वयातल्लयोरेद्योतक
लोपस्यैवासंभवात् नवाश्रौतीत्यन्यथाविभज्यते ॥ वादेर्लोपेसमासेसा

९२

कर्मधारयक्यचिक्यङि· कर्मकर्त्रोर्णमुलि ॥ वाक्याद्धृउपमायोनक्वचिदिवा
देरुपमायोनकस्यत्यर्थः तस्यलोपेसमासेक्यचिक्यङिणमुलिचोपमा
नत्रकाचिद्विधा कर्मणोधिकरणाच्चविधानेनतस्यद्वैविध्यात् क्यङि·त्वे
कैवकर्तुरेवतद्विधानात् णमुल्यपिद्विधा कर्मकर्त्रोस्तद्विधानात् तत्र
समासेद्विधा द्वयोस्त्रयाणामपिवाउपमानादिपदानांसमासात् तयो॰
राद्यायथा ततःकुमुदनाथेनकामिनीगंडपांडुना नेत्रानंदेनचंद्रेणमाहें॰
द्रीदिगलंकृता । अत्रगंडपांडुनेतिद्वयोःसमासः द्वितीयायथा असित
भुजगभीषणासिपत्रोरुहरुहिकाहितचित्तचूर्णाचारः पुलकितनतनुरा
त्कपोलकांतिःप्रतिभटविक्रमदर्शनेयमासीत् । अत्रासितभुजंगेत्या
द्यावुपमानधर्मोपमेयवाचिनांत्रयाणामपिसमासः ॥ क्यचुकाङेणमे॰
दत्रयंयथा ॥ पौरंसुतीयतिजनंसमरांतरेसावंतःपुरीयतिविचित्रचरि॰
त्रचंचुः नारीयतेसमरसीम्निकृपाणपाणेरालोकयस्यचरितानिसप
त्नसेना । अत्रपौरंसुतीयतीत्यत्रोपमानादाचारेक्यतिकर्मणः क्यच् सम
रांतरेअंतःपुरीयतीत्यत्रत्वधिकरणाच्चेत्यधिकरणात् नारीयतइतिका॰
र्तुःक्यङ्सलोपश्चेत्यनेनकर्तुःक्यङ्॰ णमुलिभेदद्वयंयथा मृधेनिदा

का॰ प्र॰
९३

93

यद्यमौञ्जदर्शपर्यन्ततिंपरे सत्तनःपार्श्वसंचारंसंचरत्यवनीपतिः १ अ
वनिदावबद्धमौञ्जदर्शमिति कर्मणि णमुल् निदाघद्धर्मांशुमिवपश्यंती
त्यर्थात् पार्श्वसंचारमित्यत्र कर्तरि उपमाने कर्मणि चेति चकारात् अयहि
लोपाभजनीया तत्र धर्मवाचो लोपे वाक्यगा न संभवति शिष्टयोर्द्वयोः
द्वन्द्वत्वेनावन्मात्रयोरुपादानेऽपमानार्थमात् नापि तद्धितगा तद्धितस्या
पिकल्पवाच्चिविनतत्संत्वेहि लोपाभावात् नापि श्रौती इवाद्यभावादित्ति
सथाविभज्यते ॥ एतद्विलोपे क्विप्समासगा ८९ ॥ एतद्विलोपे एतयोर्द्वयो
र्धर्मवाचोर्लोपे क्विप्गा यथा सविताविधवति विधुरपि सवितरीयते दिनंति
यामिन्यः यामिनयंति दिनानि च सुखं दुःखवशीकृते मनसि १ यद्यप्याचारे
क्विब्विधानात् तस्यैव समानधर्मरूपत्वेन क्विपि धर्मलोपो नास्ति तथापि
क्विपश्च लोपात् धर्मलोपव्यवहारः अत एव समानार्थत्वेपि क्यङ् न लो
पातः तस्यालुप्तत्वेन धर्मलोपाभावात् समासगा यथा परिपन्थिमनोराज्य
शतैरपि दुराक्रमः सम्परायप्रवृत्तोसौ राजते राजकुञ्जरः १ अत्र राजा कुञ्ज
र इवेत्युपमा ॥ धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ॥ तद्धितेत्वनेवम्
उपमानलोपे तद्धितस्यैवाभावात् नापि श्रौती उपमानाप्रयोगे इवादेर

द्वौ पू॰

९३

उत्फुल्लं ये भ्रमरमालोकयन्त्यपि उत्तीः उत्तमं
ढ्ढुक्ताब्दुताः गोमरिषासिकदकोकालिकोः वनकीवन
निमालतीहृदं
यं भ्रमरभ्रमं
नेत्रा पद्मसीर्तिं
मा =

मयोगात् वृत्तिःसमासः तत्रसमासगायथा कुण्डलुन्तोमसिरिखि।
कण्ठकलिङ्गाङ्केमृदुवणाढू मालङ्कृतस्तमम्भ्रवविच्छं भ्रमरभ्रमन्तोण
पावद्दिसि । उत्तमस्तविच्छमित्यत्र उत्तमेनसमानमिति पाठे इयमेववा
क्यगा ॥ क्यचिबाधूपमेयात्मे ॥ आत्मेनिरासे उदाहरणाम् अरातिविक्र
मालोकविकस्वरविलोचनः कृपाणोदग्रदोर्दण्डः सहस्रायुधीयति
। अत्रयद्यपिविशेषणद्वारोपात्तः कर्त्तैवोपमेयस्तथापिनतस्यात्वेन किं
तुकर्मत्वेन अन्यथावाक्यस्यासंगतत्वापत्तेः तथाचात्मानंसहस्रायुधमिवाचरती
त्यर्थःस्तूपमेयआत्मालुप्तइतिप्राचीनोदाहरणमेतत् हंसायतेइत्यादौ
कर्त्रैवोपमेयः तस्यचानुपादानेवाक्यमेवनपर्य्याप्यतेइतिविशेषात्क्यप
ङि.नैषसंभवति यद्यपिद्विलोपेऽप्युपमेयस्तत्रसंभवति यथोपमानो
पमेययोः उपमानवाचीरुपमानधर्मयोरिति तथापितेषूपमायाःप्रसंग
एवनास्तीतितस्यनतत्वमाशंकनीयम् त्रिलोपेचउपमेयानिकित्रितयलो
पएवसंभवतीत्युक्तम् सापिसमासेमात्रे अन्यत्रबोधकाभावात् तत्राऽ
प्यार्थ्येव इवादेर्लोपादित्येकविधैवेत्याह ॥ त्रिलोपेचसमासगा ९० ॥
यथा तरुणिमनिकृतावलोकनाललितविलासविलुप्तविग्रहा स्मरसम

रविसंचारितांतरागस्तमनमनोहरते मुनेर्मनः १ अत्र यदि मृगग्राहेण तल्ल
क्षणायाः लोचने विवक्षिते तदानेदमुदाहरणम् यदा तु मृगलोचने इव
नयने लोचने यस्याः इत्यर्थो विवक्ष्यते तदा उपमानपूर्वस्य बहुव्रीहिरुत्तरपदा
९५ लोपश्च तेन मृगलोचनेत्युपमानपूर्वपदस्य नयनग्राहेण बहुव्रीहौ
उपमानवाचिनि मृगलोचने निपूर्वपदे उत्तरपदभूतस्य लोचनग्राहस्या
लोपेनैव उपमेयभूतस्य नयनमात्रस्योपादानादिदमुदाहरणम् केचि
मा॰ त्तूपमानोपादानेऽपि त्रिलोपा संभवति यथा यमाय स्थूलिक इति अत्रा
यःस्थूलेन क्रूरस्याचार उपमेयः तीक्ष्णत्वादिकं च साधारणो धर्मः न च तयो
रेकमप्युपात्तम् नापीवादिरिति मन्यते तन्न युक्तम् यतः क्रूरस्याचारस्या
यःस्थूलतयाध्यवसानादतिशयोक्तिरियं न तूपमा अन्यथाध्यवसायमू
लातिशयोक्तेर्निर्विषयत्वापत्तेरिति तदेवं धर्मलोपे पंच उपमानलोपे द्वौ।
द्योतकलोपे षट् धर्मवाच्ययोर्लोपे द्वौ धर्मोपमानयोर्लोपे द्वौ द्योतको
पमेयलोपे चैकः त्रिलोपे त्वेकः इत्यमून विंशतिर्लुप्ताभेदाः पूर्णाभेदाः ष
ट् इत्येवं पंचविंशतिः ननु अन्येऽप्युपमाभेदाः संभवन्ति तथाहि एकस्ये
वोपमेयस्य बहूपमानसंबंधो मालोपमा सा च द्विधा साधर्म्यस्याभेदात्

ऽभेदश्च तत्राद्या यथा अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विना मम्लौ साथ
विषादेन पद्मिनीव हिमाम्भसा । अत्र म्लानिरेव सर्वोपमासाधर्म्यम् अन्त्या
न॰ ४२ यथा ज्योत्स्नेव नयनानंदः सुरेव मदकारणम् प्रभुतेव समाकृष्टसर्वलो
कानितंबिनी । अत्र ज्योत्स्नादीनां नयनानंदहेतुत्वादयः साधारणधर्मा
भिन्नाः पूर्वपूर्वोपमेयस्योत्तरोत्तरोपमानत्वे रसनोपमा सापि द्विधा साधर्म्या
भेदात्मभेदश्च तत्राद्या यथा अनवरतकनकवितरणजललवभृत्करतरंगि
तार्थिततेः भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला । अत्र
विमलत्वमेव सर्वासूपमासु साधारणो धर्मः अन्त्या यथा मतिरिव मूर्ति
र्मधुरा मूर्तिरिव सभा प्रभावचिता तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न
परेषाम् । अत्र मूर्त्यादीनां मधुरत्वादयो धर्मा भेदवंतस्त एते भेदाः किमि
ति नोक्ता इति चेत् उक्ता एव अभेदान्तर्भावात् तथापि तेन तेन रूपेण किं नो
क्ता इति चेत् एवंविधवैचित्र्यसहस्रसंभवात् सर्वेषामाख्यातुमशक्यत्वा
त् ॥ उपमानोपमेयत्वे एकस्यैवैकवाक्यगे अनन्वयः ॥ उपमानांतरव्य
वच्छेदाय यदेकस्यैवोपमानोपमेयत्वे भेदोपचारेणोपमाया निबध्यते सोऽन
न्वयः तदेतदुक्तम् उपमानांतरसंबंधाभावोऽनन्वय इति अतिप्राम्यमतीय

र्थमुपमेयभिन्नोपमानसंबंधाभावोयत्रेति बहुव्रीहिसमासात् यद्वासं
ज्ञायोगानिर्वचनं तत् अनन्वयः संबंधाभावः सचार्थादुपमानांतरेणोप
मेयभिन्नेनेति एवकारोवैचित्र्यविशेषविस्फोरणार्थः एकवाक्यगइति
विपर्यासोपमाव्यावर्तनाय तत्र हि वाक्येनद्वयाभावः उदाहरणम् नके
वलंभाति नितांतकांतिर्नितंबिनीसेवनितंबिनीव यावद्विलासायुधला
स्यवासास्तेनद्विलासास्त्वदन्वद्विलासाः १ अत्रच्छायाविशेषादिभेदान्नेदो
पचारः ॥ विपर्यासउपमेयोपमानयोः ९२ ॥ तयोरुपमानोपमेय
योर्विपर्यासः उभयोरुपमानभावः अर्थाद्वाक्यद्वये एकवाक्येनद्वयासं
भवात् मुखमिवचंद्रइत्यस्य निंदाभिव्यक्तौ प्रतीपरूपत्वात् उपमेयोप। मे
मेतियौगिकीसंज्ञा विपर्यासश्चात्रोपमानांतरव्यवच्छेदार्थः उदाह
रणम् कमलेवमतिर्मतिरिवकमला तनुरिवविभाविभेवतनुः धरणी
वधृतिर्धृतिरिवधरणी सततंविभातिबतयस्य १ संभावनमथोत्प्रेक्षा
प्रकृतस्यसमेनयत् ॥ समेनान्यस्यसह एकरूपेणनिश्चयः तेनप्रकृत
स्यसंभविनोऽर्थस्यसमेनसंभविनासहएकरूपतयायत्संभावनंतदुत्प्रे
क्षालंकारस्यार्थः साचेयंहेत्वादिसंभावनाभेदाद्बहुप्रकारा तत्रहेतू

त्प्रेक्षा यथा उन्मेषं यो मम न सहते जातिवैरी निशायामिंदोरिंदीवरदल
दृशा तस्य सौंदर्यदर्पः नीतः शांतिं प्रसभमनया वक्त्रकांत्येति हर्षाल्लग्ना
मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः १ अत्र पद्मलक्ष्म्याः कामिनीचर
णयोः स्वभावलग्नत्वम् पद्योक्तहर्षहेतुकलग्नत्वतादात्म्येन संभावि
तम् स्वरूपसंभावनं यथा लिंपतीव तमोंगानि वर्षतीवांजनं नभः अ
सत्पुरुषसेवेव दृष्टिर्निष्फलतां गता १ अत्र गम्यमानं तमसो व्यापना
दि लेपनादिरूपतया संभावितमिति स्वरूपोत्प्रेक्षेयम् अत एव तमसो ले
पनकर्तृत्वमत्रोत्प्रेक्ष्यमित्यलंकारसर्वस्वमतमपास्तम् विवक्षितविवेके
लेपनमात्रस्यैवोत्प्रेक्षणात् एवं फलाद्युत्प्रेक्षाप्यूहनीया ॥ ससंदेह
स्तु भेदोक्तौ तदनुक्तौ च संशयः ४२ ॥ भेदो वैधर्म्यम् संशयस्तु कविप्र
तिभानिर्मित एवायमलंकारो न तु स्वारसिकः स्थाणुपुरुषादिविषयेपि
वैचित्र्याभावात् अत्र संशयः ससंदेह इति लक्षणम् भेदोक्तौ तदनुक्तौ चे
ति विभागः तत्र भेदोक्तौ यथा अयं मार्तंडः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् कृतांतः किं साक्षान्महिषव
हनोसाविति चिरं समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः १ अ

त्रमात्तंडत्वादीनां संदेहे समत्तंडत्वादीनि वैधर्म्याणि तदाश्रये उक्तानि नचा
यं व्यतिरेकालंकारः तस्य संदेहानुत्थापकतयाऽतेनैव व्यपदेशौचित्यात् न
का॰प्र॰ ९६ नु भट्टोद्भटेन भेदोक्तौ निश्चयगर्भ एवायं स्वीकृतो न तु निश्चयान्तोपि तत्किं
मस्यापि सद्भाव एव पन्थाः नोच्यते कृतमेतत् भेदोक्तावितिविभजनात् निश्चया
९६ न्तस्यापि तत्संभवाद्वैचित्र्यानुभवाच्च यथा इंदुः किं क्व कलंकः सरसिजमेत
उत्तं त्किमम्बु कुत्र गतम् ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः
१ तत्किं भट्टोद्भटेनायमुपेक्षितः प्रतीयमानवस्त्वपि तादृग्वैचित्र्याभावा
त् इति निरहाद्याः भेदानुक्तौ यथा अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कां
५ तिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः वेदाभ्यासजडः क
थं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः
१ अत्र पुराणमुनेः प्रजापत्यादेः कस्यापि न वैधर्म्यमुक्तम् ॥ तद्रूपकमऽ
भेदो य उपमानोपमेययोः ॥ अभेदोऽभेदारोपः वीजन्तु तत्रातिसाम्यम
शाह्लादयति व्यंजनया आहार्यारोपस्य व्यवस्थापितत्वात् अभेदश्चात्रानुपह्नु
तभेदयोर्विवक्षित इति नापह्नुतावतिव्याप्तिः तदेतद्धि विधम् सावयवं
निरवयवं च तत्राद्यं समस्तवस्तुविषयमेकदेशविवर्ति च द्वितीयं तु शुद्धमा ९६

त्रमित्यार्थे विभागे लक्षणमाह ॥ समस्तवस्तुविषयं श्रौता आरोपिता
यदा ५३ ॥ आरोपिता आरोप्यमाणास्ते सर्वेपि यदा आरोपविषयवत्
शाब्दा एव भवंति तदा समस्तवस्तुविषयं नाम रूपकम् समस्ता वस्तु आ
रोप्यमाणं विषयः शाब्दप्रतिपाद्योत्रेति व्युत्पत्तेः आरोपिता इति बहुवच
नत्वमविवक्षितमित्यारोप्यद्वयस्थलेनाव्याप्तिः उदाहरणम् ज्योत्स्ना
भस्मच्छुरणधवला बिभ्रती तारकास्थीन्यंतर्द्धानव्यसनरसिका रात्रिका
पालिकीयम् द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपाले न्यस्तं सिद्धांजना
परिमलं लांछनस्य च्छलेन ॥ अत्र पादत्रये ज्योत्स्नादिषु भस्मत्वादिक
मारोप्यमाणं सर्वं शाब्दम् नन्विदं रूपकोदाहरणं न युज्यते साधकबाध
काभावेन रूपकोपमयोः संदेहात् संदेहलक्षणसंकरौचित्यादिति चेत् न
चेदं व्यसनं तद्धीनव्यसनरसिकात्वं विप्रोषणं न स्यात् तच्च रूपकपरि
ग्रहे साधकम् कापालिकायांतत्संभवात् रात्रावसंभवाच्च उपमाप
क्षे हेतु रात्रेरेव प्राधान्यान्न स्यादन्वयमेव स्यात् ॥ श्रौता आर्थाश्च वा ।
तेयस्मिन्नेकदेशविवर्तिनि तत् ॥ ते इत्यारोपिताः तथा च यत्र केचिदा

प्रस्यरणान्तःपुरे करे कुर्वतो मंडलाग्रलतां स्वैरं संमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना
मंडलाग्रलताखड्गलता करे कुर्वतो धारयतो यस्य कार्यरताय च अन्तःपुरत्वारोपसामर्थ्यात् लतायां नायिका
त्वावगमात् रिपुसेनावीररसेन शृंगाररसेन च संमुखी पुरुषः विरसतया पराङ्मुखी भवति भयाद्युद्धान्निवर्तते कोपा त्प्रियसंगमाच्च

रोप्यमाणाः शुद्धोपात्ताः केचिदर्थसामर्थ्यादवसेयाः तदेकदेश
विवर्त्ति एकदेशविशेषेणावर्त्तनेनेति व्युत्पत्तेः उदाहरणम् जस्स र
णंते उरए करे कुणन्तस्स मण्डलग्गलअं रससम्मुही वि सहसा पर
म्मुही होइ रिउसेणा १ अत्र रणान्तःपुरत्वमारोप्यं प्रधानं मंडलाग्रल
तायां नायिकात्वं रिपुसेनायाः प्रतिनायिकात्वं चारोप्यं न प्रधानं किं
त्वन्तःपुरत्वारोपसामर्थ्यादेवावसीयते अन्तःपुरे तासामेवोचित्या
त् अन्यथा तस्यापर्यवसानात् अत एकदेशविशेषेणावर्त्तना
देकदेशविवर्त्ति ॥ सांगमेतत् ॥ सांगं सावयवमेतत् उक्तप्रकार
द्वयवदित्यर्थः सांगत्वमनेकरूपकसमुदायः एकस्मिन् रूपके हि नी
रूपसांगत्वेनावस्थानात् अंगशब्दस्यावयववचनत्वात् ॥ निरंगं तु शुद्धं ॥
च॰ यथा कुरंगीवांगानि स्तिमितयति गीतध्वनिषु यत्सखीं कान्तोदन्तं
श्रुतमपि पुनः प्रश्नयति यत् अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्य
भिनवां प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् १ अत्र प्रे
ममात्रे लतिकात्वारोपः ॥ अथ सांगस्यैव वैचित्र्यान्तरमाह ॥ मा

लानुसर्ववत् ॥ यथैकत्रबहूपमानयोगेमालोपमा तथाएका-
त्रानेकधर्मारोपेमालारूपकमित्यर्थः यथा सौंदर्यस्यतरंगि-
णीतरुणिमोत्कर्षस्यहर्षोद्गमःकांतेःकार्मणकर्मनर्मरहसामु-
ल्लासनावासभूः विद्यावक्रगिरांविधेरनवधिप्रावीण्यसाक्षा-
त्क्रियाबाणाःपंचशिलीमुखस्यललनाचूडामणिःसाप्रिया १ ॥
नियतारोपणोपायःस्यादारोपःपरस्ययः तत्परंपरितंश्लिष्टेवा-
चकेभेदभाजिवा ५५ ॥ नियतस्यप्रकृतस्यारोपोवस्तुत्वेनतादा-
त्म्यप्रतीतिस्तस्योपायःकारणंयःपरस्याप्रकृतस्यारोपस्तत्परंप- २५
रितम् रूपकाणांकार्यकारणभावरूपापरम्परासंजाताऽस्तीतियो-
गादितिकेचित् वस्तुतस्तुनियतारोपणमुपायोयत्र आरोपणंवि-
नायदारोपणंनसंभवत्येवेतियावत् एवंभूतःपरस्याप्रकृतस्यआरो-
पःसतथा एवंचएकरूपणानंतरंपरंपरितंकार्यकारणभावरूपा-
परंपरासंजाताऽस्तीतिव्युत्पन्नैः श्लिष्टरूपादि तदेतद्धिविषम् उपा-
यम्मतेरूपकेआरोप्यारोपविषययोर्वाचकस्यश्लिष्टत्वाच्छिन्नरूपत्वाच्च

त्यर्थः तत्राद्यं यथा विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युते दु
र्गामार्गणनीललोहित समित्स्वीकारवैश्वानर सत्यप्रीतिविधानद
क्ष विजयप्राग्भावभीम प्रभो साम्राज्यं वरवीर वत्सरशतं वैरिंचमुच्चैः
क्रियाः १ अत्र मानसमानसं सरोविशेषस्तत्त्वारोपहेतुकं राज्ञो हंस
त्वारोपणम् तत्र चारोपविषयारोपणीययोर्द्वयस्य सरोविशेषयोः
श्लेषवता मानसशब्देनैवाभिधानम् एवमग्रेऽपि एवमारोपहेतुकं
रूपकमारोपणमिति तत्र श्लेषस्य शब्दरूपविहितस्य सहनयाग्राह्यालंकार
त्वमित्युक्तं वस्तुतश्च तथा च श्लेषपरम्परितमुभयालंकारो युक्त इति
द्वयस्य रूपकं वक्तुं युक्तमौचित्यात् किमित्यर्थालंकारमध्ये पठितमिति चे
न्न सत्यमेतत् तथापि श्लेषापवादकं रूपकमित्यलंकारसर्वस्वकारादि
प्रसिद्ध्यनुरोधेनोक्तम् तथा प्रसिद्धौ किं बीजमिति चेत् मानसत्वादीनां
मार्थत्वम् इदं हि नैरेकदेशविवर्ति इत्युच्यते द्वितीयं यथा आलानं ज
यकुंजरस्य दृषदां सेतुर्विपद्वारिधेः पूर्वाद्रिः करवालचंडमहसो लीलो
पधानं श्रियः संग्रामामृतसागरप्रमथनक्रीडाविधौ मंदरो राजन्रा

जतिवीरवैरिवनितावैधव्यदस्तेभुजः । अत्र जयादेर्भिन्नशब्दवाच्य
स्यत्वं जयस्तंभारोपे सति भुजे आलानस्तंभारोपो युज्यते इदमुदाहरणं भे
ददृष्टं परंपरितमालारूपकम् अमालारूपमपि तद्रूपकम् तत्र श्लिष्ट
वाचके यथा अलौकिकमहालोकप्रकाशितजगत्त्रयः" स्तूयते देवस
द्वंशमुक्तारत्नं न कैर्भवान् । अत्र वंशोऽन्वय एव वंशो वेणुरिति भेदभा
जि यथा निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपंच
म् प्रथम इह भवान्स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः । अ
त्र लोकशब्दाद्भिन्नेन वल्लिपदेनारोप्यमाणसमम् परंपरितेचारोप्या
रोपविषयानेकत्वेऽपि नालंकारानेकत्वम् संभूयैव वैचित्र्यप्रकर्षा
धायकत्वात् एवं मालारसनयोरपि द्रष्टव्यम् यथापि रसनारूपक
मपि रूपकं संभवति यथा किसलयकरैर्लतानां करकमलैः कामि
नीनां मनो जयति नलिनीनां कमलमुखैर्मुखेंदुभिर्योषितां मदनः । इ
त्यादौ तथापि तत्राहार्यवैचित्र्यवदिति न पृथग्लक्षितम् ॥ प्रकृतं यन्नि

का॰ प्र॰
५५
११

विध्यान्यत्साध्यते सात्वपह्नुतिः ॥ प्रकृतस्योपमेयस्य निषिध्याऽसत्यत
याऽन्यस्याप्रस्तुतस्य प्रकृतस्योपमानस्य यत्साध्यते सत्यतयाऽव्यव।
स्थाप्यते साऽपह्नुतिः साच शाब्दी आर्थी चेति द्विधा तत्राद्या यथा
अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलङ्को नैवायं विलस।
ति शशाङ्कस्य वपुषि अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे रति।
श्रान्ता शेते रजनिरमणी गाढमुरसि । अत्र कलङ्को नैवायमिति शा
ब्दोऽपह्नवः आर्थस्तु वक्रीभिर्भङ्गीभिरालोच्यते तत्र कैतवकपटा।
दिपदोपादानात् यथा वत्स विकिर यद्देन स्पष्टस्पदं वैरं स्मरस्य प्रिय।
विरहरूपोऽस्मि त्रासि लोके तथापि हि उपवनसहकारोद्भासिभृङ्गच्छ
लेन प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् । अत्र छलशब्दबलान्न
भृङ्गमालासहकारमञ्जर्यः किन्तु स्मरशरा इति प्रतीयते क्वचित्परि।
णामादिशब्दवशात् यथा अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः यदङ्गाङ्गाराणां प्रशमपि
शुनानाभिकुहरे शिखा धूमस्येयं परिणमति रोमावलिवपुः । अ

त्वमस्मिन्बालारोमावलिवल्लः परिणमतीतिपरिणामस्याहार्यत्वम्।
नेयंरोमावलिः किंतुधूमसंस्थितिरितिप्रतीयते एवंभ्रमसंदेहयोरप्युदाहरणम् य
था इदंतेकेनोक्तमित्यादौ ॥ श्लेषः सर्वावयवएकस्मिन्यत्रानेको
र्थानाम्भवेत् ॥ ९६ ॥ परिहृतिसहानामेवयाहृतानामेकवृन्तग
फलद्वयन्यायेन यत्रानेकार्थप्रतिपादकतासोर्थश्लेषः यथा
उदयमयते दिङ्मालिन्यं निराकुरुतेतरां नयति निधनं निद्रामुद्रां
प्रवर्तनि च क्रियाः स्वयमतितरां स्वैराचारप्रवर्तनकर्तनं बत बत
लसत्तेजः पुंजो विभाति विभाकरः १ अत्र विभाकरनामा राजवि
शेषो मार्तंडश्चोभयार्थान्वुदयमयतइत्यादीनिवाक्यानि नचा
यंद्वितीयार्थस्यध्वनिरेवेतिशंकनीयम् "संयोगादीनामभावेन
अभिधाया अनियंत्रणात् द्वयोरपिवाच्यत्वात् ॥ परोक्तिर्भेदकैः
श्लिष्टैः समासोक्तिः ॥ परमप्रकृतम् भेदकानिविशेषणानि
श्लिष्टानि अनेकार्थानि तेनप्रकृतार्थविशेषणावाविमात्रप्राह्
स्यश्लेषमहिम्नायत्रप्रकृतार्थकेनवाक्येनाऽप्रकृतार्थवचनंसा

तद्बाहुस्पर्शं यस्याः कोऽप्युल्लासः जयलक्ष्मी
तव विरहे न उज्ज्वला दुर्बला ननु सा

का॰ प्र॰ १००

१००

समासोक्तिः संक्षेपेणार्थद्वयोक्तिः साऽत्रग्रहणाद्यत्र विशेष्यप
दस्यापि श्लिष्टत्वं तत्रासौ न तस्य श्लेषविषयत्वात् उदाहरणम् लहि।
ऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो जयलच्छी तुह विरहे ण
हुज्जला दुब्बला णं सा १ अत्र विशेष्यवाचिनो जयलक्ष्मीशब्द
स्य प्रकृतार्थत्वे नास्ति श्लिष्टत्वं चोपलक्षणम् औपम्यगर्भा
दीनामपि संभवात् यथा विलिखति कुचावित्यादाविति प्राचीनः
पथ्याः अत्र नव्याः परोक्तिरिति तिष्ठाधिकेन सामान्यतः प्रकृतमप्र
कृतं वा विवक्षितम् तेन यत्राप्राकरणिक विशेषणसामर्थ्यात्प्राक
रणिकमुच्यते तदपि संगृह्यते तत्रापि वैचित्र्यविशेषात् अन्यत्रा
न्तरभावाच्च यथा संप्राप्ते सकलाङ्ग इत्यादि अत्र ह्यप्रकृतस्य भृङ्गस्य।
विशेषणसामर्थ्यात्प्रकृतस्यासत्पुरुषस्य प्रतीतिरित्याहुः तत्र स्तुतं
अप्रस्तुतप्रशंसयैव तत्संग्रहात् तेनास्यानुदितेनेतिवत् किंचाप्र
स्तुतप्रशंसाप्रकरणे तत्र समासोक्तिपदं श्लिष्टविशेषणमात्रपरम्
निदर्शना अभवन्वस्तुसंबन्ध उपमापरिकल्पकः ९७ ॥ यथाप्र

अत्र जयलक्ष्मी
अत्र बाहुस्पर्श
नाभ्युल्ला
सादिसाधारणवि
शेषणैर्जयल
क्ष्मीवृत्तान्तेना
यिकावृत्तान्त
प्रतीयत इति समा
सोक्तिः

१००

नमात्रेणासंभवीवस्तुसंबंधोयत्रोपमांकल्पयित्वापर्यवस्यतिसे
कानिदर्शना दृष्टांतकरणात्मकनिदर्शनरूपत्वात् साचद्विधा।
५५ अवांतरवाक्यभेदेनतदभेदेन तयोराद्यायथा क्वसूर्यप्रभवोवंशः।
क्वचाल्पविषयामतिः तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरम्।
अत्राहंसागरंतितीर्षुरस्मीत्यस्यासंबंधार्थकतयाउडुपेनसाग
रतरणवन्मदीयमत्यासूर्यवंशवर्णनमसंभावितमित्युपमायाः
कल्पनम् अन्त्यायथा उदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहि
मधाम्नियातिचास्तम् वहतिगिरिरयंविलंबिघंटाद्वयपरिवारित
वारणेंद्रलीलाम्। अत्रान्यलीलोद्वहनस्यान्येनासंभवाद्वारणें
द्रलीलासदृशींलीलामित्युपमायांपर्यवसानम् एवंचद्वितीया।
द्वयोर्वाक्यार्थयोरुपमाक्षेपकः इहतुपदार्थमात्रमितिव्याख्यानम
नादेयम् अत्रापिलीलापदार्थमात्रस्यानाक्षेपकत्वात् एषामा। दुरंभवतीमु जगःसमुद्रः
लारूपापिदृश्यते यथा दोर्भ्यांतितीर्षतितरंगवतीभुजंगमादातु
मिच्छतिकरेहरिणांकबिंबम् मेरुंलिलंघयिषतिध्रुवमेषदेवयस्ते

ध्रुवम्

गणानुशास्तिमुच्चसमारधाति १ ॥ स्वस्वहेत्वन्वयस्योक्तिः क्रिय
यैव तु सापरा ॥ यत्र क्रिययैव स्वस्वहेतोरन्वयो हेतुत्वेन सम्ब
न्धः प्रकाश्यते साऽपरा निदर्शना यथा उन्नतं पदमवाप्य यो ल
घुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतो दृषत्कणश्चार
मारुतधुतः पतत्यधः १ अत्र पतेत्पदप्रतिपाद्यस्य पातस्य का
र्यस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य कारणस्य च यथासंबन्धः
पतति पदप्रतिपाद्यया पातक्रियया प्रतिपाद्यते तथा च लाघ
वे सत्युन्नतपदप्राप्तिः पातहेतुर्यथा दृषत्कणस्येति दृष्टान्तपर्य
वसानात् निदर्शनात्वमिति ॥ अप्रस्तुतप्रशंसा या सा सैव प्रस्तु
ताश्रया ॥ ९८ ॥ प्रशंसा वर्णनं सैव अप्रस्तुतप्रशंसैव स्यर्थः प्र
स्तुताश्रया प्रस्तुतातिप्रतीतिहेतुः एतच्चालंकारत्वबीजं प्रसक्त
मिति निवारयति अप्राकरणिकेन प्राकरणिकाक्षेपोऽप्रस्तुत
प्रशंसा प्राकरणिकेनाप्रकरणिकाक्षेपः समासोक्तिरिति विवेकं
तां विभजते ॥ कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्यस्य

का॰प्र॰ १०१ | 101 | मंदेत्यपि पाठः | समासोक्ता | १०१

वचस्तुल्ये तुल्यस्यैवेति पंचधा ॥ ९८ ॥ सेप्रस्तुतवर्तते कार्यादिपंचकेप्र
स्तुते तदन्यस्य कारणादिपंचकस्याप्रस्तुतस्य वर्णनमिति पंचधासे।
त्यर्थः तत्र कार्ये प्रस्तुते कारणस्य वर्णनं यथा याताः किं न मिलंति सुं
दरि पुनश्चिंता त्वया मत्कृते नो कार्या नितरां कृशासि कथयत्येवं सबा
ष्पे मयि लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसिते
न भाविमरणोत्साहस्तया सूचितः । अत्र प्रस्थानात्किं निवृत्तोसीति का
भावि र्ये पृष्टे कारणस्य भाविमरणोत्साहस्य वचनम् किंप्राहुः प्रस्तार्ये इति।
न कारणप्रस्तावः कारणप्रस्तावे कार्यवचनं यथा राजन्राजसुता न पा
ठयति मां देव्योपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमार सचिवैर्नाद्यापि किं
भुज्यते इत्थं नाथ शुकस्तवारिभवने मुक्तोध्वगैः पंजराच्चित्रस्थानवलो।
क्य शून्यवलभावेकैकमाभाषते । अत्र प्रस्थानोद्यतं भवंतं ज्ञात्वा सहसैव।
त्वदरयः पलाय्य गताः इति प्राये पलायने कारणे प्रस्तुते तत्कार्यविशेषस्य
तस्याभाषणादिरूपं कार्यमुक्तम् सामान्ये प्रस्तुते विशेषवचनं यथा एतत्

मुखो... तमिति शेषः = कस्यचिन्मूर्खस्य वृत्तान्तं ... दाक्षिण्यमाख्यातो केचिन्मन्यन्ते कस्यचिदियमुक्तिः =
दनंतरस्था

स्पष्टबाल्यात्कियत्कमलिनीपत्रे कणं वारिणो यन्मुक्तामणिरित्यमंस्त सज
डः शृण्वन्यदस्मादपि अंगुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने श
का॰प्र॰ नैः कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तः शुचा १ अत्र जडानाम
१०२ स्थाने एवं ममत्वसंभावना भवतीति सामान्ये प्रस्तुते पुरुषविशेषस्य
ममत्वविशेषोभिहितः विशेषे प्रस्तुते सामान्यवचनं यथा सुहृद्वधू
१०२ वैशे बाष्पजलप्रमार्जनं करोति प्रतियानेन नयः स एव तुच्छः खलु मान्यसनी
तिमान्यजीवितं तस्य सभाजनं श्रियः १ तल्पे इति विशेषणे विशेष्य
वाचिनां सर्वेषामपि श्लिष्टत्वस्याश्लेषाभावेपि सादृश्यमात्रस्यैव वाच्य
तया ह्येषदेकत्वात् आद्यो यथा अल्पादपि प्रविचलेन्द्रियद्योपि ।
पायाद्यदि प्राणायनेन महानपि स्यात् अस्मद्गुरोरपि विश्वमितीदृशी
यं केनापि दिक्पकटिता पुरुषोत्तमेन १ अत्र पुंस्त्वादित्यादिविशेषणा
नां पुरुषोत्तमेनेति विशेष्यस्य च श्लेषात्पुरुषप्रतिपत्तिः न च श्लेष एवा
यं अवयवप्रसंगेः समुदायप्रसिद्धिर्बलीयसीति न्यायात् प्रसिद्धस्य
१०२

नौसन्तुरुषस्यादेयेरोवोपरस्थितेः श्लेषसंबन्धेप्रस्तुतस्यप्रथमो।
परस्थितस्येवाप्रस्तुतस्यप्रतीयमानत्वात् द्वितीयोयथा येनास्तमभ्युदितेना।
चंद्रगमितः क्रांतिं रवौतेनतेनैवपुज्येनप्रतिकर्तुमेव न पुनस्तस्येवपाद
ग्रहः ह्रीणेनेनतदनुष्ठितं यदितरेतरः किंलज्जसेनोमनागस्त्वेवंजडधा।
मनापिभवतोयथास्मिन्विसर्जनंसे १ अत्रविशेषणव्यवाचिचंद्रपदंनश्लि
ष्टम् तृतीयोयथा आहायवारिपतितः सवितांबुधिभ्यः किंतावदर्जि
तमनेनदुरंतीवेन दारीकृतंचवडवारुदरेनेकृतंचपाताललक्षितिकुहरेवि
निवेशितंच १ अत्रश्लेषाभावेपिसादृश्यमात्रेणास्तुरूपाक्षेपः
यथावामम कौटिल्यंनयनेनिवारयननरांघ्रीग्रांगतिंमीलयस्मकार्थां
ऊरुभारंतीविहसितेपयोदुत्त्वमायोमय ऊयामप्रमदाविलासरसि
कः कांतस्त्वयासाहितोनायंननन्दनिमारारीजनसमाचारैः समाकृष्य
ते १ इयंचत्रिधा क्वचिद्वाच्यार्थप्रतीयमानार्थयोनध्यारोपमात्रेण" क्व
चित्प्रतीयमानार्थाध्यारोपेण क्वचित्वंशाभेदेननतदध्यारोपानारोपा।

भ्याम्‌ तत्राद्यायां यथा अब्धेरंभःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लंघनेपि क्षमंते आहो रिक्तः कथमपि भ
वेदेष दैवात्तदानीं को नाम स्यादवटकुहरालोकनेप्यस्य कल्पः ।
अत्राप्रस्तुतेप्यवैवर्ण्यसंबाधितात्वेवेति नेह प्रतीयमानार्थाध्यारोपः
द्वितीयायां यथा कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वै
राग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते वामेनात्र वटस्तमः
ध्वगजनः सर्वात्मना सेवते न च्छायापि परोपकारकरणे मार्गस्थित
स्यापि मे । अत्र वाच्यधर्माः शाखोटके संबोध्यत्वेभ्यारचितत्वादिकमनु
पपन्नमिति प्रतीयमानाध्यारोपः तृतीयायां यथा सोपूर्वो रसनाविप
र्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसा ।
सोक्तेन वा सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोद्याप्यसावन्तः शून्य
करो निषेव्यत इति भ्रातः कणपग्रहः । अत्र हस्तिनो रसनाविपर्यासः
शून्यकरत्वं मदश्च वाच्यस्य भ्रमरस्य सेव्यत्वाभावहेतुत्वेन वाच्यानि
न च तद्वेतवः मदस्तत्प्रसूतसेवने हेतुरिति तद्वदंशोप्रतीयमानस्तु बाध्या

रोपापेक्षा" कार्यचापलं तु अमरासेवनहेतुर्वेवेति निदर्शनेनाध्यारो।
पइति ॥ निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् प्रस्तुतस्य यद
न्यत्वं यद्यर्थोक्तौ च कल्पनम् १०० कार्यकारणयोर्यश्च पौर्वापर्यविप
र्ययः विज्ञेयातिशयोक्तिः सा ॥ प्रकृतस्योपमेयस्य समेनोपमानेन
निगीर्याध्यवसानं तूत्तीयसी बुद्धिः सैकातिशयोक्तिः यच्चान्यदेव वस्तु
त्वेन विविच्यमानाकारं वस्तु तदन्यत्वेनाध्यवसीयते सा द्वितीया यच्चेच्छब्दे
न यदि शब्देन वा यद्यर्थोक्तौ कल्पनमर्थादसंभविनोऽर्थस्य सा तृतीया।
यश्च कारणकार्ययोः प्रसिद्धस्य पौर्वापर्यस्य विपर्ययो वैपरीत्यम् का
रणशीघ्रकारितां प्रतीतये सा च तुर्थी इति चतस्रोऽतिशयोक्तयः तत्राद्या
यथा कमलमनंभसि कमले च कुवलये तानि कनकलतिकायाम् । मे ५ ५
सा च सुकुमारसुभगोत्पातपरंपरा केयम् १ यथा वा मम कलशोप
रमम हल्वंति मिरस्तोमस्य सोमसहवासः वियति च शैवलवल्लीषि
बिवन्तस्तुमेरुसर्गसौभाग्यम् १ द्वितीया यथा अस्संलडहत्तणअं लडहत्तणशब्दः सौ
अण्णा किंअकाविवट्टणछाआ सोमासामस्स पआवइणो रेहळिव्वगणाहो कुमार्यपदेशः
अन्यत्सौकुमार्यमन्यैव कापि वर्तनच्छाया श्यामा सामान्यप्रजापतेः रेखैव च न भवतीति —

का॰ प्र॰
१०४
105

द १ स्फुटम् तृतीया यथा राकायामकलंकं चेदमृतांशोर्भवेद्वपुः तस्या
मुखं तदा साम्यपराभवमवाप्नुयात् १ चतुर्थी यथा हृदयमधिष्ठितमा
दौ मालत्याः कुसुमचापबाणेन चरमं रमणीवल्लभलोचनविषयं त्वया भ
जता १ ॥ प्रतिवस्तूपमा तु सा ९९ सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थि
तिः ॥ एकस्य सामान्यस्य साधारणधर्मस्य वाक्यद्वये उपमानोपमेयवाक्य
योर्यत्र द्विरवस्थितिः अर्थाच्छब्दभेदेन अभिन्नपदस्य दुष्टत्वात् सा प्रतिवा
स्तूपमा वस्तुनो वाक्यार्थस्योपमानत्वात् अत्र द्विरित्यनेकोपलक्षके
मालानुरोधात् सा च द्विधा अमालारूपा मालारूपा च तत्राद्या यथा देवी
भावं गमिता परिवारपदं कथं भजत्वेषा न खलु परिभोगयोग्यं दैवतरूपाङ्
कितं रत्नम् १ अत्र परिवारपदत्वपरिभोगयोग्यत्वयोरनर्थान्तरत्वात् उदा
हरणत्वमित्येके कथं भजति न खल्वित्यनयोरेकार्थत्वात् दृष्टान्तमित्यपरे
अन्त्या यथा यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः लव
णमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता १ अत्र किमद्भुतमित्या
दिभिरद्भुताभावस्य वाक्यचतुष्टयेऽप्युपादानान्मालात्वं चतुर्थवाक्यं चोप

मेयवाचि ॥ दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् १२ एतेषामुपमानो
पमेयसादृश्यधर्माणां सर्वेषां प्रतिबिम्बनं दृष्टान्तः दृष्टान्तो निश्चयनिर्वाह
कोऽयमलंकार इति पुनरर्थः सच द्विधा साधर्म्यवैधर्म्यरूपाभ्याम् तत्र साध
र्म्ये यथा त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् आलोके हि हि
मांशोर्विकसति कुमुदं कुमुद्वत्याः । अत्र साधर्म्यस्यापि प्रतिबिम्बमेवेति प्रा
तिवस्तूपमाभेदः वैधर्म्येण यथा तवाहवे साहसकर्मशर्मणः करं कृपा
णान्तिकमानिनीषतः भटाः परेषां विशरारुतामगुर् दधत्यवाते स्थिरतां हि
पांशवः । वैधर्म्यविपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालंकारत्वम् ॥
सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् सैव क्रियासु बह्वीषु कारकस्ये
ति दीपकम् १३ ॥ प्रकृताप्रकृतानामर्थानामुपमानोपमेयभूतानां धर्मिणां
धर्मस्य क्रियादेः सकृद्वृत्तिरेकवारमेवोपादानं यत्तदेकम् एकस्यैव सर्ववा
क्यदीपकत्वेन प्रदीपसाम्यात् कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिरेव
द्वितीयं दीपकम् इति प्राहुः प्रकारे तेनोक्तप्रकारद्वयमेव दीपकमित्यर्थः
आद्यं यथा किंवणाणां धणाणां आणकाणां मणीकेसरादिसिंहाणं उ
लवालिआणाणणाणं आउजो छिप्पन्ति निस्समयाणं । अत्र छिप्पन्तीति सकृ

का·प्र·
१०५

उपात्तम् उत्पलपालिकानां स्तनाद्युपमेयाः अन्यं यथा स्विद्यति कूणति वे-
ल्लति विचलति निमिषति विलोकयति तिर्यक् अन्तर्नन्दति चुम्बितुमिच्छति नव- नव
परिणया वधूः शयने १ अत्र वध्वाः एकस्याः कारकस्य सकृद्वृत्तिः ॥ मालादीपकं
मालाद्यं चेद्यथोत्तरगुणावहम् ॥ महोत्कर्षमुपकारकम् यथा संग्रामांगणमा- न
गतेन भवता चापे समारोपिते संप्राप्ते परिपंथियोधनिवहे सा[illegible]मासादि-
तम् कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं नृपते त्वया सितयश-
स्तेनापि लोकत्रयम् १ एवम् मालोपमादीनां वस्तूपमानसंबंधाज्ञापरो विशे-
षः इति न ते लक्षिताः इदं तु मालादीपकं पृथगुचितम् उत्तरोत्तरमुपकार्योपका-
रकतया परस्परसंसर्गेण मालाभावापन्नानां सकृद्धर्मनिर्देशरूपत्वेनाधिक-
विशेषान्तःप्रवेशादिति ॥ नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता १०४ ॥
नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा धर्मस्त्वनन्तरं यदुपा-
दीयत इति शेषः सकृत्पदोपादानात् यत्र प्रतिस्वं भिन्ना धर्माः एकस्यैव वा सर्वत्रो-
पादानं तत्र नातिप्रसंगः तत्र प्राकरणिकानामेव यथा पाण्डुक्षामं वदनं सरसं हृ-
दयं न वालसं च वपुः आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः १ अत्र प्रकृता-
नां विरहिणीवदनादीनामेव धर्मत्वेनावेदनाख्यो धर्म उपात्तो न तूपमानतो

गधर्मतया अप्राकरणिकानामेव यथा कुमुदकमलनीलनीरजालिर्ल-
लितविलासजुषोर्दृशोः पुरः का अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे
तवाननस्य १ अत्र कामिन्या वर्णनीयत्वात्प्राकरणिकानां कुमुदादीना-
मेव धर्मतया एवोईकापरत्वंपोधिक्षेपः उत्पाई प्रतिहतत्वं चोपात्तम् ॥ उ-
पमानाद्यदन्यस्य व्यतिरेकः स एव सः ॥ अन्यस्योपमेयस्य व्यतिरेको विशेष-
णाधिक्यं स व्यतिरेकः केचित्तु यत्रोपमेयात् उपमानस्य उपमानादुपमेयस्य वाऽ-
धिक्यं स व्यतिरेक इति लक्षणम् कथमन्यथा क्षीणः क्षीणोपि शशी भूयो भूयो-
ऽभिवर्धते सत्यम् विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु १ इत्यादिसंग्रहः अ-
त्रस्य उपमानभूतस्य शशिन उत्कर्षः दैन्येपि पुनर्वृद्धिरित्याहुः तन्नयुक्तम् अस्ये-
यत्तस्योपमानता तदाधिक्यं चोपमेये यौवन एव विवक्षितम् तस्मादुपमानस्यो-
त्कर्षे व्यतिरेक इति रिक्तं वचः । एनं विभजते ॥ हेत्वोरुक्तावनुक्तीनां त्रये साम्ये नि-
वेदिते २० ५ शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्ट तत् ॥ व्यतिरेकस्य द्वौ हेतू
उपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षनिमित्तं च तयोर्द्वयोरप्युपादा-
नसत्येकः प्रकारः अनुपादाने त्रयो भेदाः प्रथमस्यैव द्वितीयस्यैव उभयोर-
पि हेत्वोरनुपादानात् तदेवं चत्वारो भेदाः ते च प्रत्येकं त्रिधा साधर्म्यस्य कथि-

का·प्र·
१०६

106

दिवादिनाशब्दाद्यर्थाक्षेः प्रतिपादनात् क्वचित्तुल्यादिशब्दाद्येनार्थसाम्या क्वचिदु-
भयाभावेप्याक्षेपेणेतित्रिधाचप्रभेदाः तेषत्प्येकमश्लिष्टश्लिष्टशब्दाद्युक्तिच
तुर्विधप्रभेदः समन्वयः तत्राश्लिष्टभेदेषुहेत्वोरुक्तौशब्दाद्युक्तैसाम्येयथा असि-
मात्रसहायस्यप्रभूतारिपराभवे अन्यतुच्छजनस्येवनस्मयोस्यमहाधृतेः
१ अत्रोपमानेतुच्छत्वमुपमेयेमहाधृतित्वंचापकर्षोत्कर्षहेतू इवशब्द-
स्त्वाच्छब्दाद्यौपम्यम् अत्रैवतुच्छत्वमात्रस्यमहाधृतित्वमात्रस्यवाद्व-
योरप्यविवक्षमेणानुपादानेहेत्वनुपादानभेदत्रयेपिशब्दाद्यौपम्यभेदत्रयंद्र-
ष्टव्यम् हेतुद्वयोपादानएवार्थसाम्येयथा असिमात्रसहायोपिप्रभूता-
रिपराभवे नैवान्यतुच्छजनवत्सगर्वोयंधृतेर्निधिः १ अत्रतुल्यार्थवति
त्यार्थ्यौपम्यम् अत्रपूर्ववदनुपादानेभेदत्रयंद्रष्टव्यम् हेत्वोरुक्तावे
वाक्षिप्तेसाम्येयथा इयंसुनयनादासीकृततामरसश्रिया आननेनाऽक-
लंकेनजयतीन्दुंकलंकिनम् १ अत्राकलंकित्वकलंकित्वेव्यतिरेकहे
तूसमुपात्ते इवादीनांतुल्यादीनांवाऽभावात् आक्षिप्तौपम्यम् अत्रैवहे-
त्वनुपादानेभेदत्रयंपूर्ववद्द्रष्टव्यम् नचाक्षिप्तभेदउपमायांशंकनीयः
जयत्यादिशब्दस्यावष्टम्भकत्वयाव्यतिरेकेणाविषयापहारात् अथश्लि-

श्रि

ष्टभेदे गुणहेत्वोरुक्तौ श्लिष्टाक्षेपमौपम्यं यथा । जितेन्द्रियतया सम्यग्विद्यावृ
द्धनिषेविणः । अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥ अत्र श्लि
ष्टो गुणशब्दः । तदर्थस्यातिगाढत्वभङ्गुरत्वे च उत्कर्षापकर्षहेतू सम
र्पिते इवार्थे वतिरिति श्लिष्टोक्तमौपम्यम् । अत्रैव पूर्ववदनुपादाने भेदत्र
यं द्रष्टव्यम् । तत्रैवार्थसाम्ये यथा । अखण्डमण्डलः श्रीमान्पश्यैष पृथि
वीपतिः । न निशाकरवज्जातु कलावैकल्यमागतः ॥ अत्र कलादि
शब्दाः श्लिष्टाः कलावैकल्यतदभावौ हेतू शब्दोपात्तौ तुल्यार्थे वतिरित्या
र्थमौपम्यम् । अत्रानुपादानत्रयं चिन्त्यम् । यद्वाखण्डमण्डलत्वकलावैक
ल्ये उत्कर्षनिकर्षहेतू तत्राखण्डमण्डलत्वकलावैकल्ययोः प्रत्येकं युग
पद्वानुपादानेऽनुक्तित्रयं परिभावनीयम् । अयमेव मालारूपो यथा । ह
रवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः । रविवन्न चातिदुःस
हकरतापितभूः कदाचिदसि ॥ पूर्ववत् । तत्रैवार्थसाम्ये यथा । नित्यो
दितप्रतापेन त्रियामामीलितप्रभः । भास्वतानेन भूपेन भास्वानेष विनिर्जि
तः ॥ अत्र भास्वतेति प्रतापेति च श्लिष्टम् । पूर्वोक्तोपात्ते हेतुद्वयम् । इवादे

का॰प्र॰
१०
107

त्वल्पादिष्वाह्लादानांचाभावात् आद्यमैवोपमा अत्रापिपूर्ववदनुपादानेभे
दत्रयंद्रष्टव्यम् निर्जितजयत्वादिष्वाह्लादाभावेपिश्लिष्टविशेषणेनोपमा
क्षेपाद्द्वयंभेदःसंभवति यथा स्वच्छात्मतागुणसमुल्लसितेन्दुबिंबबिं
बप्रभाधरमकृत्रिममृद्वङ्गीयम् पूनामतीवपिवतांरजनीषुयत्रतृष्णां
जहारमधुनाननमंगनानाम् १ श्लिष्टोक्तियोग्यपदस्यपृथगुपादा
नेपिएवंजातीयकाभेदाःसंभवंतितेननयेवदिशाद्रष्टव्याः ॥ निषेधो
वक्तुमिष्टस्ययोविशेषाभिधित्सया १९६ वक्ष्यमाणोक्तविषयःसआ
क्षेपोद्विधामतः ॥ वक्तुमिष्टस्यप्राकरणिकत्वादवचनार्हस्ययोनि
षेधःसआक्षेपःनिषेधोनिषेधत्वेनसाध्यः प्रयुक्तात्त्वान्निषेधेप्यर्थाग
त्याविधेरेवप्रतिपत्तेः तत्प्रयोजनमाह विशेषाभिधित्सयेति वक्ष्य
माणविषयेप्रकृतवचनस्याप्यवक्तव्यत्वविषयेतिप्रसिद्धत्वंविशेषः विभज
तेवक्ष्यमाणेति तत्रवक्ष्यमाणविधित्सयायथा एएहिकिंविकीएवि
कएनिकिववबभणामिअलमहवा अविआरिअकज्जारंभकारिणी
मरउणाभणिस्सं १ अत्रविरहजनितदुर्दशानिशायोवक्ष्यमाणोनिषिद्धः

उक्तविषयो यथा ज्योत्स्नामौक्तिकदामचंदनरसः शीतांशुकांतद्र
वः कर्पूरं कदलीमृणालवलयान्यंभोजिनीपल्लवाः अंतर्मानस
मास्त्वया प्रभवतां तस्याः स्फुलिंगोत्करव्यापाराय भवंति हंत कि
मनेनोक्तेन न ब्रूमहे १ ॥ क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना
१०७ ॥ वैयाकरणानां मते क्रियैव हेतुरिति क्रियेत्युक्तम् वस्तुतस्तु कारण
प्रतिषेधेऽपि कार्यवचनं विभावना न च विरोधः स्वाभाविकस्य कारणां
तरस्य वा विभावनात् उदाहरणम् अस्तमितललिताभिरहताप्यदस्तरु
जमलितकलैरदृष्टापि परिवर्तते स्म नलिनी लहरीभिरलोलिताप्यघू
र्णत सा १ विशेषोक्तिरखंडेषु कारणेषु फलावचः ॥ अखंडेषु मिलि
तेषु प्रसिद्धकारणेषूक्तेषु कार्याभाववचनं विशेषोक्तिः अत्राप्यप्र
सिद्धकार्यभावहेतौ पर्यवसानाद्विरोधाभावः सा च त्रिधा अनुक्तनि
मित्ता उक्तनिमित्ता अचिंत्यनिमित्ता च तत्राद्या यथा निद्रानिवृत्तावु
दिते द्युरत्ने सखीजने द्वारपदं पराप्ते श्लथीकृताश्लेषरसे भुजंगे चचा
ल नालिंगनतोंगना सा १ अत्रानुरागातिशयो निमित्तं चलनाभावे ।

का॰प्र॰
१०८
108

सचविशेषोक्त्यलंकारःप्राकथनत्वेपिनोक्तानुक्तनिमित्तेयम् उक्तनिमि
त्तायथा कर्पूरइवदग्धोपिशक्तिमान्योजनेजने नमोस्त्ववार्यवी
र्यायतस्मैमकरकेतवे १ अत्रकर्पूरइवदाहमात्रेउपमानंनतुशक्तिम
त्त्वेपीतिभास्करः शक्तिमत्त्वेउक्तिपरमार्थः ईषद्दग्धस्यसोस्माद्य।
तिष्ठायात् भस्मीक्रियायाभवतामनोभूश्चापेनचापेक्षनसारभा
वः निजांपरहेलापरक्षमामपेक्ष्यसंग्रामनेनाधिकवीर्यनार्जि १ इ
त्यादिनैवधत्पूर्निनात् अत्रावार्यवीर्यत्वशक्तिमत्त्वेकार्याभावरू
पेहेतुरुक्तः अचिन्त्यनिमित्तायथा सएकस्त्रीणिजयतिजगन्ति
कुसुमायुधः हरतापितनुंयस्यशंभुनानहृतंबलम् १ अत्रत।
नुहरणेबलाहरणस्यहेतुर्विशेषोक्त्यलंकारःनप्राकथनत्वस्याचिन्त्यनिमि
त्तेयम् ॥ यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयः १०८ ॥ एक
स्त्रिधावससिचेतसिचित्रमत्रदेवद्विषांचविदुषांचमृगीदृशांच ।
तापंचसंमदरसंचरतिंचपुष्णन्शौर्योष्मणाचविनयेनचलीलया
च १ स्पष्टम् ॥ सामान्यंवाविशेषोवातदन्येनसमर्थ्यते यत्तुसो

र्थान्तरन्यासः साधर्म्येणेतरेण वा ९८ ॥ सामान्यं यदि विशेषेण स
मर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः द्वयोरपि प्रत्येक
समर्थनहेतुः साधर्म्यं वैधर्म्यं चेति चतुःप्रकारोयमित्यर्थः तत्र वि
शेषेण सामान्यसमर्थनं साधर्म्येण यथा निजदोषावृतमनसा
मतिसुन्दरमेव भाति विपरीतम् पश्यति पित्तोपहतः शशिशुभ्रं शं
खमपि पीतम् १ सामान्येन विशेषसमर्थनं साधर्म्येण यथा सुसि
तवसनालंकारायां मित्यादि विशेषेण सामान्यसमर्थनं वैधर्म्येण
यथा गुणानामेव दौरात्म्याद्धुर्यो धुरि नियुज्यते असंजातकिणस्कं
धः सुखं स्वपिति गौर्गलिः १ अत्र धुर्य इत्यादि साधारणत्वात् सामान्यं
गौर्गलिरिति विशेषः वैधर्म्यं चस्फुटम् वैधर्म्येण विशेषस्य सामान्ये
न समर्थनं यथा अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृ
शम् तएव धन्याः सुहृदां पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः १ सामा
न्यविशेषभावउपपादनीयः ॥ विरोधः सोऽविरोधेपि विरुद्धत्वेन यद्वचः
वस्तुगत्याविरोधाभावेपि यद्द्वयोर्विरुद्धयोरिवाभिधानं स विरोधः एवं

का॰प्र॰
१०९
109

विभज्यते ॥ जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणैस्त्रिभिः १२ क्रियाद्वा
भ्यामथ द्रव्यं द्रव्येणैवेति ते दश ॥ जात्याद्यैरिति जातिगुणक्रियाद्रव्यैः
त्रिभिरिति गुणक्रियाद्रव्यैः द्वाभ्यामिति क्रियाद्रव्याभ्याम् यद्यपि गुणा
नामपि जात्या विरोधः संभवत्येव तथापि जातेर्गुणविरोध एव प्रविष्टत्वा
न्न गुणास्त्रिभिरित्युक्तम् एवं क्रियाद्वाभ्यामित्यपि द्रष्टव्यम् तदयमर्थः ।
जातिनिरूपितो भेदश्चतुर्द्धा गुणनिरूपितस्तु पूर्वभेदभिन्नस्त्रिधा एवम
ग्रेऽपि तत्र जात्या जातेर्विरोधो यथा अभिनवनलिनीकिसलयमृणाल
वलयादि दवदहनराशिः सुभगकुरंगदृशोऽस्य विधिवशात्तस्य हि यो
गपविपाते । अत्र नलिनीकिसलयत्वादिजातीनां दहनत्वजात्या वि
रोधः वियोगनिश्चयेन गौणत्वात्तदाभासता एवमग्रेऽप्यूह्यम् जातेर्गु
णेन यथा गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगंभीराः ।
विश्वंभराप्यतिलघुर्नरनाथ तवान्तिके नियतम् । अत्र गिरित्वादिजा
तीनामनुन्नत्वादिगुणैर्विरोधः वर्णनीयातिशयविवक्षया तु परीहा
रः विश्वंभरेति तु न जात्युदाहरणम् जातेः क्रियया यथा येषां कंठपरि

ग्रहमणीयितां संप्राप्य धाराधरस्त्रीलया: सोप्यनुरज्यते च कमपि स्नेहं
परां मोतिच नेषां संगरसक्रमनसां राज्ञां त्वया भूयते पांसूनां पट
लैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् १ अत्र धाराधरत्वजातेरनु
लौहित्यवैक्लव्यपा र्थकत्वाद्विरोधः रागस्नेहपराप्तिक्रियाभ्यां विरोधः ॥ एवमग्रेप्यविरोधकल्प्यः नीरस
त्वस्यानुरागेण विरोध इत्यपव्याख्यानम् अनुदाहरणत्वप्रसंगात् ।
जातेर्द्रव्येण यथा सृजति च जगदिदमवति च संहरति च हेलयैव यो ।
नियतम् अवसरवशतः प्राकरो जनार्दनः सोतिचित्रमिदम् १ अत्र
प्राकरत्वजातेर्जनार्दनेन द्रव्येण विरोधः ॥ गुणस्य गुणेन यथा सततं
मुसलासक्ता बहुतरगृहकर्मघटनया नृपते द्विजपत्नीनां कठिनाभ
वनि सति कराः सरोजसुकुमाराः १ अत्र कठिनत्वसुकुमारत्वयोर्विरोधः
गुणस्य क्रियया यथा पेलवमपि खलवचनं दहति नितरां मानसं सतत्व
विदाम् परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति १ अत्र ।
पेलवत्वपरुषत्वयोर्गुणयोर्दाहप्रमोदक्रियाभ्यां विरोधः यथा वा मद्भ्रा
तुः श्रीहर्षस्य सर्वतः पुरत एव वर्तते पात्रतां न पुनरेति चक्षुषोः हन्त तोऽ
पि भुजयोर्न भाजनं कोयमालि वनमालिनः क्रमः १ अत्रादर्शनगमनक्रिय

का॰प्र॰
११
110

योर्गमनाभावभङ्गभाजनत्वाभ्याम् अत्र जातिविरुद्धस्यैव ग्रहणाद्बाहुल्येन वि-
वक्षणात् गिरय इत्यादि नैवोदाहृतम् गुणस्य द्रव्येण यथा क्रौंचाद्रिरु-
द्दामदृषद्दृढोसौ यन्मार्गणानर्गलशातपाते अभून्नवांभोजदलाभिजातः स
भार्गवः सत्यमपूर्वसर्गः १ अत्रांभोजदलाभिजातत्वस्य गुणस्य क्रौंचाद्रि-
द्रव्येण विरोधः क्रियायाः क्रियया यथा परिच्छेदातीतः सकलवचनानामऽ-
विषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् विवेकप्रध्वंसादुपचित-
महामोहगहनो विकारः कोप्यंतर्जडयति च तापं च कुरुते १ अत्र जडयति
च तापं च तनुत इति क्रिययोर्विरोधः क्रियाया द्रव्येण यथा अयं वारामे-
को निलय इति रत्नाकर इति श्रितोस्माभिस्तृष्णाकवलितमनोभिर्जलनि-
धिः इदं को जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरा-
मापास्यति मुनिः १ अत्र पानक्रियायाः कर्मीभूतेन जलनिधिना विरोधः
यद्यपि जलनिधीनां बहुत्वेन न द्रव्यविरोधोदाहरणत्वमुचितम् तथाप्येक-
लवणांबुधिपरतया समर्थनीयम् द्रव्यस्य द्रव्येण यथा समदमतंगजम-
दजलनिष्यंदतरंगिणीपरिष्वंगात् क्षितितिलकत्वयि तटजुषि शंकरचूडा-
पगापि कालिंदी १ अत्र गंगायमुनयोर्विरोधः ॥ स्वभावोक्तिस्तु डिंभादेः स्व-

क्रियारूपवर्णनम् ॥११२॥ स्वत्वं च स्वमात्रावच्छिन्नत्वं न तु स्वावच्छिन्नत्वमात्र-
मात्रम् अनेन साधारणधर्मवर्णनेति ध्वनितः रूपशब्देन वर्णसंस्थानं
चोच्यते उदाहरणम् पश्चादंघ्री प्रसार्य त्रिकनतिविततं द्राघयित्वांगमुच्चै
रासज्याभुग्नकंठो मुखमुरसि सटाधूलिधूम्रां विधूय घासग्रासाभिलाषाद
नवरतचलत्प्रोथतुंडस्तुरंगो मंदं शब्दायमानो विलिखति शयनादुत्थितः
क्ष्मां खुरेण १ अत्राश्वमात्रगतयोः क्रियासंस्थानयोर्वर्णनम् ॥ व्याजस्तु
तिर्बुवि निंदास्तुतिर्वा रूढिरन्यथा ॥ मुखे निंदा वा गतौ यत्स्तुतौ पर्यवसा-
नं स्तुतिर्वा मुखे व्याजोक्तिर्निंदायां पर्यवसानं न व्याजस्तुतिर्वाच्यमिलपर्थः कथ
मुभयोरनेनाभिधानमिति चेत् व्याजरूप्याजेन स्तुतिरिति विग्रहात् अन्य
स्य तु व्याजरूपा स्तुतिरिति तत्राद्यायथा हित्वा त्वामुपरोधवंध्यमनसां
मन्येन मौलिः परो लज्जावर्तनमंतरेण न रमामन्यत्र संदृश्यते यस्त्यागं तनुते
नरांमुखभवैरेत्याश्रितायाः श्रियः प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्या-
स्याः स्थितिः १ स्पष्टम् अन्याययथा हे हेलाजितबोधिसत्त्व वचसां किं विस्तरै
स्तोयधे नास्ति त्वत्समः परः परहिताधाने गृहीतव्रतः त्वय्यन्याप्यजनोप
कारघटनावैमुख्यलब्धायशोभारप्रोद्वहनेकरो विफलप्रयासमहासायिकं यन्म

रोः। अत्रोपकारकवैषम्यपर्यवसानम् ॥ सा सहोक्तिः सहार्थस्य बलादे
कं द्विवाचकम् ११२ ॥ प्राधान्यप्राप्तमाप्यकार्यद्वयाभिधायकं पदं यत्र सहार्थान्वय
बलादनेकार्थाभिधायकं सा सहोक्तिः चैत्रमैत्रौ सह गच्छत इत्यादौ तु प्रा
धान्यमेवोभयाभिधानम् यथा सह दिअसणिसाहिं दीहरा सासदंडा
सहमणिवलएहिं बाहधारा गलंति तुह सुहअ विओए तीअ उव्वेविरी
ए सह अ तणुलदाए दुब्बला जीविदासा। अत्र दीर्घत्वादीनां श्वासादि
भिरन्वयः साक्षादेव प्राप्तः दिवसादिभिस्तु सहार्थान्वयबलात् ॥ विनोक्तिः
सा विनान्येन यत्रान्यः सन्न नेतरः ॥ सन् शोभमानो न न नेतरो नाशोभन इ
त्यर्थः तेन केनचिद्विना कस्यचिदशोभनत्वं शोभनत्वं वा प्रतिपाद्यते
सा विनोक्तिः तत्राशोभनत्वं यथा अरुचिर्निशया विना शशी शशिना वि
ना सापि विना महत्तमः उभयेन विना मनोभवस्फुरितं नैव चकास्ति का
मिनोः। शोभनत्वं यथा मृगलोचनया विना विचित्रव्यवहारप्रतिभा
प्रभाप्रगल्भः अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः।
अत्र मृगलोचनयाऽसुहृद्द्वेषेण च विना नरेन्द्रसूनोर्विचित्रव्यव
हारप्रागल्भ्यत्वं चन्द्रसुन्दराशयत्वरूपं च शोभनत्वमुक्तम् ॥ परिवृत्तिर्वि

निमयोऽर्थानां स्यात्समासमैः २१३ परिवृत्तेर्लक्ष्यालंकारनिर्देशः ।
पूर्वाचार्याणां तथैवोद्देशादर्शनात् अतो न लक्ष्यलक्षणसंदेहः समा
समैरिति विभागः विनिमयो हि केनचिद्वस्तुना दत्तेन कस्यचिदा
दानम् तत्र क्वचित्समेन समस्य क्वचिदसमेनासमस्य असममपि द्वि
धा क्वचिन्न्यूनेनोत्तमस्य क्वचिदुत्तमेन न्यूनस्य इति त्रिविधोऽयमित्य
र्थः समासमत्वं चोपादेयानुपादेयत्वाभ्याम् तत्राद्यं यथा ।
लतानामेतासामुदितकुसुमानां मरुदयं मतं लास्यं दत्त्वा श्रयति भृ
शमामोदमसमम् लतास्त्वध्वन्यानामहह दृशमादाय सहसा ।
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् १ अत्र प्रथमार्धे ला
स्येनोपादेयतया समस्यामोदस्य द्वितीयार्धेऽनुपादेयतयोत्तमया
दृशाधिव्याधीनामतादृशानुपादेयानां न्यूनानां विनिमयः अन्त्यो य
था नानाविधप्रहरणैर्नृप संप्रहारे स्वीकृत्य दारुणनिनादवतः ।
प्रहारान् दृप्तारिवीरविसरेण वसुंधरेयं निर्विप्रलंभपरिरंभविधि
र्वितीर्णा २ अत्रोत्तमया वसुंधरया न्यूनानां प्रहाराणां विनिमयः ।

का॰प्र॰
११२
112

प्रत्यक्षा इव यद्भावाः क्रियंते भूतभाविनः तद्भाविकं ॥ भूतभाविन इ
ति द्वंद्वो न कर्मधारयस्तेनापि विरोधः भूताभाविनो यत्प्रत्यक्षा इव क्रि
यंते प्रत्यक्षतया विधीयंते तद्भाविकम् भावः कवेरभिप्रायो निश्च
यादिप्रतीतिविषयकोत्रास्तीति व्युत्पत्तेरित्यर्थः उदाहरणम् आ
सीदंजनमत्रेति पश्यामि तव लोचने भाविभूषणसंभारां साक्षा
त्कुर्वे तवाकृतिम् । अत्र पूर्वार्द्धे भूतस्यांजनस्य उत्तरार्द्धे भाविनो भू
षणसंभारस्य प्रत्यक्षतयाभिधानम् ॥ काव्यलिंगं हेतोर्वाक्यप
दार्थता १२४ ॥ अत्र विवक्षितविवेकेन हेतुवचनं काव्यलिंगमिति
लक्षणम् वाक्यपदार्थेनेति विभागः वाक्यार्थता पदार्थता चेत्य
र्थः तत्र वाक्यार्थता यथा वपुःप्रादुर्भावादनुमितमिदं जन्मनि
पुरा पुरारे न क्वापि क्षणमपि भवंतं प्रणतवान् नमन्मुक्तः संप्रत्यहम
तनुरग्रेप्यनतिमानितीशाहं तत्क्षंतव्यं तदिदमपराधद्वयमपि । अत्र पु
रा क्वचिदपि नाहं भवंतं प्रणतवान् अग्रेप्यहमनतिमानित्यनयोर्वा
क्ययोरर्थौ नमननमपराधे हेतुः अनेकपदार्थता यथा प्रणयिस

ष्वीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननैरपि ताम्य
ति यत् वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकाण्ड
यमदण्ड इवैष भुजः १ अत्र शस्त्रोपक्षेपो भुजपाते हेतुः न चायं वा-
क्यार्थः शस्त्रमुपक्षिपत इत्येतावन्मात्रस्यावाक्यार्थत्वात् तत्र वपुषि-
वधाय शस्त्रमुपक्षिपत इत्यस्यापि न वाक्यार्थत्वं विशेषणत्वादिति न
ह्यर्थस्यापि हेतुत्वेन वाक्यार्थस्य हेतुत्वमिति एकपदार्थता यथा भ
स्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपानपरम्परां गिरि-
सुताकान्तालयालंकृतिम् अद्याराधनतोषितेन विभुना युष्मत्सप-
र्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे १ अ-
त्र महामोहत्वे सुखालोकोच्छेदित्वं हेतुः तच्च समासादेकपदार्थत्वे-
व अर्थान्तरन्यासे त्वर्थस्य तथोपनिबद्धस्य हेतुत्वे पर्यवसानम् इह तु-
साक्षादेव हेतुविभक्त्यादिना हेतुतयोपनिबन्ध इति ततो भेदः ॥ प
र्यायोक्तं विना वाच्यवाचकत्वेन यदुच्यते ॥ वाच्यवाचकभाववभिन्नेनावग
मनव्यापारेण गम्यार्थाद्वाच्यस्यैव यदभिधानं तत्पर्यायोक्तम् पर्यायेण भं-

गंतरेणाभिधानात् ध्वनेस्तु न वाच्यएवार्थो विषयइति ततो भेदः उदा
हरणम् यंप्रेक्ष्यचिररूढापिनिवासप्रीतिरुज्झिता मदेनरावणमुख
विमानेनहृदयेहरेः १ अत्रैकएवार्थः ऐरावणमुखेमदमानयोरुज्झि
तावितिकर्तृतयामदमानाभ्यांतनयोरधिकरणयोर्निवासप्रीतिरुज्झि
तेत्यभिप्रायश्चप्रतिपाद्यते तेनयद्देवोच्यते तेनदेवव्यंग्यम् नचप्रतिप
न्नस्यैवप्रतिपत्तिर्निष्फलेति किंव्यापारद्वयेनेति वाच्यम्
यतोयथाव्यंग्यंतथानोच्यते प्रकारयोर्भेदात् एकरूपेवस्तुनिप्रका
रभेदएवकथंस्यादितिचेत् यथाप्रत्यक्षेणविचलतिनिर्विकल्पकस
विकल्पयोरेकएवग्राह्योर्थस्ताभ्यांविषयीक्रियते नपुनर्यथानिर्विकल्प
कविषयस्तथैवसविकल्पकेनापिविषयीक्रियते भिन्नत्वसंसृष्टत्वा
विषयकंहिनिर्विकल्पकम् भिन्नत्वसंसृष्टत्वप्रकारकंतुसविकल्प
कमिति ॥ उदात्तंवस्तुनःसंपत् ॥ संपत्समृद्धियोगोनतुतस्यैवा
तिशयः उदाहरणम् मुक्ताःकेलिविसूत्रहारगलिताःसंमार्जनीभि
र्हृताःप्रातःप्राङ्गणसीम्निमन्थरचलद्बालांघ्रिलाक्षारुणाः हारादाडि

मबीजगर्भां किंतावियः कर्बनिकेलीष्वकायहिहूम्नवनेषुभोजनपतेः

सम्पागलीलायितम् १ अत्रविहङ्गवनस्पगुरुमारिचनसमरङ्गिपो

गः ॥ महतांचोपलक्षणम् ॥ २५ ॥ महतांयदुपलक्षणमंगभावो

र्थान्तराणीयेनदप्युदाममिप्यर्थेः उदाहरणम् नदिहमरएपयस्मिन्कपा

रुएवचनानुपालनव्यसनी निवसन्बाहुसहायश्चकारहःत्रयरामः १

अत्रैनारघ्योमहान्नामोरएककायागताीनीयतयांगम् नचात्ररामरातः

त्माहात्मिपायएवचमत्कारनिदानंतस्यप्रधानत्वाहिछिलेनरामावाद्य किं

विषयोयमलंकारस्यपदेश्प्रतिवाच्यम् नयत्रवीररसःप्रधानंतस्येहांग

त्वात् ॥" तत्सिद्धिहेतावेकस्मिन्यत्रान्यतत्करंभवेत् समुच्चयोसे ॥ तत्सि

द्धिहेतौतस्यप्रस्तुतस्यकार्यस्यसाधकेसमाधावतत्पकत्वयोःकारणयोरुपा

दानमत्रतत्कत्वकत्वयोरितिविशेषः उदाहरणम् दुर्वाराःस्मरमार्गणाःप्रिय

तमोदूरेमनोप्युत्सुकंगाढंप्रेमनवंवयोतिकठिनाःप्राणाःकुलंनिर्मलम् स्त्री

त्वंधैर्यविरोधिमन्मथसुहृत्कालःकृतान्तोःक्षमोनोसख्यश्चतुराःकथंनुविर

हःसोढव्यइत्यंशठः १ अत्रस्मरमार्गणाएवविरहासहत्वेतुर्वंति तत्राधिकंप्रि

यत्रसहृदयस्थित्याद्युपपादकम् एवमेवोमलक्षणःसमुच्चयः सद्योगे ऽसद्योगे
सदसद्योगेचपर्यवस्यतीतियत्केनचित्रेष्वप्यलदिनालंदभुतकम् तथाहि ।
कुलममलिनंभद्रामूर्तिर्मतिःश्रुतिशालिनीभुजबलमलंस्फीतालक्ष्मीःप्रभुत्व
मखंडितम् प्रकृतिसुभगाह्येतेभावाअमीभिरयंजनोव्रजतिसुतरांदर्पंराजंस्त
एवतवांकुशाः १ अत्रकुलादीनांसमीचीनानामेवयोगः दुर्वाराद्भुकोदाहरण
णेत्वस्मरमार्गणादीनामसमीचीनानाम् शशीदिवसधूसरोगलितयौवनाका
मिनीसरोविगतपंकजंमुखमनक्षरंस्वाकृतेः प्रभुर्धनपरायणःसततदुर्ग
तःसज्जनोनृपांगणगतःखलोमनसिसप्तशल्यानिमे १ अत्रसदसतोर्योगः दु
र्जनस्यासत्वात् शश्यादीनांसत्वात् एतच्चिन्त्यम् सर्वहृदयस्थित्यादिनाविशेष
श्या ^ व णेनधूसरत्वादिनाप्यत्रासम्यक्त्वमिति समुच्चयांतरमाह ॥ सत्वन्योयुगपद्या
गुणक्रियाः ११६ ॥ अत्रगुणाःक्रियाश्चेतिविग्रहेसंख्याविशेषस्याविवक्षणा
त् विशेषविवक्षाविरहेणचसजातीयवद्विजातीयस्यापियौगपद्यस्यलाभात्
गुणौचक्रियेचगुणक्रियेचयुगपद्भवतः सत्रिरूपःसमुच्चयः तत्रगुणयोर्यौग
पद्यं यथा विदलितसकलारिकुलंतवबलमिदमभवदाशुविमलंच प्रबलम

खानि मधिपमलिनानि च ताजानानि १ अत्र विमलत्वमलिनत्वयोर्गुणा
योः क्रिययोर्यथा अयमेकपदे तया वियोगः प्रियया चोपगतः सुदुःसहो मे
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः १ अत्र चोपगतो भवि
तव्यमिति क्रिययोः गुणक्रिययोर्यथा कलुषं च तवाहितेष्वकस्मात्सितपं(
केरुहसदृक्षं च चक्षुः पतितं च महीपतीन्द्र तेषां वपुषि स्फुटमापदां कटाक्षैः १
अत्र कलुषत्वपतनयोर्गुणक्रिययोः अत्र कश्चित् वैयधिकरण्ये समुच्च
य इत्याह तन्न युक्तम् धुनोति चासिं तनुते च कीर्तिमित्यादौ सामानाधिकर
ण्येपि च दर्शनात् केचित्सामानाधिकरण्य एवायमित्याहुः तदपि न सम्यक्
कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये इत्यादौ वैय
धिकरण्येपि दर्शनात् ॥ एकं क्रमेणानेकस्मिन्पर्यायः ॥ एकत्वेन विवक्षितं व
स्तु यत्र क्रमेणानेकस्मिन् भवति क्रियते वा स एकः पर्यायः अत्र क्रमेणेति सम
च्चयव्यावर्तनाय प्रयोजकानिर्देशात्तन्निर्देशो भवति करोतीत्यर्थो न तु स्वाभावि
कत्वास्वाभाविकत्वे हलाहलस्य कंठे कालकूटस्य स्वाभाविकत्वेन भवती
त्यत्रान्वयाहरणत्वापत्तेः तत्रासौ यथा नन्वाश्रयस्थितिरियं तव कालकूटके
नोत्तरोत्तरविशिष्टपदोपदिष्टा प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कंठेधुनावस

सिवाचितुनःखलानाम् १ अत्रकालकूटस्वखस्वैनएवकस्मान्नेकत्रवासेप्रयोजकं
किंचिदर्पितोक्तम् नकेवलमपर्यवसानमविकल्पेकिंवारोपितोपि यथा बिंबोष्ठएव
रागस्तेतन्विपूर्वमदृश्यत अधुनाहृदयेप्येषमृगशावाक्षिलक्ष्यते १ अत्रप्रयोज-
कानिर्देशःस्फुटएव रागपदार्थसम्बन्धेलोहित्यात्मकतयाहृदयेत्वभिलाषात्म-
कत्वेनभेदेप्येकत्वस्याध्यवसानान्नैकत्वविवक्षाविरोधः श्रोणीबंधस्त्यजतितनु-
तांसेवतेमध्यभागःपद्भ्यांमुक्तास्तरलगतयःसंश्रितालोचनाभ्याम् धत्तेवक्षःकु-
चसचिवतामद्वितीयत्वमास्यंतद्गात्राणांगुणविनिमयःकल्पितोयौवनेन १
द्वितीयोयथा तस्याणसिविसहोप्लरस्पराहरणमिहद्विजन्मने कृतसंविदाह-
देपिश्राणनमिवेसिश्रेत्कसमबाणेन १ अत्रत्कसमबाणेनेतिप्रयोजकनिर्देशः
अन्यस्ततोन्यथा अनेकमेकस्मिन्क्रमेणायद्भवतिसोन्यःपर्यायस्तदर्थः २
वेवद्वयाव्येयम् तत्रभवत्पर्योयथा मधुरिमरुचिरंवचःखलानाममृतमहो
प्रथमंपृथुव्यनक्ति अथकथयतिमोहहेतुमंतर्गतमिवहालहलंविषंतदेव १ अत्र
त्रैकस्मिन्नवलवचसिक्रमेणामृतव्यंजनेविषकथनेचनप्रयोजकनिर्देशः कुत्रा
त्यर्थेयथा तन्वेहतनभिनिमंदिरमिदंलब्धावकाशंदिवःसापेन्नजरत्तीनदा
तिकरिणामेतत्राचनाभावदाःसत्वज्रोमस्सलध्वनिःकलमिदंसंगीतनिर्कयोषि

नाम्नाश्चस्वर्येदिवसेर्हिंजोयमियंतीभस्मिंसमारोपितः । अत्रैकस्मिन्द्विजेन
हेहतन्मंदिराद्येरनेकैर्दिवसैरितिप्रयोजकनिर्देशः नचेयंपरिहृतिःहा
नोपादानयोरविवक्षितत्वात् ॥ अनुमानंतदुक्तंयत्साध्यसाधनयोर्वचः
११८ ॥ पक्षेसंबंधःसपक्षवृत्तित्वंविपक्षाद्व्यावृत्तित्वंचेतिरूपत्रयवान्हेतुःसा
धनम् व्यापकत्वाभिमतस्यपक्षेयोगव्यवच्छेदोव्यापकसंबंधपर्यवसन्नः
साध्यम् तदुभयवचनमनुमानालंकारः यथा यत्रैतालहरीचलाचल
दृशोव्यापारयंतिभ्रुवंयत्तत्रैवपतंतिसंततममीमर्मस्पृशोमार्गणाः ।
तच्चक्रीकृतचापमंचितशरप्रेंखत्करःक्रोधनोधावत्यग्रतएवशासनध
रःसत्यंसदासांस्मरः । अत्रपूर्वार्द्धेसाधनस्योत्तरार्द्धेसाध्यस्यवचनम्
प्रयोगश्चैवम् एताश्चक्रीकृतचापसदापुरोधावदंचितशरत्वादिवि
शिष्टमनोभवाःसंततनियतमर्मभेदिबाणकलहसत्त्वव्यापारकस्यान
कत्वादिति नन्वत्रपूर्वसाधनवत्साध्यस्यापिवचनंसंभवति यथामधु
निष्ठतिवाचियोजितामित्यादि तत्कथंसामान्यतएव"तदुक्तम् नतुवि
प्रोषद्रतिचेत् साध्यस्यपूर्वभागेनादृष्टावैचित्र्याभावादिति ॥ विशेषणै
र्यत्साकूतैरुक्तिःपरिकरस्तुसः ॥ साकूतैःसाभिप्रायैरुक्तिर्यथाहिविशेषस्य

उदाहरणम् महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ अत्र महौज
स्त्वादिविशेषणानि पदानमभिभवतीयत्वाद्यभिप्रायकाणि नच वाच्यमपु
ष्टार्थत्वस्य दोषत्वाभिधानादर्थसिद्धं पुष्टार्थत्वमिति निर्दोषाभावमात्रतया
कृतोलंकारमध्ये पठितोयमिति एकनिष्ठत्वेन बहूनां विशेषणानामुक्तो
दाहरणावष्टम्भादानैवैचित्र्यमपि चानुभवसिद्धं नतु दोषाभावत्वमात्रमि
ति संप्रदायः वयं त्वालोचयामः तादृशैकविशेषणोपन्यासेप्यलंकारत्व
मुचितम् अपुष्टार्थत्वविरहस्य निर्विशेषणतयाप्युपपत्तेरनुभवसिद्धत्वाभा
वाद्वैचित्र्यस्य चानुभवसिद्धत्वात् यथाम्बुडेसमनिपलविन्दुपवनेइत्या
दौ ॥ व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ११८ ॥ उद्भिन्नत्वमस्फु
टस्य प्रकाशः तथा चास्फुटमपि वस्तुस्वरूपं कथंचिदज्ञातमर्थकेनापि यद
पह्नूयते सा व्याजोक्तिः नचेयमपह्नुतिः प्रकृताप्रकृतयोः साम्येनास्वीका
रात् अत्र तु तदभावात् नच प्रथमं गूढस्यानेन तत्प्रकाशस्यापह्नवरूति
सामग्रीभेदाद्वेवापह्नुतिभेद इति वाच्यम् एवंविधे विषये साम्यसंभ
वेपह्नुतेरेवोपपादमानात् ननु यत्रापह्नवार्थं सादृश्योपक्षेपः सा व्याजोक्तिः

साहश्यमार्थमेवतद्यत्रापह्नवोपदेशः सापह्नुतिरितिचेन्न तत्रोभयत्रा
प्यपह्नुतेरेवोपगमात् यदाहुः साम्यार्थोपह्नवोयत्रसाविज्ञेयात्वऽ
पह्नुतिः अपह्नवायसादृश्यंयस्मिन्नेषाप्यपह्नुतिरिति उदाहरणम्
शैलेन्दुप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंस्थुला
खिलविधिव्यासंगभंगाकुलः हाशैत्यंतुहिनाचलस्यकरयोरित्यूचि
वान्सस्मितंशैलान्तःपुरमातृमण्डलगणैर्दृष्टोवतादुःशिवः १ अत्रपुल
कवेपथूसात्त्विकैकरूपतयाशङ्कनीयौशैत्यकारणतयाप्रकाश्यमानावपल
पितस्वरूपाविति व्याजोक्तिःप्रकाश्यते वर्षन्तुपुलकवेपथुभ्यांप्रका
शितानामप्यपलापनिरलयोःशैत्यकारणाकलापप्रकाशनेनापह्नुतेर्निर्व्या
जोक्तिरियम् ॥ किंचिन्दृष्टमपदृष्टंचकथितंयत्प्रकल्पते नाहगस्यव्य
पोहायपरिसंख्यानुसामता ११४ ॥ नाहकूल्यम् व्यपोहायव्यवच्छे
दायकिंचित्कथितंसत्स्वतुल्यस्यान्यस्यव्यवच्छेदायकेल्पतेसापरिसं
ख्यामतेतिलक्षणाम् अन्यस्यकथनमन्यव्यपोहायकथंकल्पतऽत्रा
तिचेत् प्रमाणान्तरेणावगतस्यैववस्तुनःपुनःशाब्देनप्रतिपादनस्यप्र

का० प्र०
११७
117

योजनान्तराभावात् एतद्द्वयं चेति विभागः कथनं हि किंचित्प्रश्नपूर्वकं ।
किंचित्प्रश्नपूर्वकमिति द्वैविध्यमित्यर्थः तेच द्वे अपि विधेयव्यवच्छेद्यस्य ।
प्रतीयमानत्ववाच्यत्वाभ्यां प्रत्येकं द्विविधे तत्र प्रश्नपूर्वककथने व्यवच्छेद्यस्य
प्रतीयमानता यथा किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः किमेकान्ते ।
ध्येयं चरणयुगलं कौस्तुभभृतः किमाराध्यं पुण्यं किमभिलषणीयं च करु
णा यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति । अत्रान्यन्नदीसविधादि व्य ।
वच्छेद्यं प्रतीयमानम् तत्रैव वाच्यं व्यवच्छेद्यं यथा किं भूषणं सुदृढमत्र यशो
न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः किं चक्षुरप्रतिहतं धिषणा न नेत्रं जा
नाति कस्त्वदपरः सदसद्विवेकम् । स्पष्टम् अप्रश्नपूर्वके कथने व्यवच्छेद्यं
प्रतीयमानं यथा कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते काठिन्यं
कुचयुगले तरलत्वं नयनयोर्वसति । अप्रश्नपूर्वकस्य कथने व्यवच्छेद्यं वा ।
च्यं यथा भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे चिन्ता यशसि न
वपुषि प्रायः परिदृश्यते महताम् । श्लेषेणाप्येषा संभवति चित्रेषु वर्णसंक
रः खलसंयोगः शालिषु हन्यादि ॥ यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता ।

तद्वाकारणमालास्यात् ॥ यथोत्तरमिति वीप्सार्थाय यथा प्राहुः तेनोत्तरोत्तरं प्रती
त्यर्थः उदाहरणम् जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते
गुणप्रकर्षेण जनोनुरज्यते जनानुरागप्रभवा हि संपदः १ नन्वत्र कार्यकारा
णभावालंकृतिप्रपंचनप्रसंगेन हेत्वलंकारोपि लक्षणार्हः अत्राह यथायं भट्टोद्भटे
न हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति तत्किं न लक्षितमिति चेत् आ
युर्घृतमित्यादिरूपस्यास्य वैचित्र्याभावेनालंकारत्वस्यैवाभावात् नन्वेवमवि
रलकमलविकासः सकलालिमदश्च कोकिलानंदः रम्योयमेति संप्रति लोको
त्कंठाकरः कालः इत्यत्र प्राचां काव्यरूपताभिधानं विरुध्यतेलंकाराभावादिति
चेत् न कोमलानुप्रासेनैव तत्संभवात् तत्किं हेत्वलंकारो नास्त्येव क एवमाह ।
कीदृशस्तर्ह्यसाविति चेत् पूर्वोक्तं काव्यलिंगमेवेति ॥ क्रियया तु परस्परम् ।
१२ वस्तुनोर्जनने न्योन्यम् ॥ वस्तुनोः परस्परं जन्यजनकभावो संभवी तस्य
तेप्रत्यन्त्येव पौर्वापर्ययोर्हेत्वोरसंभवादित्यत उक्तम् क्रिययेति एकक्रियाज
नद्वारेणेत्यर्थः अविशिष्टं वस्तु तावदजातकल्पम् तेन वैशिष्ट्यप्रयोजक।
क्रियाजनके जनकत्वोपचारः तथा च मिथस्तादृशैकक्रियाजनकत्वमन्योन्यो

का॰प्र॰
११८
118

लंकारद्वनिसारम् ॥ उदाहरणम् हंसाणसरेहिसिरीसारिज्जइअहसराणंहं
सेहिं अम्हाणंविअएणअप्पाणंणावअंगकुणंति १ अत्रश्रीसारणेनसरोहंस
योर्मिथोजनकता ॥ उत्तरश्रुतिमात्रतः प्रश्नस्योन्नयनंयत्रक्रियतेतत्रवासति
१२१ असकृदसंभाव्यमुत्तरंस्यादुत्तरम् ॥ यत्रोत्तरस्यश्रवणमात्रेणानुपात्तमऽ
पिप्रश्नवाक्यंपरिकल्प्यतेतदेकमुत्तरम् प्रश्नेसतिलोकातिक्रांतगोचरतयाऽसंभा
व्यंयदसकृदुत्तरनिवचनंतत्पुनरपरम् अत्रप्रश्नोत्तरयोःसकृदुपादानंनचमत्करो
तीत्यसकृदित्युक्तम् असंभाविनत्वंचचमत्कारित्वमितिनिमान्याः अप्रसिद्धत्वमिति
वयम् तच्चप्रमाणांतरागोचरविषयत्वात् अतएवप्रश्नपरिसंख्यातोभेदः तत्र
हिलोकप्रसिद्धविषयस्योत्तरस्यप्रयोजनांतराभावेनान्यव्यपोहेतात्पर्यम् अत्रतु
निरुक्तविषयतयावाच्यएवतात्पर्यविश्रामः तत्राद्यंयथा वाणिअअहत्थिद
न्ताकुत्तोअम्हाणंवग्घकित्तीओ जावलुलिआलअमुहीघरम्मिपरिवहूएसह्णा
१ हस्तिदन्तव्याघ्रकृत्तीनामहमर्थीमूल्येनततःप्रयच्छेतिक्रेतुर्वचनमनेनोत्तरवा
क्येनानुमीयते सत्रेचप्रश्नपदंएवंवाक्यपरमितिप्रश्नाभावेप्यदोषः यद्यपिहस्ति
दंतव्याघ्रकृत्तयस्तवसंतीतिप्रश्नवाक्यमिहोन्नेयम् नचवाक्यमिदंकाव्यलिंग

मेव तत्र रसस्य प्रसङ्गहेतुत्वाभावात्" अत्र स्यात्तदङ्गत्वात्साधकत्वात् ननु तर्हि ज्ञापक।
तयाऽनुमानमेवेति चेन्न एकधर्मिगतत्वेन साध्यसाधननिर्देशो हि तत्र नचात्र
तथा तस्मादलंकारान्तरमेवोत्तरम्' द्वितीयं यथा काविसमादेव्वगई किंलद्धं
जणो गुणग्गाही किंसोक्खं सुकलत्तं किंदुग्गेज्झं खलो लोओ १ का विषमा दैव
गतिः किं लब्धं जनो गुणग्राही किं सौख्यं सुकलत्रं किं दुर्ग्राह्यं खलो लोकः १ अत्र
दैवगत्यादेर्वैषम्यादि लोकाप्रसिद्धमेव प्रकाश्यते' किं मासेव्यं पुंसा सविधमनवद्यं
द्युसरितः इत्यादि प्रश्नपरिसंख्यायामन्यव्यवच्छेदतात्पर्यम् अत्र तु वाच्य एवेति तत
तो भेदः ॥ कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते १२२ धर्मेण केनचिद्य
त्र तत्सूक्ष्मं परिचक्षते ॥ कुतोपीति आकारादिंगिताद्वा सूक्ष्मस्तीक्ष्णमतिसंवे
द्यः तत्र रूपादेरन्यथात्वमाकारः ततो यथा संकेतकालमनसं विटं ज्ञात्वा वि
दग्धया हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् १ अत्र नेत्रेण साकूतरूपेणेंगि
वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे पुंस्त्वं तन्व्या व्यञ्जयन्ती।
वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख १ अत्र कण्ठकुङ्कुमभेददर्शनेनाका
रेणानुमितं पुरुषायितं सख्याः सखी हस्ते खड्गलेखालिखनेन वैदग्ध्यादभिव्यञ्जि

तम् ध्वंसामेव पाणौ कृपाणस्पृशोपपन्नत्वात् चेष्टाविशेषरूपमिंगितम् तेन यथा
संकेतकालमनसं विटं ज्ञात्वा विदग्धया हसन्नेत्रार्पिताकूतं लीलापद्मं
निमीलितम् १ अत्र नेत्रोत्साहरूपेणेंगितेन लक्षितः कामिनः संकेतका
लाभिलाषः कामिन्या निशासूचकेन पद्मसंमीलनेन लीलया प्रकाशितः
उत्तरोत्तरमुत्कर्षो भवेत्सारः पराविधिः १२३ ॥ पराविधिरिति परः पर्यन्त
भागो ऽवधिर्यस्य पद्यस्य का ऽवधिरुत्कर्षसीमा यस्य तेन पर्यन्तभागो यत्र सा
वोत्कर्षस्तस्पर्शः धाराधिरोहितया तत्रैव विश्रान्तेः उदाहरणम् राज्ये सा
रं वसुधा वसुधायां पुरं पुरे सौधम् सौधे तल्पं तल्पे वरांगनानंगसर्वस्वम्
१ भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः युगपद्धर्मयोर्यत्र ख्यातिः सा स्याद
संगतिः १२४ ॥ अत्रात्यन्तमिति देशाभेदस्यैवोपकारकम् नत्वदृष्टस्यापि विव
क्षितार्थम् युगपदिति स्वरूपनिर्वचनम् तेन कार्यकारणभूतयोर्धर्मयोर्य
त्र भिन्नदेशतया प्रतिपादनं सा ऽसंगतिः हेतुफलयोरग्निधूमाद्योर्विप्रसि
द्धायाः समानदेशत्वरूपायाः संगतेः परित्यागात् तथा प्रतिपादनं च रणान्त
रेभ्यो वैलक्षण्यात् उदाहरणम् जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो

न्वा

यस्यैव व्रणस्तस्यैव वेदना भणन्ति जना अलीकं दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥

अलिअं दंतक्खअं कबोले बहुए वेअणा सवत्तीणं ॥ स्वहम् नन्वेवं [illegible] विरोध एवालंकारः एव हेतुफलयोर्वैयधिकरण्य- स्य विरोधरूपत्वादिति चेन्न वैयधिकरण्यस्यासंगतिः नच विरोधः किं- न्तु तद्बाधिका वैयधिकरण्येन तयोर्विरोधप्रतिभासनात् नन्वेवम- पि प्रतीयमानो विरोध एवालंकारोऽस्तु नतु तद्बाधिकासंगतिरपि सा- धात् नच वाच्यं समानाधिकरण एव विरोधो विरोधालंकारनिर्वाहको- ऽन्यधिकरणोऽपीति लक्षणे सामान्यत एव विरोधस्योक्तत्वादिति मैवं सामान्येनोक्तस्यापि विशेष एव पर्यवसानात् अपवादनिर्मुक्त एव दे- शेऽउत्सर्गः प्रवर्तते विरोधालंकारस्य चासंगत्यलंकारोऽपवादः इति व्यधि- करणविरोधस्यापवादाक्रान्ततया तद्भिन्नविषये विरोधालंकार इति अ- त एव तयोरुदाहृतम् ॥ समाधिः सुकरं कार्यं कारणान्तरयोगतः ॥ दृष्टात् कारणादन्येन कारणेनोपहृतः कर्ता यदल्पक्लेशेन कार्यं करोति स समाधिः सम्यगाधिः समाधिरिति व्युत्पत्तेः उदाहरणम् मानमस्या निराकर्तुं पाद- योर्मे पतिष्यतः उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् १ तयोस्तल्पका-

का॰प्र॰
१२
120

त्तनाविरुद्धान्नसमुच्चयालंकारान्तर्भावः ॥ समंयोग्यतयायोगोयदिसंभा
वितःक्वचित् १२५ ॥ योग्यताऽनुरूप्यम् संभावितःसर्वसंमतः तेनेदम
नयोःसमुचितमितियोग्यतयासंबंधस्यनियतविषयमध्यवसानंचेत्त
दासमंनामालंकारः योग्यताचसत्कर्षनिकर्षाभ्याम् तत्रसत्कर्षेणय
था धातुःशिल्पातिशयनिकषस्थानमेषामृगाक्षीरूपेदेवोप्ययमनु
पमोदत्तपत्रःस्मरस्य जातंदैवात्सदृशमनयोःसंगतंयत्तदेतच्छृंगार
स्योपनतमधुनाराज्यमेकातपत्रम् १ निकर्षेणयथा चित्रंचित्रंवतव
तमहच्चित्रमेतद्विचित्रंजातोदैवादुचितरचनासंविधाताविधाता य
न्निंबानांपरिणतफलस्फीतिरास्वादनीयायच्चैतस्याःकवलनकला
कोविदःकाकलोकः १ ॥ क्वचिद्यदतिवैधर्म्यान्नश्लेषोघटनामियात्
कर्तुःक्रियाफलावाप्तिर्नैवानर्थश्चयद्भवेत् १२६ गुणक्रियाभ्यांका
र्यस्यकारणस्यगुणक्रिये क्रमेणचविरुद्धेयत्सएषविषमोमतः १२७
द्वयोरत्यंतविलक्षणतयायत्क्वचिद्योगोघटनांनोपैतिकिंत्वनुपपद्य
मानतयैवप्रतीयतेसएकोविषमः यच्चक्वचित्कार्यमारभमाणःकर्ता

बलवत्कारणान्नरेणाविष्टंभात्क्रियाफलंनाप्नोति प्रस्तुतानिष्टंविष
यमासादयेत्सद्वितीयः यच्चक्रियाफललाभेपिकार्यकारणयोर्गु
णौक्रियेवाविरुद्धेभवतस्तौतृतीयचतुर्थौविषमौ सर्वत्रसमता
याविपर्ययात् तत्रप्रथमोयथा श्रिरीषादपिमृद्वंगीक्वेयंकमल
लोचना अयंक्वचकुकूलाग्निकर्कशोमदनानलः १ द्वितीयोयथा।
सिंहिकासुतसंत्रस्तःशशःशीतांशुमाश्रितः जग्रसेसाश्रयंतत्रत
मन्यःसिंहिकासुतः १ तृतीयोयथा सद्यःकरस्पर्शमवाप्यचित्रंर
णेरणेयस्यकृपाणलेखा तमालनीलाशरदिंदुपांडुयशस्त्रिलो
क्याभरणंप्रसूते १ चतुर्थोयथा आनंदममंदमिमंकुवलयदललोच
नेददासित्वम् विरहस्त्वयैवजनितस्तापयतितरांशरीरंमे १ अत्रा
नंददानशरीरतापक्रियेविरुद्धे सूत्रेविभागश्चलक्षणापरः तेनसं
बंधिनोरानुरूप्याभावात्मकस्यविषमस्यान्येपिभेदाभवंति तत्राव
यवावयविनोर्वैषम्येयथा विपुलेनसागरशयस्यकुक्षिणाभुवना
नियस्यपपिरेयुगात्यये मदविभ्रमासकलयापपेपुनःसपुरस्त्रियैक

५४२

का॰प्र॰
१२१
121

तमयैकयादृष्टा १ एवमन्यत्राप्यूह्यम् ॥ महतोर्यन्महीयांसावाश्रिता
श्रयोः क्रमात् आश्रयाश्रयिणौ स्यातां तनुत्वेप्यधिकं तु तत् १२५ ॥ वर्ण
नीयोत्कर्षापेक्षया यन्महत्याश्रितेन विषयेन तदपेक्षयातनुरप्याश्रयो म
हीयान्स्यान्महीयसस्तयावर्ण्यते महत्याश्रये विषये आधेयएवं तथावा
र्ण्यते तदुभयमधिकालंकारः तत्राद्यंयथा अहो विशालं भूपाल भुव
नत्रितयोदरम् मातिमातुमशक्योपि यशोराशिर्यदत्र ते १ अत्राश्रय
स्यभुवनत्रयस्य महत्तयावर्णनम् द्वितीयंयथा युगांतकालप्रतिसं
हृतात्मनोजगंति यस्यांसविकासमासत तनौममुस्तत्रनकैटभद्विष
स्तपोधनाभ्यागमसंभवामुदः १ अत्राधेयभूतायामुदोमहीयस्त्वंवि
वक्षितम् ॥ प्रतिपक्षमशक्तेन प्रतिकर्तुंतिरस्क्रिया यातदीयस्यत
त्स्तुत्यैप्रत्यनीकंतदुच्यते १६ः अपकारिणामपिविपक्षंसाक्षादपकर्तुं
मक्षमेणापितदीयस्यतिरस्करणंतमेवोत्कर्षयितुंतदुच्यते प्रत्यनी
कं प्रतिनिधितुल्यत्वात् यथाऽनीकेभियोज्येऽशक्तेनतदीयोन्योभिजी
यतइत्यर्थः तदीयत्वंचसाक्षात्संबंधेनपरंपरासंबंधेनचेति द्विविधमे

नत् ॥ तत्राद्यं यथा त्वं विनिर्जितमनोभवरूपः सा च सुंदर भवत्यनु
रक्ता पंचभिर्युगपदेव शरैस्ताडयत्यनन्यजायादिव कामः । अत्र
कामिन्याः कामिनश्च साक्षादेव स्वस्वामिभावः संबंधः द्वितीयं य
था यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः कांतव
क्त्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बाधते । अत्र यत्सदृशार्थेन
मुख्यस्यावयवावयविभावसंबंधः तेन चंद्रस्य सादृश्योपलक्षणात्प्र
तिपरंपरासंबंधः ॥ समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते नि
जेनागंतुना वापि तन्मीलितमिति स्मृतम् ॥ ३१ ॥ निजं स्वाभावि
कं लक्ष्म निगूहनीयसाधारणं चिह्नम् तद्द्वारेण केनचिद्वस्तुना बल
वत्तया यत्किंचिद्वस्तु वस्तुगतमेव तिरोधीयते तन्मीलितालंकारः
तच्च द्विधा लक्ष्मणः क्वचित्स्वाभाविकत्वात् क्वचिदागंतुकत्वाच्चेत्यर्थः
तत्र स्वाभाविकेन लक्ष्मणा मीलितं यथा अपांगतरले दृशौ मधुरवक्रव
र्णा गिरो विलासभरमन्थरा गतिरतीव कांतं मुखम् इति स्फुरति संगके
मृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते । अत्र दृक्

का॰प्र॰
१२२
122

ंगितादिअंगस्यस्वाभाविकंलिंगत्वम् समानेवतिरोधीयेयेनसदृशेन तत्राप्य
नुपलंभात् आगंतुकेनलक्ष्मणायथा येकंदरासुनिवसंतिसदाहिमा
द्रेस्त्वत्पातशंकितधियोविवशाद्विषस्ते अप्यंगमुत्पुलकमुद्वहतांसकंपं
तेषामहोवतभियांनबुधोप्यभिज्ञः १ अत्रकंपपुलकेअंगस्यलिंगे हिमा
द्रिकंदरानिवाससामर्थ्याभिगतशीतरूपकारणस्यागंतुकत्वेनतत्कार्य्य
भूतयोरप्यागंतुकत्वंभयैःसमानत्वाच्च नेच्छुपितयोरुपलंभात् ॥ स्था
प्यतेपोह्यतेवापियथापूर्वंपरंपरम् विशेषणतयायत्रवस्तुसैकावली
द्विधा १३२ ॥ स्थापनंविधिः अपोहोनिषेधः यथापूर्वमितिवीप्साया
मव्ययीभावः तेनपूर्वंपूर्वंवस्तुप्रत्युत्तरस्यवस्तुनोयत्रविशेषणतयावा
क्यत्वेनविधिः यत्रवानयानिषेधः साद्विधाएकावली विशेषणतयाविधि
रितिविधेर्विशेषणमित्यर्थः एवंविशेषणतयानिषेधोपि कश्चित्पूर्व
कालविशेषणतयास्थितंवस्तुपरंविशेष्यंकृत्वायत्रस्थाप्यतेऽपोह्यतेवा
सैकावलीतिसूत्रार्थस्तमाह तत्रपूर्वंप्रतियथोत्तरस्यवस्तुनेस्थापनाद्विप्र
काशाविरुद्धम् तत्रविधौयथा पुराणियस्यांसवरांगनानिवरांगनाह्

१२२

पयुरस्कृतांगपः नृपंसमुन्मीलितसहिलासमस्तविलासाः कुसुमायुधस्य
१ अत्रपुरांगणामंगनास्तासामंगनाक्रियामुखेन नृपंतस्यविलासास्तेषा
मस्तत्वमितिक्रमेणविशेषणानयाविधिः निषेधेयथा नतज्जलंयत्र।
सुचारुपंकजंनपंकजंतयदलीनषट्पदम् नषट्पदोसौकलगुंजितोन
यानगुंजितंतन्नजहारयन्मनः १ अत्रजलेजलेपंकजस्यतत्रषट्पदानां
तत्रगुंजितस्यतत्रापिमनोहारितायाविशेषणानयानिषेधः ॥ यथानु।
भवमर्थस्यदृष्टेनतत्सदृशेस्मृतिः स्मरणं ॥ अत्रार्थस्मृतिःस्मरणालंकार
इतिलक्षणम् यथानुभवमितिसम्यगाकारदर्शनंदृष्टेनतत्सदृशावलोकनेनउद्बु
संस्कारोद्बोधहेतुनिर्देशः अदृष्टादेरप्युपलक्षणात् यद्वाऽन्यादृशास्मृते
र्विरुद्धाभावेनालंकार्यत्वाभावाद्व्यवच्छेदकनयालक्षणांतर्गतमेवैनत्
तदयंवावयार्थः केनचिदाकारेणनियतोयदाकदाचित्केनचित्प्रमाणे।
नु, नाभूतःसकालांतरेसंस्कारोद्बोधहेतौतत्समानधर्मदर्शनेसतियदनुभू
तेनप्रकारेणस्मर्यतेतत्स्मरणालंकारः सद्विधा एतज्जन्मनिजन्मांतरेवा
नुभूतस्मृतेः क्रमेणोदाहरणम् निम्ननाभिकुहरेषुयदंभःप्लावितंच।
लदृशांलहरीभिः तद्भवैःकुहरुतैःसुरनार्यःस्मारिताःसुरतकंठरुतानाम् १

करजुअगहिअजसोआहणामुहविणिवेसिआहरउडस्स संभविअपंच
जस्सअस्सणामहक्कद्दासरोमंचम् १ स्पष्टम् ॥ भ्रांतिमानन्यसंवित्तत्तुल्य
का॰प्र॰ दर्शने १३३ ॥ अत्राप्यन्यसंविदितिलक्षणम् तत्तुल्यदर्शने इति हेतौ
१२३ निर्देशः अन्येतिपदार्थपरामर्शात् तद्भिन्नत्वेन प्राकरणिकं निर्दिश्यते
123 तथा च तेन तुल्यमर्थादिह प्राकरणिकं निर्दिश्यते तेन प्राकरणिकस्या
प्राकरणिकतुल्यस्य दर्शने सति यदप्राकरणिकत्वेन ज्ञानं स भ्रांतिमा
नित्यर्थः नच निगीर्याध्यवसानरूपायामतिशयोक्तौ चातिव्याप्तिः तत्र
वस्तुतो भ्रमाभावेप्यध्यवसानमात्रस्वीकारात् इह त्ववर्थानुगमेन संज्ञा
प्रवृत्तेः भ्रमोपगमस्य स्पष्टमेवोपगमात् उदाहरणम् कपाले मार्जा
१° रः पय इति करांल्लेढि शशिनस्तरुच्छिद्रप्रोतान्बिसमिति करी संकलय
ति रतांते तल्पस्थान्हरति वनिताप्यंशुकमिति प्रभामत्तश्चंद्रो जग
दिदमहो विप्लवयति १ ॥ आक्षेप उपमानस्य प्रतीपमुपमेयता त
स्यैव यदि वा कल्प्या तिरस्कारनिबंधना १३४ ॥ अस्य प्रयोजनं नि
र्वाहयितुमुपमेयमेवालमिति कैमर्थ्येन यदुपमानमाक्षि
प्यते यच्च तस्यैवोपमानतया प्रसिद्धस्योपमेये तस्मादिशोभविशेषा
१२३

विवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते तद्द्विरूपं प्रतीपम् उपमे-
यस्योपमाने प्रतिकूलवर्तित्वात् तत्राद्यं यथा लावण्यौकसि सप्रता-
पगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वे-
धसा इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं चिन्तारत्नम-
हो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ अत्र यथासंख्यमसत्त्वेऽपि
आक्षेपस्य चमत्कारकारित्वादाक्षेपोदाहरणता ॥ द्वितीयं तु क्वचिदु-
पमित्यनिष्पत्त्या तिरस्कारः क्वचित्तन्निष्पन्नाऽसेव्यतद्धेतुः क्रमेणो-
दाहरणम् एए हि दाव संदरि कलं दाऊण सुणासु वअणिज्जं तुज्झ
मुहेण किसोअरि चंदो उवमिज्जइ जणेण ॥ अत्र मुखस्योपमानस्या-
प्राप्तिः स्वल्पगुणत्वादुपमित्यनिष्पत्तिः वअणिज्जमिति पदेना-
द्योत्यते सैव च तिरस्कारहेतुः गर्वमसंभाव्यमिमं लोचनयुगलेन ।
किं वहसि भद्रे सन्तीदृशानि दिशि दिशि सरस्सु नीलनलिनानि ॥
अत्र नलिनानां लोचनोपमेयीकरणमेवानादरहेतुः उपमेया-
स्यन्यूनगुणत्वस्थितेः अनयैव रीत्या तदन्यदपि द्रष्टव्यम् यत्सामा-

न्यगुणायोगाभावेनोपमानत्वाननुभवेऽप्यर्थस्योपमानत्वकल्पनया
असदृशत्वेनप्रसिद्धस्योपमानत्वकल्पनयावाऽसत्त्वंचोपलक्षणात
का॰प्र॰ यायोऽप्यम् उदाहरणम् अहमेवगुरुःसुदारुणानामितिहालाह।
१२४ लतानमास्मदर्प्पः ननुसंतिभवादृशानिभूयोभुवनेस्मिन्वचनानि
२ दुर्जनानाम् । अत्रहालाहलस्यावलवचनोपमानत्वमसंभाव्यमे।
125 वोपनिबद्धंतिरस्कारः ॥ प्रस्तुतस्ययदन्येनगुणसाम्यविवक्षया ऐ
कात्म्यंबध्यतेयोगात्तत्सामान्यमितिस्मृतम् १३५ ॥ अतादृशस्येऽ
पिविवक्षितगुणसाम्यस्यप्रस्तुतस्यान्येनाप्रस्तुतेनयोगान्नैकात्म्यं
बध्यतेतत्सामान्यम् तत्रापरित्यक्तनिजगुणस्यापिविशेषणत्वंवि
वक्षितम् अन्यथातद्गुणालंकारेतिव्याप्तिः बध्यतइत्यस्यप्रत्यायन
मात्रमर्थोनतुप्राग्रूपप्रतिपादनम् उदाहरणोऽप्यविसंभाव्यतांगतानाद्
रयादावैकात्म्यस्याभ्याहृतत्वात् उदाहरणम् मलयजरसविलिप्त।
तनवोनवहारलताविभूषिताः सिततरदंतपत्रकृतवक्त्ररुचोरुचि
रामलांशुकाः प्रशशभृतिविततधाम्निधवलयतिधरामविभाव्य। २ १२४

नागनाः प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ।
अत्राभिसारिकाचंद्रिकयोरैकात्म्यप्रतीतिः क्वचित्प्रस्तुताप्रस्तु
तयोरुत्तरकालीनविवेकादिनानन्वयनम् यथा वेत्रत्वचा तु
ल्यरुचां वधूनां कर्णाग्रतो गंडतलागतानाम् भृंगाः सहेलं यदि
नापतिष्यन्को वेदयिष्यन्नवचंपकानि । अत्र भृंगपातानंतरं
भेदप्रत्ययेन तु पूर्वमेव प्रतीतिः नन्व भृंगपातेन भेदप्रत्यया
त्कथमेकात्मकत्वप्रतीतिरिति चेन् अग्रे तथात्वेपि प्राथमिका
भेदस्याप्रत्ययस्यानिरासात् तस्यहन्यत्वात् ॥ विनाप्रसिद्धमा
धारमाधेयस्य व्यवस्थितिः एकात्मा युगपद्वृत्तिरेकस्यानेकगो
चरा १३६ अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः तथै
व करणं चेति विशेषस्त्रिविधः स्मृतः १३७ ॥ स एष त्रिधा तत्र
प्रसिद्धमाधारं विना आधेयस्य विशिष्टावस्थितिर्यदभिधीयते
स एको विशेषः तत्र प्रसिद्धमित्यनेनेदमुक्तम् यदत्र वास्तवमा
धारत्वं न विवक्षितं किं तु कविप्रसिद्धि मात्रसिद्धमिति अत एव न

ऐक्योदाहरणम् दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः १ अत्र कविरूपं प्रसिद्ध
का॰प्र॰ माधारं विना गिरां विशिष्टावस्थितिरुक्ता एकस्य वस्तुनो युगपद्यदेका
१२५ त्मानेकवृत्तिः सा द्वितीयो विशेषः एकात्मेति एकेन स्वभावेनेत्यर्थः
एतद्विशेषणमेकस्य द्विधावस्थानादिव्यवच्छेदार्थं व्यावर्तनाय युगपा
125 दिति पर्यायनिवारणाय उदाहरणम् स्फुरदद्भुतरूपमुत्प्रतापज्वलनं
त्वां सृजतानवद्यविद्यम् विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता
बृहस्पतिश्च १ सा वसइ तुज्झ हिअए सच्चिअ अच्छीसु सा अ वअणेसु ।
अम्हारिसाण सुन्दर ओवासो कत्थि पावाणं १ अपरम् रभसेनान्यत्कार्यं
कुर्वतः कर्तुं यदशक्यस्यापि कार्यस्य तथैव करणं स तृतीयो विशेषः अ
त्र तथैवेति तेनैव प्रकारेणेत्यर्थः एतच्च यत्नेनेति चासितं त्वनेन च कीर्तिमि
त्यादि समुच्चयव्यावर्तनाय उदाहरणम् स्फुरदद्भुतरूपमुत्प्रतापज्वल
नं त्वां सृजतानवद्यविद्यम् विधिना ससृजे नवो मनोभूर्भुवि सत्यं सवि
ता बृहस्पतिश्च १ अत्रान्यकरणं ग्राह्यम् क्वचिदव्यंगं यथा गृहिणी स

चिवः सखीमिथः प्रियशिष्या ललिते कलाविधौ करुणाविमुखेन मृत्यु
नाहरता त्वां वद किं न मे हृतम् १ अत्र किं न मे हृतमिति सचिवादिसर्वह
रणानुपकार्यकारणम् नन्वाधारं विनावास्तवस्याधेयस्याव्यवस्थितिर
नुपपन्नैव एवमन्यथोऽप्यनुपपत्तिरिति चेन्न अतिशयोक्तिमालंब्य तथा
भिधानात् सर्वत्रैवंविधे विषयेऽतिशयोक्तिरेव प्राणत्वेना तां विना।
प्रायशोऽलंकारत्वाभावात् अत एवाह सैषा सर्वत्र वक्रोक्तिरनयार्थो
विभाव्यते यत्नोऽस्यां कविभिः कार्यः कोऽलंकारोऽनया विनेति विशि।
भाव्यते चमत्कारविशेषविषयः क्रियतदर्थः ॥ स्वमुत्सृज्य गुणं यो
गादत्युज्ज्वलगुणस्य यत् वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः १२८ ॥
अत्युत्कृष्टगुणस्याप्रस्तुतस्य योगात्तद्गुणसंपर्कात् स्वीयं रूपं तिर
स्कृत्य प्रस्तुतं वस्तु यत् तदनुकारमेवासादयति स तद्गुणो भण्यते तस्याप्रस्तु
तस्य गुणेनेति व्युत्पत्तेः मीलिते वस्त्वंतरेणाच्छादितस्य तस्यैव वस्तुनः प्रती
तिः यत्र त्वनाच्छादितस्वरूपस्यैव वस्तुनस्तद्गुणापत्तिरिति ततो भेदः उदाह
रणम् विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या रत्नैः पुन
र्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः १ अत्र तद्गुणद्वयम् रविरथ।

का॰प्र॰
१२६
126

गापेक्षयाप्रकृताप्रस्तुतस्य तद्रूपेक्षयाच हीनत्वेनोपमानतां प्रकृतस्य गुणत्वान्न तद्रूपत्वस्याप्रती
तेः एतेन यत्केनचिद्व्याख्यातं स्वगुणत्यागादात्मान्तरंगुणस्याभिव्यक्तिस्तद्गुण इति तल्लक्षणादे
यम् तत्राप्रस्तुतस्य गुणोत्राहीति कुत्यानि कथनप्रकाशाविरोधात् तत्र गुणा
हृयकथनेन च तद्गुणाहृयस्य प्रतिपादनात् अंतेसीमंतरत्ने द्रुमपादो वक्ष्यमाणे संक
रोदाहरणे तद्गुणत्वाभावप्रसंगाच्च नहि तत्रान्यगुणस्य स्वकीयरूपस्याप्राप्तिः ॥
तद्रूपाननुहारश्चेदस्य तत्स्यादतद्गुणः ॥ तदिति प्रकृतेनार्थः अस्याप्रस्तु
तस्यात्युज्ज्वलगुणयोगेपि यदि स्वगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति
तदाऽतद्गुणः उदाहरणम् धवलोसि जहवि सुंदर तहवि तुए मज्झ रंजिअं हि
अअं राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि १ अत्रातिरक्तेन मनस
धृतस्याप्यरक्तत्ववचनात् अतद्गुणमेवोदाहरणम् तत्र प्रकृतं हृदयं संबो
ध्यस्त्वप्रकृतः स्वहृदयप्रकृतं तत्निवेदनस्यैव विवक्षितत्वात् एवं चात्रस्व
त्रेनत्पदेन प्रकृतमिवाप्रकृतमप्युच्यते तथा अप्येतेनाप्रकृतमिवप्र
कृतमप्युपस्थाप्यते सामान्यस्यावश्यग्राह्यत्वात् तथा चाप्रस्तुतेन प्रस्तुतरू
पाननुहरणाविवक्षातेनाप्रस्तुततद्रूपाननुहारोन्यः प्रकारः यथा गांगमं
बु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः राजहंस तव सैव शुभ्रता ची

प्येतेन च न चापचीयते । अत्रान्यापदेशापदे राजहंसस्य प्राकरणिक
त्वं प्राकरणिकस्य तु कृष्णोपमानतयोपमानीयम् वाच्यमात्रवि
श्रान्तौ न कदाचिदनुपपत्तिः ॥ यद्यथा साधितं केनाप्यपरेण तद
न्यथा २३५ तथैव यद्विधीयेत स व्याघात इति स्मृतः ॥ यद्यथा येनो
पायेन तथा तेनोपायेनेत्यर्थः तथा च केनापि कर्त्रा यदुपायेनोपा
येन यथा साधितं तदन्येन कर्त्रा जिगीषुतया तदुपायेनैव तेनोपायेन त
तोऽन्यथा चेत्साध्यते स व्याघात इत्यर्थः प्रथमसाधितस्य वस्तुनो
व्याहतिहेतुत्वात् उदाहरणम् दृशा दग्धं मनसिजं जीवयन्ति दृशैव
याः विरूपाक्षस्य जयिनीस्तास्तुवे वामलोचनाः । अत्र दृशैव
दाहो जीवनं च एवं शृङ्खलालंकारा दर्शिताः ॥ अस्ति पुनः कश्चिद्वि
षयो यत्रांगवादिसंबद्धपद्मरागप्रमुखमणिमेलकवल्लोकाना
मलंकाराणां संवलनमेव चमत्कारस्तस्मात्सोऽप्यलंकारः तत्र द्वा
वीगतिः परस्परमनपेक्षत्वावस्थितेस्तदभावाच्च तत्र प्रथमा
संसृष्टिरुच्यते द्वितीया तु संकरः स च त्रिधेति प्रकारचतुष्टयं लक्ष
यति ॥ सैषा संसृष्टिरेतेषां भेदेन यदिह स्थितिः २५ ॥ भेदः स्वरू

यतो विषयतो वा परस्परमनपेक्षत्वम् स्थितिर्व्यवस्थितिः एतेषां समनं
तरमेवोक्तानामलंकाराणां भेदेन यत्स्थितिः सा संसृष्टिरिष्टा संकर
भेदात्तु नैवम् अंगांगिभावे स्वरूपसतः सापेक्षत्वात् अनिर्णये व्यवस्थि
तेरेवाभावात् अवस्थितेर्विषयतः परापेक्षत्वात् विषयाभेदाच्च सेयं
शब्दालंकारमात्रस्यार्थालंकारमात्रस्य वा शब्दार्थालंकारयोर्वेति त्रि।
प्रकारा तत्राद्यैर्यथा वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृत
शोभया चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्य
या १ अत्रानुप्रासयमकयोः परस्परमनपेक्षत्वव्यवस्थितिः द्वितीया।
यथा लिंपतीव तमोंगानि वर्षतीवांजनं नभः असत्पुरुषसेवेव दृष्टि
र्निष्फलतां गता १ अत्रोत्प्रेक्षोपमे परस्परमनपेक्षे व्यवस्थिते संसृ
ष्टिं प्रयोजयतः अन्त्या यथा सो णत्थि एत्थ गामे जो एअं महमहन्त
लावण्णं तरुणाण हिअअलूडिं परिसप्पंती णिवारेइ १ अत्रानु।
प्रासरूपके शब्दार्थालंकारौ ननु अनयोः शब्दार्थरूपाश्रयभेदेन कथ
मेकार्थसमवायलक्षणा संसृष्टिरिति चेत् एकवाक्यैकदेशस्वाश्रसा।
मवेतत्वात् ॥ अविश्रांतिजुषामात्मन्यंगांगित्वं तु संकरः ॥ तेषा।

मेवालंकाराणां चारुत्वार्थं स्वरूपनिष्पत्तये वान्यापेक्षणात्सात्म
न्यनासादितस्वतंत्रभावानां यत्परस्परमनुग्राह्यानुग्राहकत्वं सतु
संकरः संकीर्यमाणानां स्वरूपत्वात् उदाहरणम् अनेनसीमंतवचि
न्हेमरकतनिर्हतेहेमतातंकपत्रे लसायां मेखलायां कटितिमणि
तुलाकोटियुगमेरहीने प्रोणां विबोधकांनापवदस्मिगाहपाणामि
त्वरीणामरणपरजनुरंजाफलानां स्वजन्हतिप्रावरानैवहारंहरंति ।
अत्र विबोधकान्याप्रोणामिनित्तन्नणामपेक्ष्यगुंजाफलानां स्वज
हतिभ्रांतिमानात्मानं लभते न हुणोप्यत्रैसत्वानंत्येणाचमत्कारवि
शेषं करोति किंतुभ्रांतिमदपेक्षयेति परस्परमनुग्राह्यानुग्राहकभा
वः अत्र द्वयोरलंकारयोः संकरः बहूनामपि यथा जटाभाभिर्भाभिः
करधृतकलंकाक्षवलयो वियोगिव्यापत्तेरिवकलितवैराग्यविशदः
परप्रेम्णा तारापरिकरकपालांकिततले शशीभस्मापांडुः पितृवन इव
व्योम्नि चरति । अत्र जटाभाभिर्भाभिरिति पितृवनव्योम्नीति चोपमा
कलंकाक्षवलयेति तारापरिकरकपालेति रूपकम् वियोगिव्यापत्ते
रिवेत्युत्प्रेक्षा वैराग्यविशद इति श्लेषः चत्वारोप्येते परस्परमंगांगि

भावेनप्रतीयते तत्रोत्प्रेक्षाश्लेषांगं तद्धर्मादेवैराग्यविषयादद्रुतिहि
तीयार्थानुसंधानात् श्लेषश्चरूपकोपमयोरंगं तद्धर्मावगतनिर्वेद
महिम्नैवजटायाश्चक्रवलयधारणस्यचसंगतेः नारापिकपाले।
निरूपकंपित्वनरूवेनोपमायामताम् तद्बीजंहिसादृश्यम् नच।
प्रमथानेकोम्नासहसाहजिकं किंतुरूपितकपालाश्रयत्वेनैवेति
सर्वत्रचांगानांचाहत्वार्थसंगापेक्षा सर्वेवहनीयासर्वेषांचेषां
पार्यंतिकचारुत्वहेतुरंगांगिभूताचसमासोक्तिः चंद्रगतत्वेनम
हाव्रतिद्वनांतप्रतीतेः साचकर्मैवेतिप्रकाशकृतानोक्तेत्यवधेय
म् ननुकलंकादेवलयेतिकथमेकांततोरूपकमुच्यते उपमायाः।
अपिसंभवेनसंदेहसंकरोचितप्रादितिचेन रूपकमपरिग्रहेकरप्यत।
त्वमेवसाधकप्रमाणतः संदेहस्याभावात्कथमस्यसाधकत्वमि
तिचेत् श्रूयताम् कल्प्यतत्वरूपविशेषणास्याक्षवलयएवसार्वत्र।
कीप्रसिद्धिर्नतुकलंके अतः प्राधान्येनाक्षवलयप्रतीतिरेवोद्देश्या
साचरूपकपरिग्रहेणैवसंभवति तत्रतिरोहितकलंकरूपमक्ष
वलयत्वमेवस्वाभ्युपेत्यावगम्यते नन्वेवमपिविशेषणमिदमस

स्मरोव चंद्रपक्षे किरणेन कलंकस्याभावात् मूर्त्तिवत्तेन तद्वार
णाचितिचेन्न श्लेषच्छायया हि कलंकस्याप्रधानस्य करभावेना
मसत्त्वेव प्रत्यासन्नतयोपचर्यं येयोऽप्यति तथा सत्युपमापरिग्रहे को
दोष इति चेत् कलंको ह्यवलयमिवेत्युपमायां कलंकस्य प्रधा
नत्वेन प्रतीतिः न चास्य करत्वेन तत्त्वं मुख्यमस्तीति मुख्यत्वे प्युपचा
र एव प्राप्तौ स्यात् मुख्यविषयोपचारापेक्षया चामुख्योपचार
एव श्रेयानिति निरूपकमेवाश्रीयते प्राह्यालंकारयोरप्येवं संकरोद
घ्रुपते इति प्रांचः उदाहरंति च राजति तटीयमभिहतदानवरासा
तिपातिसारावनदा गजता च यूथमविरतदानवरासातिपाति
सारावनदा १ अत्र यद्यपि यमकानुलोमविलोमचित्रभेदयोर्न
स्फुटं परस्परापेक्षित्वम् तथापि यमकनिर्वाहस्य सहृदयस्य कवेः स्व
कृत्यत्वानिर्वहनतयानुलोमविलोमस्योत्पन्नोयमकापेक्षा यमक
स्य तु चारुतातिशयेन तदपेक्षता यत्राश्रयेणानि डघकतयातिशय
येन विरहयमनोऽनुरंजकत्वादिति तेषामाशयः वस्तुतस्तु यमक

का॰प्र॰
१२९
129

निर्वाहएवकविग्रहत्वमितिनिश्चायकंनास्ति अस्तुवान्यथा तथापि।
यमकंनचित्रहेतुः किंतुतस्ययत्नः तस्मादेकाश्रयानुप्रवेशेनैवायंसं
करोनत्वनुग्राह्यानुग्राहकतयेत्येवमुक्तम् ॥ एकस्यचग्रहेन्यायदोषा
भावादनिश्चयः १४१ ॥ न्यायःसाधकप्रमाणता दोषःप्रतिकूलता
ग्रहोव्यवस्थितिः यत्रद्वयोर्बहूनांवालंकाराणामेकत्रयोगपद्येपिवि
रोधान्नैकत्राव्यवस्थितिः नचैकतरपरिग्रहस्यसाधकंनचेतरपरिग्रहे
बाधकं येननदेवव्यवतिष्ठेतसोप्यनिश्चयरूपोद्वितीयःसंकरः तत्र
स्यचकारेणसंकरस्यैवोपदेपगणात् उदाहरणम् जहगंभीरोजह
रअणणिब्भरोजहअणिम्मलच्छाओ तहकिंविहिणासोसरसपाणि
ओजलणिहीणकओ १ अत्रकिंसमुद्रेप्रस्तुतेश्लिष्टविशेषणमहि
म्नाऽप्रस्तुतपुरुषविशेषप्रतीतिरियंसमासोक्तिः किंवाऽध्येरप्रस्तु
तात्प्रस्तुतस्यपुरुषविशेषस्यतत्समानगुणतयाप्रतिपत्तेरप्रस्तुत।
प्रशंसेतिसंदेहः एकस्यैकतराप्रस्तुताप्रस्तुतोभयरूपत्वाभावात् अ
नयोर्युगपदसंभवात् न्यायदोषयोरसंभवाच्च अयंद्वयोःसंकरः ब

१२९

स्तनां यथा नयनानंददायींदोर्बिंबमेतत्प्रसीदति अधुनापि निरुद्धा
शामविशीर्णमिदं तमः १ अत्र किं कामोद्दीपककालावर्णनं उत निशा-
यं तरेणाभिधानात्पर्यायोक्तम् किं वा एतदित्यस्य बिंबपरामर्शक-
तया वदनस्येन्दुबिंबेनाध्यवसानादतिशयोक्तिः किं वा एतदिति व
क्त्रं निर्दिश्य पंडे बिंबरूपणात् रूपकम् अथ प्रसीदतीत्यस्योभया-
न्वयविवक्षायामेकतरस्य प्रकृतत्वाद्दीपकम् द्वयोरपि प्रकृतत्वे
वा तुल्ययोगिता वा किं वा प्रदोषवर्णने चंद्रबिंबस्य प्रकृतत्वे विशेष-
णसाम्यादाननप्रतीतेः समासोक्तिः आहोस्विन्मुखवर्णनेर्मल्पवर्णन-
प्रस्तावाच्चंद्रस्याप्रस्तुतत्वेनाप्रस्तुतप्रशंसेति संदेहः न्यायदोषयोर-
भावात् यत्र तु तयोरन्यतरस्यावतरः तत्रैकतरनिश्चयान्न संशयः त-
त्र सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिरित्यत्र मुख्यत्वे-
न प्रतीयमानाद्धसितद्युतेर्निर्वक्त्रस्य एवानुकूल्यं भजते तत्रैव मुख्यत्वेनास्तां सं-
भवात् वक्त्रस्य प्राधान्येन ज्योतिरुपमायामेवेन्दूपमासाधकानि ज्यो-
त्स्नेति नानुकूलता मुख्यत्वेन तत्र हासद्युतेरभावात् नापि प्रतिकूलता

का॰प्र॰
२३॰
130

गौणत्वेनाप्युपपत्तेरिति न रूपकं प्रतिसाधिकाबाधिका वा वक्त्रेन्दौ स्मितस्य
यं यद्दपरः शीतांशुरभ्युदित इत्यत्रापरत्वमिंदावनुपपन्नम् मुखरूपेंदौ
सति किमपरेणोडुनेति प्रतीतेः तथाप्रतीतिश्च रूपकेणेति रूपकं प्रति
साधकतां प्रपद्यते न तु नवक्त्रस्य प्रतिकूलम् इंदुसमानगुणो वक्त्रे स
ति किमपरेणेंदुना कश्चिदिति प्रतीत्यान्तत्रासंगत्यसंभवात् अतो नोपमा
बाधकम् राजनारायणं लक्ष्मीस्त्वामालिंगति निर्भयमित्यत्रालिंग
नमुपमायां बाधकम् स्वामिसदृशं प्रति प्रेयसीप्रयुक्तस्यालिंगनस्या
नौचित्यात् ननु रूपके साधकम् पादांबुजं भवतु वो विजयाय मंजुमं
जीरशिंजितमनोहरमंबिकायाः इत्यत्र मंजीरशिंजितमंबुजे प्रतिकूलं
तत्रासंभवात् अतो रूपके बाधकम् नन्वेवं तदुपमासाधकमपि भ
वति पादे तदनुकूलत्वात् न लक्षणं रूपकबाधकतामात्रमस्योच्यते न तु
उपमासाधकत्वमिति एवमन्यत्रापि यदेकत्रानुकूलं तद्वाक्येनप
रत्र प्रतिकूलम् यच्चैकत्र प्रतिकूलं तत्तत एवान्यत्रानुकूलम् अन्य
थात्वस्यैवादिति चेत् सत्यम् किं तु यस्य यथात्वमुत्कटं प्रतीयते तेन

२३॰

त्रतस्यतथात्वमपदेश्यः अत्रतुविघ्नुपमर्द्दिबाधकंसाधकापे
क्षयोत्कटत्वेनप्रतीयतेइतितेनैवव्यपदेशोयुक्तः तदेतदुक्तं।
विघ्नुपमर्द्दिबाधकस्यतदपेक्षयोत्कटत्वेनप्रतिपत्तेरिति अन्येन
तदन्यथाव्याचष्टे विधीयतेनेनेतिविधिःसाधकम् तदुपम
र्दितस्माद्बलीयः एतदुक्तंभवति मंजीरशिंजितस्यपादसंभवमा
त्रेणानतावदुपमासाधकत्वंनिर्वहति यावदंबुजेनतद्विरहोननि
श्चीयते तथाचतद्बाधकस्यैवप्राधान्यमितिकान्ताजन्मत्वेनैवव्यपदे
शः एवमन्यत्रापिसाधकबाधकत्वंसुधीभिःपरिभावनीयम्
स्फुटमेकत्रविषयेशब्दार्थालंकृतिद्वयम् व्यवस्थितंच ॥ विष
यःपदंतेनैकत्रपदभोषाद्यार्थालंकारौस्फुटंव्यवस्थितौभवतःसो
प्यपरःसंकरः उदाहरणम् स्पष्टोल्लसत्किरणकेसरसूर्यबिंबवि।
स्तीर्णकर्णिकमथोदिवसारविंदम् श्लिष्टाष्टदिग्दलकलापमु।
खावतारबद्धांधकारमधुपावलिसंचुकोच ॥ अत्रपादत्रयेप्रत्येकं

का॰ प्र॰
१३१
131

रूपकाद्यासौ प्रविष्टो शब्दार्थालंकृतीति प्रायोवादः शब्दालंकार
योरप्येतद्दर्शनात् यथा कलकलोलकलोलद्ध्मान्वयेत्याद्याव
नुप्रासयमकयोः ॥ तेनासौ त्रिरूपः परिकीर्तितः १४२ ॥ तस्मा॰
दनुग्राह्यानुग्राहकतयासंदेहेनएकपदप्रतिपादनयाऽवस्थि
तत्वाच्च त्रिप्रकारोऽयं संकरः कथितः प्रकारांतरेणानुभावकोऽप्याकारं
भेदानामनंतत्वादिति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रि
विधा अलंकाराः नन्वत्रिविधानामप्येषां काव्यशोभातिशायहेतुत्व
स्यतत्वेपि कुत एष प्रतिनियमः यत्कश्चिच्छब्दस्य कश्चिदर्थस्य
कश्चिच्छब्दार्थयोरिति चेत् उक्तमत्र प्रागेव दोषगुणालंकाराणां
शब्दार्थोभयगतत्वव्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः नि
मित्तांतराभावात् ततश्च योऽलंकारः शब्दार्थयोर्मध्ये यस्यान्वया
व्यतिरेकावनुविधत्ते स तदलंकार इति व्यवस्थाप्यते शब्दान्वय
व्यतिरेकानुविधायित्वं चैतदेव यच्छब्दपरिवृत्तिसहत्वम् नन्वेवं

यथा पुनरुक्तवदाभासः परंपरितरूपकं चोभयभावानुविधा
यित्वेनोभयालंकारः ननु शब्दार्थयोर्हेतुकार्यान्तरन्यासवदत्र तयो
रुभयालंकारा भवेयुरितिचेन्न दृष्टापत्तेः एवं तर्हि किमुभया
लंकारप्रस्तावमुल्लंघ्यार्थमात्रालंकारप्रस्तावे पठिता इतिचेन्न
तत्रार्थवैचित्र्यस्य प्रकटतया प्रतिभासात् अन्ययोलंकारो यदा
श्रितः स तदीय इत्येवं किं न विभाग इतिचेन्न तथाकल्पनायामऽ
न्वयव्यतिरेकावेव समाश्रयितव्यौ न त्वतिरेकेणाविशिष्टस्या
श्रयिभावस्याभावात् तस्मादलंकाराणामन्वयव्यतिरेकनिर्व
धन एव परस्परं भेदहेतुरित्ययं न्यायः नन्वलंकाराणां दोषाः प्राची
नैरभिहितास्ते किं न संत्येव आहोस्वित्संभविनोप्युपेक्षिताः अ
थानुभवविरोधः अत्रैव पुनरेतदाह ॥ एषां दोषा यथायोगो
संभवन्तोपि केचन उक्तेष्वन्तर्भवन्तीति न पृथक्प्रतिपादिताः ॥
१४३ ॥ तथाहि अनुप्रासस्य तावत्त्रयो दोषाः प्रसिद्ध्यभावो वै
फल्यं वृत्तिविरोधश्चेति च यथाक्रमं प्रसिद्धिविरुद्धापुष्टार्थत्व प्रति

फलवर्णास्त्वेभ्योनानिबध्यंते तत्स्वभावत्वात् तत्प्रसिद्ध्यभावोय
था चक्रीचकारपंक्तिंहरिरपिचहरीन्धूर्जटिर्धूर्ध्वजाग्रानक्षंन
क्षत्रनाथोरुणमपिवरुणःकूबरंचकुबेरः रंहःसंघःसुराणां
जगदुपकृतयेनित्ययुक्तस्ययस्यस्तौतिप्रीतिप्रसन्नोन्वहमहिम
रुचेःसोवतात्स्यंदनोवः १ अत्रचक्रिप्रभृतीनांकर्तृणांचक्रप
क्त्यादीनांकर्मणांप्रतिनियमेनस्तुतिरनुप्रासानुरोधेनैवनि।
बद्धानपुनरितिहासादिषुतथानिबद्धाइतिप्रसिद्ध्यभावः सो
यंप्रसिद्धिविरोधएव वैफल्यंयथा भग्नातकेलिरमणानांमंदिरमा
नंदस्यंदिसुंदरेंदुमुखि यदिसल्लीलोल्लासिनिगच्छसितत्किंत्वं।
दीयमे १ यथावा अनणुरणन्मणिमेखलमविरतशिंजानमं।
जुमंजीरम् परिसरणमरुणचरणेरणरणकमकारणंकुरुते
१ अत्रवाच्यस्यार्थस्यविविच्यमानंनकिंचिच्चारुत्वंप्रतीयतइ।
त्यपुष्टार्थत्वमेवानुप्रासस्यवैफल्यमुच्यते वृत्तिविरोधोयथा।
अकुंठोत्कंठयापूर्णामित्यादि अत्रशृंगारेपरुषवर्णानाडंबरोग

णाविवेचनमस्त्वावोऽक्रीत्याविरुद्धमिति प्रतिकूलवर्णनैवह्नेति।
विरोधस्तत्युच्यते यमकस्पादपादत्रयगतत्वेन यमनमनुमः प्र
युक्तत्वमेव कविभिस्तत्प्रयोगात् भुजंगमस्येवमणेः सु
हंभाः ग्राहावकीर्णविनदीसदंभाः उदंतलानिर्णानोपिर्जतोः कर्षे
तिचेतः प्रसभं सदंभाः १ उपमायांतयोन्यूनाधिकोपमानत्वेदो
षो नत्रोपमानेउपमेयापेक्षयाजातिगतंप्रमाणगतंवायन्यून
त्वमधिकत्वावानदनुचितार्थत्वम् धर्मगतेन्यूनाधिकत्वेन्यूनप।
दत्वाधिकपदत्वेनत्र जातिगतंन्यूनत्वंयथा चंडालैरिवयुष्मा।
भिःसाहसंपरमंकृतम् १ अत्रचंडालत्वजातेर्न्यूनतयाडष्कर्म।
कारित्वस्यकेरनुचितार्थत्वम् प्रमाणगतंयथा वह्निस्फुलिंगइ
वभानुरयंचकास्ति १ जातिगतमधिकंयथा अयंपद्मासनासी।
नश्चक्रवाकोविराजते युगादौभगवान्वेधाविनिर्मित्सुरिवप्रजाः
१ ब्रह्मणःकल्पभेदेनब्रह्मत्वंजातिः प्रमाणगतमधिकंयथा पा
तालमिवतेनाभिःस्तनौक्षितिधरोपमौ वेणीदंडःपुनरयंकालिंदी

का॰प्र॰
१३३
133

पानमस्तिसः । एवं चंडालादिभिरुपमानैरुपमेयस्य मुनेरर्थोऽत्यन्त
मेवकदर्थितानिंदोपहासादिप्रतीतिरित्यनुचितार्थता धर्मगतंन्यू
नत्वं यथा स मुनिर्लांछितो मौंज्या कृष्णाजिनपटं वहन् व्यराजन्नी
लजीमूतभागाश्लिष्ट इवांशुमान् । अत्रोपमेयमौंजीस्थानीया
स्तडिल्लताद्युपमानं केनापि पदेन प्रतिपादितः नचाक्षेपादिना
पि सम्प्रतीयते अविनाभावाद्यभावादिति न्यूनपदत्वमेवेनन्
धर्मगतमधिकत्वं यथा स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभी
मं वपुराप कृष्णः शातह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशि
नेव मेघः । अत्रोपमेयधर्मवाचकनिर्देशादुपमाने तत्सम्भाविनोग्र
हणमिति विच्छित्तिरिति अधिकपदत्वमेवेनन् भिन्नलिंगत्वभिन्नवचन
त्वेऽप्युपमादोषो नोक्तौ दोषान्तरेणैव कृतौ तथाहि लिंगवचनयोर्भे
देऽप्युपमानोपमेययोः साधारणधर्मवाचकं पदमन्यतरत्रघटितं
लिंगं तु अर्थान्नदेवकत्त्रस्यैव तद्धर्मसमन्वयावगतेः कथमुपमानि
र्वाहः अथ प्रतीयमानं साधर्म्यमाश्रित्येयं स्यात् तथाप्युपास्यधर्म

१३३

विशिष्टस्यैवोपमानत्वमुपमेयत्वं वा प्रतीयते न च तथा प्रस्तुतम्
अतः प्रक्रान्तत्वाभावाद्भग्नप्रक्रमत्वमेव दोषः यथा चिंतारत्न-
मिव च्युतोसि करतो धिङ् मंदभाग्यस्य मे । अत्र च्युत इत्युपमेय-
मात्रेणान्वीयते पुल्लिंगत्वात् वचनभेदेन यथा सक्तवो भक्षिता
देव शुद्धाः कुलवधूरिव । अत्र शुद्धा इत्युपमेयमात्रेणान्वीयते
लिंगभेदोत्र विद्यमानोप्यप्रधानम् उपमानस्य बहुत्वे लिंगा-
भेदेप्युभयान्वयसंभवात् यत्र तु लिंगवचनयोर्भेदेपि साधा-
रण्याभिधायिपदमुपात्तरूपभेदरूपं नापद्यते किंत्वेकेनैव रूपेणो-
भयत्रान्वेति तत्र दोषत्वमेव नास्ति उभयत्राप्यस्यानुगमयोग्यस्व-
भावत्वात् तत्र लिंगभेदे यथा गुणैरनेकैः प्रथितो महानिव महार्ण-
वः । अत्र लिंगभेदेपि विशेषणान्वयस्याविशिष्टत्वाद्दोषत्वाभावः
वचनभेदे यथा तद्वेषोसदृशोन्याभिः स्त्रीभिर्मधुरताभृतः दधते
स्म परां शोभां तदीया विभ्रमा इवेति । अत्र वचनभेदेपि मधुरता-
भृत इत्यस्योभयान्वयाविशेषान्न दोषत्वम् एवं कालपुरुषविध्या-

का॰ प्र॰
१३४
134

दिभेदेपि भग्नप्रक्रम एव दोषः तथाप्रतीतेरस्खलितरूपतया विश्रान्त्य
भावात् तत्र कालभेदे यथा अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमु
द्वती पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना १ अत्र चेतना प्रसा
दमाप्नोतीति प्रकृतं तत्तु तमापेति कालभेदे प्रक्रमभेद एव पुरुषभेदे
यथा प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदं
शुकान्ता विभ्राजसे मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा
लतेव १ अत्र लता विभ्राजत इति प्रकृतं तत्तु विभ्राजस इति पुरुषभे
दः संबोध्यनिष्ठस्य भ्राजमानस्यासंबोध्यविषयतया प्रतीतेः विधि
भेदे यथा गङ्गेव प्रवहतु ते सदैव कीर्तिरित्यादावप्रहृतप्रवृत्तमात्र
नो विधेर्भेदः यतो गङ्गा प्रवहतीति विवक्षितं न तु सा वहत्विति एवं
विधस्यार्थस्योपमानगतस्यासंभवाद् द्वित्र्यादिभेदो दुष्टत्वः ननु दा
हृतेषु कथं दुष्टता भिन्नकालसंभिन्नाद्यर्थादतिरिक्तमुपात्तं प्रतीतं
वा किंचित्साधारणधर्ममुपादायोपमापर्यवसाने पश्चाद्भिन्नका
लादिसंभिन्नधर्मान्वयात् तथा हि विभ्राजस इत्यत्र विविक्तमूर्ति

त्वादिनालतानायिकयोरुपमापर्यवसानेपुष्पवाहिन्याजसरूप-
स्तनायिकान्वयेपिकोदोषः अथयत्रोपमानेनैवधर्मेणोपमानि-
वारः सचधर्मभेदः कालभेदादिसंभिन्नएवतत्रकाऽगतिः यथा
युधिष्ठिरइवायंसत्यंवदतीति युधिष्ठिरोहिसत्यमवादीत् न
वदतीतिचेत् उच्यते तत्रापिसत्यवादीतिप्रतीतिधर्मेणैवोपमि-
त्यव्याघातः नचतथासतिसत्यवादयंसत्यंवदतीतिपर्यायोस-
त्यंवदतीतिपुनरुक्तमितिवाच्यम् रूपोपंपुसातीत्यायनुप्रयोग-
वद्दोषत्वात् रूपोपमितत्वार्थाव्ययेनपोषणास्येवात्राप्याजानि-
कसत्यवादित्वस्यप्रतीतेरिति सत्यमात्थ किंतुस्थितेषुनुप्रयो-
गेपुनरुक्तिरथापुनरुक्तिमात्रसमर्थनेनतत्सर्वथैवतन्निरवद्यम् प्र
स्तुतस्यरसादेःप्रतीतिस्खलनात् नचतदसिद्धम् सहृदयसंवेद्यत्वा
त् किंचोपात्तमनादृत्यप्रतीतेनोपमेतिनिष्कम् उपात्तक्रिययैवतद्धि
वक्षेणात् असादृश्यासंभवावप्युपमाहरणतोऽनुचितार्थतायामे
वपर्यवसानः यथा ग्राम्यामिकामप्राप्तिनंवितनार्थरश्मिसमिप्रभका

व्यस्तप्रभाविनामर्थानांच रश्मिभिः साधर्म्यं न क्वापि प्रसिद्धमिति त
त्रोपमानिबंधनमनुचितार्थमिति निपतन्त्यस्याद्दिवनस्पदीस्याः श्रा
तान्यनुर्मंडलमध्यभाजः जाज्वल्यमानास्तववारिधारा दिनार्द्ध
भाजः परिवेषिणोऽर्कान् । अत्रापि ज्वलद्वंधारायाः सूर्यमंडला
न्निपतनमसंभवीति तन्निबंधनमनौचित्यमुक्तमिति उत्प्रेक्षायामः
पिसंभावनमेवेवास्य एव माहात्म्यमनुसंहते ननु यथा ग्राह्योऽपि
केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं समर्थत्वात् अनुत्प्रे॰
क्षायां यथा ग्राह्योपादानेऽवाचकत्वमेव यथा उदयशैलदीर्घिकाग
र्भोन्मुकुलं मेचकोत्पलम् नारीलोचनचातुर्यशंकासंकुचितं यथा
था । निर्विषयत्वमप्युत्प्रेक्षारूपाणामनुचितार्थमेव यत्राविक
रूपाभावान्निरुपाख्यमप्येतत्समर्थ्यता यथ यदर्थान्तरोपन्यासोपा
दानं तद्रूपं हि तत् यथा दिवाकराद्रक्षति यो गुहासु लीनं दिवा
भीतमिवांधकारम् क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरः
सांसतीव । अत्र तमसस्त्रास एवासंभवी तमसोऽचेतनत्वात् ।

नन्वेकथं न तत्प्रयुक्तमद्भिगणानभसरित्राणाम् उक्तमेव हि न तत्रासक्तजया
प्रतीतस्य न काचिदनुपपत्तिरेव न रतीतिश्चेपेणएव तत्समर्थनाय
यत्नः यत्र समासोक्तौ साधारणविशेषणबलादेवोपमानत्वप्र
तीतौ प्रयोजनाभावेन तदुपादानवैयर्थ्यं तदपुष्टार्थत्वं पुनरुक्तता
वा दोषः यथा स्फुरन्ति तिमिरं रुचौकःकुमुः करैर्दयितयेव विजृं
भितनापया अतनुमानपरिग्रहया स्थितरुचिरया चिरयापि दि
नश्रिया । अत्र समस्तविशेषणबलेन लिंगविशेषपरिहाराच्च ति
रस्कृतनायकतया कुमुदिनाथिकात्वेन व्यक्तिः तथा ग्रीष्म
दिवसश्रियोपि तत एव प्रतिनायिकात्वेन भविष्यतीति दयितये
त्यपुष्टार्थत्वम् अर्थतः प्रतीतस्योपादाने यदि पुनरुक्तिस्तदार्थपु
नरुक्तदोषः नन्वस्यापुष्टत्वे श्लेषोपमानिर्विषयास्यादिति चेत् ।
सहितस्याविषयो यत्रोपमानोपादानं विनाश्लिष्टस्यापि विशेषणे
पुनः स्फुटाप्रतिपत्तिः यथा स्वयं च पल्लवाताम्रभास्वत्करविरा
जिनी प्रभातसंध्येवास्वापफललुब्धेहितप्रदा । अत्र प्रभातसं
ध्याया अनुपादाने न स्फुटा प्रतीतिः अप्रस्तुतप्रशंसायामपि उपमे

का॰प्र॰ १३६

136

यस्योपादानवैयर्थ्यं यत्र तदनुपादानमेव दोषः तत्राप्युपमेयमनये।
वरीत्याचरणतव्यम् न तु नः प्राहप्रयोगेणाऽऽद्युदाहृतं नीयम् यथा आहू
तेषु विहंगमेषु मशको नायान्पुरो वार्यते मध्ये वा धुरि वा वसंस्तृणमणि
र्धत्ते मणीनां रुचम् खद्योतोऽपि न कंपते प्रचलितुं मध्येऽपि तेजा।
स्विनां धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वांतरम् १ अत्रा
चेतनः प्रभोः समयस्याप्रस्तुतनिष्ठसामान्यव्यवहारेणासंभवाद्दु।
ष्टमेव प्राहेनकथमित्युपमेयार्थं वत्रनरुक्तेनावेति नदेतेलंकारदो।
षाः यथासंभवमन्येष्वेवंजातीयकाः प्रोक्तजातिस्वभावितादृशोऽदृष्ट
ङ्गेनोपपनिपादिनमर्हतीति कल्याणमास्ताम् ॥ संपूर्णं काव्यलक्ष।
णम् ॥ ज्येष्ठे सर्वगुणैः कनीयसि वयोमात्रेण पात्रे धियां गात्रेणास्म
र्त्यसर्वबंधपरेऽनिष्ठापतिष्ठाश्रये श्रीहर्षे त्रिदिवं गते समधिमनोहीने च
कः शोधयेद्ग्रंथं सद्गमहोमहन्त्वविधिना भाग्यं यथा स्त्रीपितः १ पवि।
त्रीलयं तु संतोषमनसा संतोषशीलेन इममङ्गतं प्रदीपं प्रकाशमाः
पियः प्रकाशयति २ दीपिकाहितयंकान्येप्रदीपहितयहृतो।
स्वमतौ सम्यगभ्यासाद्योगोविंदः शर्म विन्दति ३ ॥ इति श्रीमहा १३६

महोपाध्यायगोविन्दठक्कुरकृते काव्यप्रदीपेऽर्थालंकारनि-
का॰ प्र॰ १३७ र्णयोनाम दशम उल्लासः ॥ १० ॥ समाप्तश्चायं काव्यप्रदीपः
डोंमसमोल्लासतोऽवद्यं चितमस्मान्मयादिनाऽस्तियत् शोध्या-
यन्तिवहनतस्सन्तोनांक्षम्यन्ते हि साधवः १ ॥ शुभमस्तु ॥

137

१३७